ISSN 2348-7828

ज्ञान-विज्ञान विमुक्तये
UGC Care Listed

वेदविपाशा

(VEDA VIPASHA)

Multidisciplinary Peer Reviewed Annual Research Journal

Vol. 11 2024

योऽनूचानः स नो महान्।
केन्द्रीयसंस्कृतविश्वविद्यालयः

CENTRAL SANSKRIT UNIVERSITY
VEDAVYAS CAMPUS, BALAHAR
Himachal Pradesh-177108
www.csu-balahar.edu.in

ISSN 2348-7828

VEDA VIPASHA

PEER-REVIEWED MULTIDISCIPLINARY ANNUAL RESEARCH JOURNAL

VOL. 11. **2024**

ISSN 2348-7828

Title	:	Veda Vipasha (वेद-विपाशा)
Vol. :	:	11
Year	:	2024
Price	:	500/-

Copies	:	100
Printed and Published by	:	Prof. Satyam Kumari, Director Central Sanskrit University, Vedavyas Campus, Balahar, Himachal Pradesh-177108
Editor	:	Prof. Manju Nath S.G.
Email	:	director-balahar@csu.co.in
Phone	:	7505639178
Printed at	:	Sharma Trading Company V.P.O. Pragpur Tehsil Pragpur Distt. Kangra H.P. 86288-33269 (M)
Composed and Designed By	:	Ajay Sharma for Sharma Trading Company

ISSN 2348-7828

सम्पादकीयम्......

विकसितभारताय अनुसन्धानम्

ऋषिचर्यायाः धरणीयं भारतवर्षमाप्राचीनकालात् विश्वस्य सभ्यताभ्यः मार्गदर्शनं करोति, तस्मादेव बहवो हि ज्ञानपथिका अत्रत्येषु विद्याकुलेषु उषित्वा स्वजीवनं धन्यं चक्रुः कुर्वन्ति च। प्रत्येकं भारतीयविद्याशाखायां विविधाः ज्ञानपरम्पराः समुल्लसन्ति, तासां भारतीयज्ञानपरम्पराणामजस्रानु-सन्धानस्यावश्यकता विद्यते। ज्ञानस्य रचना मानवस्य बौद्धिकयोग्यतायास्स्वभावोऽस्तीत्यतः मानवमेधा प्रसङ्गानुसारमुपस्थितज्ञाने नूतनामन्वेषणकारिणीं दृष्टिं निदधाति यया निष्कर्षतया सामाजिकोपयोगाय नवीनज्ञानस्य सङ्घटनं तथा लोकानां गुणावत्तापूर्णजीवनाय आधारभूमिः प्राप्यते।

लोकानां गुणवत्तापूर्णजीवनाधारेणैव संसारे देशानां स्थितिर्निर्धारिता भवति। भारतसर्वकारेण विकसितभारतं कर्तुं 2047 तम ईश्वीयाब्दोऽवधित्वेन निर्धारितः। विकिसतभारताय शिक्षाक्षेत्रस्य महत्त्वपूर्णा भूमिका वर्तते यतोहि सर्वेषु क्षेत्रेषु परिवर्तनस्य नेतृत्वं शिक्षयैव क्रियते। शिक्षायामप्यनुसन्धानं सर्वप्रमुखाङ्गं विद्यते यत्र परिश्रममत्यन्तमनिवार्यं वर्तते।

केन्द्रीयसंस्कृतविश्वविद्यालयेन महता सूक्ष्मेक्षिकया भारतेऽनुसन्धानानां वैशिष्ट्यं सम्पादयितुमायासो विधीयमानोऽस्ति। तस्यैव यज्ञस्य हविर्भूतेयं पत्रिका संस्कृतज्ञानप्रणाल्या अनुप्रयोगानुसन्धानायावसरं कल्पयति। पिपठिषूणामनुसन्धित्सूनाञ्च ज्ञानपिपासाशमनक्षमायाः 'वेदविपाशा' नामधेयायाः, विश्वविद्यालयानुदानायोगस्य संरक्षितसूच्यां वर्त्तमानायाः शोधपत्रिकायाः एकादशतमोऽयमङ्कः केन्द्रीयसंस्कृतविश्वविद्यालयस्य हिमाचलस्थेन विपाशानद्यास्तीरे स्थितेन विकसितभारतनिर्माणैकचक्षुषा वेदव्यासपरिसरेण भवतां सुधीनां समनुसन्धातृणां करकमलयोः निधीयते।

विनयावनता

प्रो. सत्यम कुमारी

ISSN 2348-7828

ISSN 2348-7828

विषयानुक्रमणिका

ISSN 2348-7828

अद्वैतवेदान्ते ब्रह्मविचारः

प्रो. सत्यम कुमारी

शोधसारः- **एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।**
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।। **श्वेता. 6/11**

समग्रोऽयं लोको ब्रह्मणः एव विवर्त्तः विद्यते। सः परमात्मा ज्योतिषां ज्योति एवम् अवाङ्मनसगोचरः। स अद्वितीयः सर्वव्यापकः सर्वान्तर्यामी साक्षी चैतन्यस्वरूपो निर्गुणश्चेति श्रुतेः गम्यते। ब्रह्म तु सर्वथा ज्ञानात्मकम् अज्ञानरहितं चित्स्वरूपं सत्स्वरूपं आनन्दात्मकञ्च। अद्वैतवेदान्तिनां मते जीवो ब्रह्मैवास्ति न च ब्रह्मणातिरिक्तः। ब्रह्मणः त्रीणि स्वरूपाणि स्वीकृतानि निर्गुणब्रह्म, सगुणब्रह्म, जीवः शरीरस्थः चेति। निर्विकल्पकं निरुपाधिकं निर्विकारं व्यापकं चेतनमद्वितीयञ्च ब्रह्म। यद्यपि ''द्वे एवं ब्रह्मणो रूपे मूर्तं चैवामूर्तं च'' इति एवमुपनिषत्सु सगुणनिर्गुणब्रह्मणो निरूपणपरं यथा आचार्यशङ्करो दर्शयति यत् श्रुतीनाञ्च निर्गुणं ब्रह्मैव प्रतिपाद्यो विषयः, तदेव च पारमार्थिकं तत्त्वं। सगुणं ब्रह्म तु जगदिव सामयिकतया मायिकसत्तां बिभर्ति यद्यपि ब्रह्मणः किमपि स्वरूपं नास्ति तथापि उपाधिभेदात् तस्य त्रैविध्यं वर्तते, वस्तुतः तत् सत्स्वरूपं चित्स्वरूपं आनन्दस्वरूपं चास्ति।।

कूटशब्दाः-ब्रह्म, तत्त्वं, उपनिषद्, उत्पत्तिः, स्थितिः, लयः, र्निविशेषः, सच्चिदानन्दः, व्यावर्त्यः, निर्विकारः, कूटस्थः अनन्तं च।

भूमिका-लौकिकपारलौकिकोपकारकं दर्शनं न केवलं भारतीयानां सर्वविधकल्याणं विदधाति अपितु विश्वे सर्वेषां जीवानां महत् कल्याणं साधयत् परलोकेऽपि निरतिशयं सुखं प्रददातीति सर्वेषां विश्वासः। उक्तं च महामुनिना मनुना मनुस्मृतौ।

सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते।।[1]

सुखात्मिकामानन्दात्मिकसत्तां स्थितिं प्राप्तुं प्रेक्षावतां प्रवृत्तिर्दरीदृश्यते, तस्या प्रयोजनीयत्वाद् सन्दिग्धमयत्वाच्च[2]। आस्तिकनास्तिकभेदाभ्यां विद्वांसः आचार्याः तत्त्वज्ञानसिद्धये प्रवृत्ताः दृश्यन्ते। षडास्तिकदर्शनेषु वेदान्तदर्शनमन्यतमम्। वेदानामन्तः परोऽवधिः तत्त्वज्ञानस्य पराकाष्ठा वा इति व्युत्पत्त्या वेदान्तशब्दस्य प्रयोगः उपनिषदामर्थे भवति स्म। यतोहि वेदानामन्ते प्रादुर्भवन् तत्त्वज्ञानस्य प्राचुर्येण प्रतिपादनमपि तत्र भवति उपनिषदां मन्थनं विधाय वेदव्यासेन ब्रह्मसूत्राणां रचना कृतेति ब्रह्मसूत्रभाष्ये शङ्कराचार्यपादेन-

वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्।
उपनिषदवाक्यकुसुमानामेव सूत्रकारेण ग्रहणं।।

कृतं वेदान्तदर्शने इति अभिप्रायः। समस्तवेदानां परमलक्ष्यात्मकं तत्त्वमुपनिषन्मन्त्रेषु निगदितमस्ति। परिदृश्यमानस्य चराचरात्मकस्य सकलप्रपञ्चस्य सृष्टिकर्त्तृत्वेन मूलकारणं यद् ब्रह्म तस्य सम्पूर्णविवेचनात्मकं ज्ञानमुपनिषत्स्वेव लभ्यते। उपनिषदां मन्थनं विधाय वेदव्यासेन ब्रह्मसूत्राणां रचना कृतेति सर्वसम्मतो विषयः।

अद्वैतवेदान्तः आचार्यशङ्कराचार्येण प्रतिष्ठापितः। तन्मतेजीवो ब्रह्मैवास्ति न च ब्रह्मातिरिक्तः। उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहाति विषयिविषयभूतानि तदेतद् ब्रह्मलक्षणम्।[3] जगाद शङ्करः स्वयमेव[4]-यतो चास्माद्वा इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्ते येन जातानि जीवन्ति प्राणान् धारयन्ति वर्धन्ते। विनाशकाले च यत्प्रयन्ति यद् ब्रह्म प्रतिगच्छत्यभिसंविशन्ति तादात्म्यमेव प्रतिपद्यते। उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहाति विषयिविषयभूतानि तदेतद् ब्रह्मलक्षणम्। इदमेव ब्रह्मतत्त्वरूपेणावभासते। शङ्कराचार्येण समर्थितोऽद्वैतवादः केवलाद्वैतवादः निर्विशेषाद्वैतवादः, ब्रह्माद्वैतवादः औपनिषदद्वैतवादः इत्यादि नामानि प्रसिद्धानि। यतोह्यत्र केवलं निर्विशेषं ब्रह्मैवैकं तत्त्वमिति स्वीकृतम्। जगज्जीवश्च मिथ्या दृश्यमदृश्यञ्च सर्वं ब्रह्मैव।।

ब्रह्मजगज्जीवानां तावदेव द्वैततया भानं भवति, यावद् ब्रह्मज्ञानं न उदेति। ब्रह्मजगज्जीवानां द्वैततया भानेऽविद्याऽज्ञानं वा कारणम्, अज्ञाने नष्टे भेदबुद्धेरपगमे सति जगज्जीवरूपप्रपञ्चस्याभावो भवति। प्रपञ्चाभावे एकमद्वैतं ब्रह्मावभासते। तदुक्तं ब्रह्मसत्यं जगन्मिथ्या इति।

ब्रह्म तु सर्वथा ज्ञानात्मकम्। अज्ञानरहितं चित्स्वरूपं सत्वस्वरूपं आनन्दात्मकञ्च। ब्रह्मैव परमात्मा। परमात्मा तु प्रकाशानामपि प्रकाशः तेजसामपि तेजः अस्ति। कठोपनिषदि उक्त ब्रह्मविषयको मन्त्रः-

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।।[5]

ISSN 2348-7828

मन्त्रस्यायमाशयः-यथा एकैवाग्निः विश्वेऽस्मिन् जगति सर्वत्र परिव्याप्तः सैव सूर्ये, वैद्युत्शक्त्यौ, अपरेष्वपि विविधेषु पदार्थेषु नानारूपेषु समुपलभ्यते, तद्वद् एवायं परमात्मा सर्वभूतेषु अन्तः बहिश्च परिव्याप्तः श्रीशङ्कराचार्यानुयायिनामयं डिण्डिमघोषो यत्-

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।।[6]

तत्र जीवो ब्रह्मैव नापरः इत्यस्मिन् विषये प्रायः सर्वेषामद्वैतवादिनामाचार्याणामैकमत्यमेवास्ति। भवतु नाम तत्रांशांशिरूपभेदः सेव्यसेवकभावादिरूपो वा भेदः किन्तु वस्तुगत्या अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि[7] इति श्रुत्या जीवब्रह्मणोरभेद एवेति प्रतिपादितं भवति। उक्तं च श्रीमच्छङ्कराचार्यैः स्वरचिते षट्पदीस्तोत्रे-

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः।।[8]

अतः प्रतीयते यज्जीवावस्थायां जलधिवीचिवत् प्रातिभासिकभेदेऽपि वस्तुतोऽभेद एव। यथा केवलं नामरूपमात्रेण घटशरावादीनां मृत्तिकातो भेदः प्रतीयतेऽज्ञानां विचारशीलानान्तु मृत्पिण्डतद्विकारयोश्च न मनागपि भेदः प्रतीयते। एवमेव ब्रह्मजीवयोर्न लेशतोऽपि भेद इति।

अद्वैतवेदान्तिनां मते जीवो ब्रह्मैवास्ति न च ब्रह्मातिरिक्तः। ब्रह्मणः त्रीणि रूपाणि स्वीकृतानि निर्गुणं ब्रह्म, सगुणं ब्रह्म, जीवः, शरीरस्थः चेति। निर्विकल्पकं निरुपाधिकं निर्विकारं व्यापकं चेतनमद्वितीयञ्च ब्रह्म पारमार्थिकम्।

ब्रह्मणः स्वरूपमित्थं तटस्थलक्षणेन स्वरूपलक्षणेन च निर्णीयते। तटस्थलक्षणं नाम कादाचित्कत्वे सति व्यावर्त्तकत्वं यथा काकवद्देवदत्तगृमिति। काको यावल्लक्ष्यमनवस्थिततत्वे सति चारुदत्तादिगृहेभ्यो व्यावर्त्य देवदत्तगृहं दर्शयति। तथा ब्रह्मणो जगज्जन्मादि- कारणत्वं तटस्थलक्षणं जगतस्सृष्टिस्थितिलयाः सर्वदा न भवति। कदाचित् सन्ति कदाचित् न सन्ति किन्तु प्रधानपरमाण्वादिजगत्कारणेभ्यो व्यावृत्य ब्रह्मणो जगत्कारणत्वं दर्शयति। अतो जगज्जन्मादिकारणत्वं ब्रह्मणो तटस्थलक्षणम् उक्तं च जन्मादलस्य यतः।[9] यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यद् प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद् ब्रह्मेति।[10] श्रुत्या च तटस्थलक्षणं प्रतिपादितम्।।

ब्रह्मणः स्वरूपलक्षणम् इत्थं भवति सत्-चित्-आनन्दं च ब्रह्मणस्स्वरूपभूतम् अन्येभ्यो व्यावर्त्य दर्शयति, असत्-जड-दुःखेभ्यो व्यावर्त्य ब्रह्मस्वरूपं दृश्यते। अतः एतत् सच्चिदानन्दत्वं ब्रह्मणो स्वरूपलक्षणम्, सत्यं ज्ञानमनन्तं ब्रह्म[11] आनन्दो ब्रह्मेति व्यजानीयात[12], विज्ञानमानन्दं ब्रह्म[13] इति। वेदान्ते ब्रह्म निर्गुणं निर्विकारं कूटस्थं नित्यम् एव व्यापकं सनातनम् उक्तं च गीतायामपि-

नित्यस्सर्वगतः स्थाणुरचलोऽयं सनातन।।[14]

इत्थं वेदान्तमते ब्रह्मस्वरूपं विद्यते।।

इत्थञ्च स्वप्रकाशचिदात्मनो व्यतिरिक्तं सर्वमेव चास्ति मिथ्याभूतं कल्पितञ्च इति प्रतिपादितम्। अत एव तत् सर्वं स्वाप्निकं मायिकञ्चाऽज्ञानकल्पितमिति स्वास्तित्वविहीनत्वात् ब्रह्माद्वैते चास्ति श्रुतीनां प्रामाण्यम्-तत्त्वमसि।

अहम् ब्रह्मास्मि, सच्चिदानन्दरूपमिदं सर्वम्, ब्रह्मैवेदं सर्वम् ....

इत्यादिश्रुतयः सर्वा अपि तस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य निर्गुणस्य निष्कलस्य निर्विशेषस्य च स्वप्रकाशचिदात्मनो ब्रह्मणोऽद्वैतं प्रतिपादयन्ति एकमेवाऽद्वितीयं ब्रह्मेति च समुद्घोषयन्ति इति।।

पादटिप्पणी

1. मनुस्मृति 6/74
2. यदसन्दिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागो चरः।। भामती पृ. 2
3. तै. उप. 2.2.22 शाङ्करभाष्यम्।
4. तै. उप. 2.2.22 शाङ्करभाष्यम्।
5. कठोपनिषदि 22.2.20
6. वेदान्तडिण्डिमः 2.2.2
7. छा. उप. 6.3.2
8. षट्पदीस्तोत्रम् - 3
9. ब्रह्मसूत्रम् 1.1.2
10. तै. उप. 3.2.2
11. तै. उप. 2.1.1
12. तै. उप. 3.6.1
13. बृ. उप. 3.9.22
14. श्रीमद्भगवद्गीता 2024

वरिष्ठाचार्या, सर्वदर्शनविद्याशाखा,
निदेशकः, के. सं. वि. वेदव्यासपरिसरः,
बलाहरः, हिमाचलप्रदेश

ISSN 2348-7828

महाकविभासस्य नाटकेषु प्रतिनायकानां चरित्रचित्रणम्

डॉ. प्रेम सिंह सिकरवारः

शोधसारः-

संस्कृतसाहित्यस्य वृद्धये महर्षिवेदव्यासः वाल्मीकिः तत्पश्चात् कालिदासः, भवभूतिः, अश्वघोषः, बाणभट्टः, भारविः, महाकविमाघः, श्रीहर्षः, भासः एतेषां कवीनां विशेषं योगदानं वर्तते। अलङ्कारादीनां गणनीयाः विद्वांसः सन्ति। संस्कृतभाषायाः साहित्यम् अमूल्यग्रन्थानां अब्धिः (तोयनिधिः) वर्तते। एतादृशं समृद्धसाहित्यम् अन्यासां कस्यामपि भाषायां न वर्तते। लौकिकसाहित्ये बाल्मीकिकविना विरचितं रामायणे विभिन्नानि स्थलानि विशेषरूपेण कवेः गम्भीरतीव्रानुभूतिभिः युक्ताः वर्तन्ते। महाभारतेऽपि भावात्मकानां ज्ञेयस्थलानां भावः वर्तते। संस्कृत-साहित्यस्योपवने कालिदासस्य समागमः 'वसन्तदूतरूपेण' अभवत्।

'भवभूतिः संस्कृतसाहित्यस्य महाकविः सर्वश्रेष्ठो नाटककारः च अभवत्।

'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।'

स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।।

प्रख्यातोऽलङ्कारशास्त्री जयदेवः कवितां कामिनीरूपेण चित्रित्वा भासं तस्य हासः अभवत्। यथोक्तम् -

'भासो भासः कविकुलगुरुः कालिदासो विलासः।'

एवं रीत्या भोजराजादि अंलकारिकाः स्व-स्वकृतिषु स्थाने-स्थाने भासनाटकैः उद्धरणाः दीयन्ते, यस्मात् सिद्धः यत् तेषां सर्वेषां कवीनां नाटककाराणां अलङ्कारिकानाञ्च समये भासः अतीव प्रसिद्धो जातः।

कूटशब्दाः-महाकविभासः, कविषु भासस्य स्थानम्, प्रतिनायकानां परिचयः,भासस्य नाटकचक्रस्य एवञ्च भासकृतीनां परिचयः, भासनाटकचक्रे प्रतिनायकानां परिचयः, रामायणश्रित-महाभारताश्रित-बृहत्कथाधारितरूपकेषु प्रतिनायकानां चरित्रचित्रणम्।

भूमिका -

भास संस्कृतसाहित्यस्य प्रसिद्धः नाटककारः नाट्यकलायाः इतिहासे अस्य सर्वप्रथमं स्थानमस्ति। अस्मिन् न संदेहो यत् भासात्पूर्वमपि नाटककाराः अभवन्।

आदिकाव्यकारः-

वादयन्ति तदा शान्तिं लासयन्तयपि चापरे।

नाटकान्यपरे स्माहुर्हास्यानि विविधानि च।।[3]

कालिदासः स्वमालविकाग्निमित्रनाटके-

'प्रथितस्य यशसां भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानकवेः कालिदासस्य क्रियायां बहुमानः।'

भासस्य नामः उच्चनाटककाररूपेण सादरपूर्वकंकथ्यते एवं गद्यसम्राटबाणभट्टोऽपि स्वहर्षचरितस्यारम्भे भासं स्वश्रद्धाञ्जलि दायमानः तेषां नाटकानां विशेषताऽपि कथित्वागतः। यत् ते सूत्रधारादारम्भः क्रियमाणः बहुभूमिका तथा पताकास्थानैः युक्ताः।

'सूत्रधार-कृतारम्भैनटिकैबहुभूमिकैः।

सपात्कैर्यशो लेभे भासो देवकुलैरिव।।'

राजशेखरः भासनाटकान् भासनाटकचक्ररूपेण समृत्वा तेभ्यः 'स्वप्नवासवदत्ता एनं सर्वश्रेष्ठं नाटकं घोषितम्।'

'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।'

स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।।

प्रख्यातोऽलङ्कारशास्त्री जयदेवः कवितां कामिनीरूपेण चित्रित्वा भासं तस्य हासः अभवत्। यथोक्तम् -

'भासो भासः कविकुलगुरुः कालिदासो विलासः।'

एवं रीत्या भोजराजादि अंलकारिका: स्व-स्वकृतिषु स्थाने-स्थाने भासनाटकै: उद्धरणा: दीयन्ते, यस्मात् सिद्ध: यत् तेषां सर्वेषां कवीनां नाटककाराणां अलङ्कारिकानाञ्च समये भास: अतीव प्रसिद्धो जात:।

प्रतिनायकानां परिचय:-

वस्तुत: नायकात् पश्चात् य: पाठकस्य अथवा प्रेक्षकस्य ध्यानं सर्वाधिकाकृष्टं करोति स: प्रतिनायक:। तस्मात् एव कथावस्तौ संघर्ष: एवं गतिशीलताया: तत्वं विशेषरूपेण विद्यमानं भवति। नायकस्य प्रतिकूलं (प्रतिकृत्य) प्रतिनायक:। नायकस्य चरित्रे यावदुदारताया: निर्वाह: अपेक्षितो भवति तावत् प्रतिनायकस्य चरित्रे दुर्गुणताया: भवेत्। नायकस्य लक्ष्यप्राप्तौ परमविरोधोपस्थिति: तस्य चरित्रस्य विशेषता भवति स: प्रतिनायक:। स: नायकस्य घोषितो शत्रु: भवति, यतोहि नायक: श्लाघ्यगुणै: समायुक्तो: धीरचरितं भवति। स्वभाविकरूपेण प्रतिनायक: प्रत्येकदृष्टिभि: निन्द्य:अवगुणैश्च परिपूर्ण: भवति।

प्रतिनायक:-

'धीरोद्धत: पापकारी व्यसनी प्रतिनायक:।[4]

यथा-रामस्य रावण:।

धीरोद्धत:-

मायापर: प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठ:।
आत्मश्लाघानिरतो धीरैर्धीरोद्धत: कथित:।।[5]

अधर्माचारी, व्यसनी प्रतिनायकस्य लक्षणम्।

भासस्य नाटकचक्रस्य महत्त्वम्-

भासो भास: सरस्वत्या नाटकैरमृतौपमै:।
नाट्यवाङ्मयव्योमेन्दु: शास्त्रज्योतिर्विभास्वर:।।

महाकवेर्भासस्य कृतित्वेन त्रयोदशनाटकरत्नानि समुपलभ्यन्ते। भासनाटकचक्रेऽपि छेकै: क्षिप्ते परीक्षितुम्। स्वप्नवासवदत्तस्य दाहकोऽभून्न पावक:। इति राजशेखरेणभणितम् आश्रित्य 'भासनाटकचक्रम् इतितत्कृतनाटकानां व्यवह्रियते।'

भासस्य ऐतिहासिकपरिचय:-

भासो हास: इति कवितावानिताहासस्वरूप: कविकुलकमलोन्मीलनविकरनिक राजमाण: चन्द्रायमाण: कविनक्षत्रमण्डले, संस्कृतसाहित्यजलनिधिपूरणजलदायमानोऽप्रतिम प्रतिभा सम्पत्तिभासमान:, सर्वथाऽसमान: कविताक्षेत्रे, महाकविर्भास: कदा कस्मिश्चद्देशे जनिमलभतेति विषयो विधिशेमुषीकाणां काव्यालोचनोपलोचन भूतानां काव्यभावनाभाषित हृदयानां सहृदयानां समक्षं विवादपदवीमेवा-रूढोऽस्ति। तथाप्ययं प्रथमनाटककार: इत्युन्मुक्तकण्ठेन स्वीक्रियत एव सर्वैशलोचकैरिति।

समय:-

महाकवे: भासस्य समयविषयेऽपि एकमतयो न सन्तीतिहासकारा:। मालविकाग्निमित्रस्य प्रस्तावनायां महाकवे कालिदासस्य-

'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानस्य कवे: कालिदासस्य कृतौ कोऽभिनिवेश:।'

कालिदाससमयस्तु ई. प्रथम शताब्दीति तैस्तै: प्रमाणैर्निश्चितम्। कालिदास समयेस्य चतुर्दिक् पसृतां प्रसिद्धिं दर्शं-दर्शं ततो वर्षशतपूर्वमेव ई. पू. द्वितीयशताब्दी भासस्य समय: इति प्रतीयते।

भासस्य नाटकचक्रस्य एवञ्च भासकृतीनां परिचय:-

भास: इति प्रथितयशा: कश्चन महान नाटककार: बभूव। तस्य विशेष: एव अस्ति यत् स: स्वस्यनाम न कुत्रापि लिखितवानास्ति। परन्तु स: अन्यै: कविभि: नाटककारै: च सर्वत्रापि जेगीयते। तस्येति कथितानि एतानि त्रयोदश नाटकानि-

1. स्वप्नवासवदत्तम्, 2. प्रतिज्ञायौगन्धरायणम्, 3. उरूभङ्गम्,

4. दूतवाक्यम्, 5. पञ्चरात्रम्, 6. दूतघटोत्कचम्, 7.कर्णभारम्,

8. मध्यमव्यायोग, 9. प्रतिमानाटकम्, 10. अभिषेकनाटकम्

11. अविमारकम्, 12. चारुदत्तम्, 13 बालचरितम्

कथानकदृष्ट्या भासग्रन्थानां पुरुषार्थ चतुष्ट्य इव विभागचतुष्टयं कर्तुं शक्यते-

1. रामायणाश्रित ग्रन्था: सन्ति।

2. महाभारताश्रिता:।

3. उद्यनाश्रिता:।

4. कल्पनामूलका: इति।

भासनाटकचक्रे प्रतिनायकानां परिचयः-

'भासनाटकचक्रेऽपिच्छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।।'

भासनाटके एवं रीतेः (विधेः) पर्याप्त प्रयोगं जायते। अस्मात् वाणोक्तिः 'सपताकैः' चरितार्थं भवति। राजशेखरः स्वग्रन्थे सूक्तिमुक्तावल्यामुल्लेखः जायते। यदा आलोकाः परीक्षायैः भासस्य नाटकसमूहम् आलोचनारूपी अग्नौ निक्षप्तः तु सः अग्नि (स्वप्नवासवदत्तम्) एनं ज्वालयितुं न अश्कनोत्।

राजशेखरेण प्रस्तुतश्लोके नापि इदं प्रमाणितं भवति। यत् भासः अनेक नाटकान विरचितः तथा च तेषु 'स्वप्नवासवदत्तम्' सर्वश्रेष्ठामिति भ्रात्रोः गुरुशिष्ययोश्च मध्ये युद्धः भासस्य आदर्शः नास्ति। भासनाटके तु निम्नपात्राणि-राक्षसः घटोत्कचः, गणिका, वसन्तसेना, चौरः, द्यूतकारसंवाहक इत्याद्यपि नैतिक चेतनां न त्यक्ता।

कीथशब्दानुसारं-अग्निपरीक्षायाः अभिप्रायः समालोचकैः क्लिष्टपरीक्षा। तथा च सरलतया इदं ज्ञातुं शक्यते। यत् महाकविभासस्य कविकर्मः। अस्मिन् नाटके सर्वाधिक सफलोऽस्ति। भासस्य नाटकेषु सर्वश्रेष्ठ संस्कृत-साहित्यस्य च अमूल्यो निध्यास्ति। वाक्पतिराजः निजमहाकाव्येषु भासमग्नेः मित्रमुक्तान्। यथा-

भासार्म्भ जलणामिन्ते कुन्तीदेवे तहावि रहुचारे।
सौबन्धवे अ बन्धाम्भि हारियन्दे अ आणान्दे।।

आचार्यः वाक्पतिनापि उक्तं भासो अग्नेः मित्रमिति-

'भासे ज्वलनमित्रे कुन्तीदेव च यस्य रघुकारे।
सौबन्धवे च बन्धवे हरीचन्द्रे चानन्दः।।'

रामायणश्रित रूपकेषु प्रतिनायकानां चरित्रचित्रणं समीक्षा च-

नायकशब्दस्य प्रयोगः मुख्यपात्रार्थे अभवत्। सामान्यपात्राणि नायकस्य सहायकरूपेण वर्तन्ते। नेता रूपकस्य अपरभेदकतत्वम्। नेताशब्देन सह नायकस्य सम्पूर्णं परिकरम् आयाति। नायिका नायकस्य च सर्वाणि मित्राणि, नायिकायाः सख्यः इत्यादयः प्रतिनायकस्य तस्य च सहयोगी नेता इत्यस्य अंङ्गनि मन्यते।

दशरूपककारः द्वितीये प्रकाशे नेतानां गुणान् कथयति यत् नायको विनम्रः, मधुरः, त्यागी, वाक्पटुतरः, जनानां कृते सुखप्रदायकः पवित्रचिन्तनकर्ता वाग्कुशलः कुलीनः च भवेत्। नायकः शूरदृढतेजस्वीशास्त्रज्ञाताधार्मिको च भवतीत्यर्थः। रावणः, विभीषणः, कंसश्च

महान् पराक्रमो दर्पयुक्तः देवादीनामवमन्ता परात्कर्षेऽसहिष्णुतायुक्तोऽयं रावणः। व्यङ्ग्यकूटोक्तिदर्पोनिभप्रभृतयो दुगुर्णाः रावणे विराजन्ते। अत्र रामायणे सीतायामनुरक्तैवास्य दुर्वृत्तौ प्रवृत्तिकारणं वर्णितम्। कत्सितचरित्रवानयं रावणः।

रावणः जातिस्वभावेन मायापरायणः स्म। रावणः बलप्रयोगे विश्वसति। कस्याश्चिदपि सम्मतिः सः न स्वीकरोति। परञ्च शूर्पणखायाः अपमाने सति सः महाविपत्तौ दुविधाहीनं भवति।

भासस्य प्रमुखत्रयोदशनाटकेषु प्रतिमानाटकम् अभिषेकनाटकञ्च रामायणाधारितानि नाटकानि सन्ति। प्रतिमानाटके भासः परम्परागतनकारात्मकचरित्रेषु अपि सकारात्मकतायाः आधानं कृतः।

महाभारताश्रितरूपकेषु प्रतिनायकानां चरित्रचित्रणं समीक्षा च-

महाभारतस्य रचयिताश्रेय: महर्षिव्यासं प्राप्नोति। व्यासस्य पिता महर्षिपराशर: माता सत्यवती च स्म। इयमेव सत्यवती कौरवपाण्डवानाञ्च प्रवितामही आसीत्। महाभारतं पौराणिकैतिहसिक: च ग्रन्थ: अस्ति। अत: भारतीयसमाजे विशेषादरदृष्टया दृश्यते। वैदिकवाङ्मयेन सम्बद्ध: कारणात् वेदोत्तरमान्यतापि प्राप्तमस्ति। संभवत: तदर्थम् एनं 'पंचमवेद:' अपि कथ्यते। भारतीय: सामाजिकसांस्कृति-राष्ट्रीयधार्मिकेत्यादय: सर्वदृष्टिभि: इत्यस्य महत्ता। सदैवं जनमाणसस्य प्रेरणास्त्रोत:। इत्यस्मिन् चिन्तनमननज्ञानसामान्यव्यवहारादीनाञ्च यथा जीवनस्य कस्याचिदपि पक्षस्याभाव: नास्ति।

भामह: अनुसारं महाकाव्यस्य नायको महान् भवति। प्रारम्भे एव तस्य वेशवीर्यश्रुतादीनाञ्च परिचय: भवेत्। समग्रमहाकाव्येषु नायकस्य व्यापकता भवेत्। दण्डिन: दृष्टया नायक: महान् उदात्तश्च भवेत्। रुद्रटानुसारं महाकाव्यस्य नायक: ऐतिहासिक: कल्पितश्च राजा भवेत्। तस्य धर्मार्थकामस्य च सम्यक् ज्ञानं भवेत्। नायक: शक्तिसम्पन्नो भवेत्। नायक: शक्तिसम्पन्नो भवेत्। कपटी शकुनि-

यत्रास्य मन्युरुद्भूतो येन धूतमकारयत्।
चत्र धर्मसुतं द्यूते शकुनिः कितवोऽजयत्।।[6]

भारतीयधर्मे संस्कृत्याञ्च कृष्णस्य व्यक्तित्वं विलक्षणमस्ति। वैदिकवाङ्ममयात् अघवनसाहित्यपर्यन्तं कृष्णचरितं व्यापकरूपेण चित्रितम्। कृष्णस्य प्राचीनतमोल्लेख: ऋग्वेदे स्तोताऋषि तथा इदं पराभूतकरणाय कृष्णासुर रूपेण अभवत्। छान्दोग्योपनिषदि कृष्णं देव की पुत्रं होर-आङ्गिरसस्य शिष्य: उक्तम्। वैदिक-वाङ्मयेन कृष्ण: विष्णो: अवतार: इति मन्यते। परञ्च तस्मिन् कृष्णस्य लौकिक रूपस्यैव प्रधानता वर्तते। अत्र श्रीकृष्ण: पाण्डवानाम् उपदेशक:। जीवनरक्षा सखारूपेण च चित्रिवमस्ति। महाभारतपश्चात् कृष्णचरितस्य पूर्ण विकास: पुराणेष्वभवत्।

इत्यतिरिक्तं हरिवंशेऽपि कृष्णचरितं वर्णितम्। परञ्च केचन् विद्वांस: हरिवंशं स्वतन्त्रपुराणं न स्वीकृत्य महाभारतस्य खिलरूपेण मानयन्ति। कृष्णचरिसम्बन्धी प्रचीनपुराणानि विष्णु एवं ब्रह्मा एतयो: कथा समानरूपेण वर्तते। एवयो: पुराणयो: नवनीतचौरी, पनघटलीला चीरहरणलीला, भ्रमरगीतम्, इत्यादय: प्रसङ्ग वर्णिता:।

भगवान्-अवतरणे आसुरी अत्याचारमपि पृष्ठभूमिरूपेणास्ति, भागवतपुराणे हिरण्यकशिपु कंस: च एताभ्यामत्याचारस्य वर्णनमस्ति।

बालचरितनाटकं भागवान् श्रीकृष्णस्य बाललीलासु आधारितमस्ति। पुराणेषु अयं प्रसङ्ग: बहुचर्चित:। विशेषत: श्रीमद्-भागवतमहापुराणस्य तु अयमेव सार: इदं नाटकं पञ्चङ्केषु विभक्तम्।

बृहत्कथाधारितनाटकेषु प्रतिनायकानां व्यक्तित्वं चरित्रञ्च-

1. स्वप्नवासवदत्तम्।
2. प्रतिज्ञायौगन्धरायणम्।
3. अविमारकम्।
4. चारुदत्तम्।

अविमारकम् – अविमारकनाटके चण्डभार्गवनामको ऋषि: प्रतिनायक: अस्ति, परञ्च प्रतिनायकस्य परिचय: अत्र स्पष्टरूपेण नास्ति अस्य नाटकस्य नायको विष्णुसेन: अविमारको वा।

निष्कर्ष: –

भारतीयपरम्परा सर्वविषयान् वेदै: देवै: च सह सम्बद्धयति। नाट्यकालस्य उद्भवसम्बन्धे प्रथम: उल्लेख: भरतमुने: नाट्यशास्त्रे प्राप्यते। नाट्यशास्त्रस्य 36 अध्यायेषु नाट्यकलानां विविधपक्षेषु विस्तरेण चर्चा कृता अस्ति। रूपकेषु मुख्यतया नायक:, नायिका, प्रतिद्वन्द्वी, विदूषक: इत्यादय: महत्त्वपूर्णा: पात्रा: सन्ति। पात्राणां वर्णनं नाट्यकलाप्राचीनग्रन्थे भारतकृतनाट्यशास्त्रे दृश्यते। किन्तु प्रतिद्वन्द्वीविषये स्पष्टोल्लेख: नास्ति। अस्मिन् विषये मुखर: अभवन्- लुब्ध: धीरोद्धत: स्तब्ध: पापकृत् व्यसनी रिपु:।

न तु प्रतिद्वन्द्वस्य चरित्रे, किन्तु मृगस्य उपमायां प्रसङ्गे प्रतिद्वन्द्वी प्रथमं नाम्ना उच्यते। यत् नायकविरोधी इति स्वीकृतम् अस्ति।

मिश्रमीहामृगे वृत्तं चतुरंक त्रिसन्धिमत्।[7]
नरदिव्यावनियमान्नायकप्रतिनायकौ।।

नायकस्य कर्मसु प्रतिद्वन्द्विना विघ्ना: विविधा: उपस्थाप्यन्ते। अन्ते तान् विघ्नान् जित्वा नायक: प्रतिद्वन्द्विनं जित्वा गच्छति। अस्मात् स्पष्टं भवति यत् नायक: एव उत्कृष्टताया: मुख्यं लक्ष्यम् अस्ति। यदि प्रतिनायक: नास्ति तर्हि वीरस्य वीरत्वं सिद्धं कर्तुं न शक्यते।

नाट्यकार: प्रतिद्वन्द्वीद्वारा रसभावभाषाणां योजनां कृत्वा मुख्यरसस्य वर्णनं ततोऽपि चमत्कारिकरूपेण प्रस्तौतुं शक्नोति। यथा मृच्छकटिकायां वसन्तसेनांप्रति शकारस्य स्नेह: अनुचित: यत: वसन्तसेनाचारुदत्तयो: परस्परं सक्तौ, तथापि शकार: वसन्तसेनां बलात् प्राप्तुम् इच्छति, अत्र अनुचितताया: प्रभावात् रसभस्य विषय: भवति। प्रतिद्वन्द्वी न केवलं पराकाष्ठे सहायक: भवति, अपितु प्रतिद्वन्द्वी विना नायकस्य वीरताया: कल्पना अपि कठिना भवति। नायक: यथा यथा अधिकं संघर्षं करोति। भूमिका यथा अधिका भवति तावत् बलवत् स्वीकृता भवति। बलवान् प्रतिद्वन्द्वी वीरस्य कृते विविधान् विघ्नान् सृजति, वीर: तान् जित्वा स्वस्य श्रेष्ठतां सिद्धयति। अस्तु, निश्चयेन वक्तुं शक्यते यत् प्रतिनायकं विना वीरता सिद्धं न भवति, यथा रामायणे रावण:, महाभारते दुर्योधन:, तर्हि रामस्य रामत्वं पाण्डवत्वं च सिद्धं भविष्यति वा प्रबन्धनस्य मुख्य उद्देश्यं (काव्यं वा रूपकं वा) 'पुरूष अर्थप्राप्ति:' इति माध्यमेन सहजतया सिद्धं भवति। प्रतिद्वन्द्विना वीरस्य विरोध:, षड्यंत्र:, पाखण्ड:, हठ:, अशिष्टा इत्यादय: समाजे तस्य प्रति द्वेषद्वेषादिभावना: उत्तेजयन्ति। नायकविरोधिनां एषा अशिष्टता, हठादिता नायकस्य उदये सहायकं भवति, यस्मात् कारणात् समाजे नायकस्य प्रति आदरस्य, सहानुभूते: च भाव: जागर्यते। अन्ते नायक: सर्वविधविघटनं विरोधं च शान्तं कृत्वा नायकविरोधिम् हन्ति।

एवं प्रकारेण नाटकीयदृष्ट्या नायकस्य उच्छ्रिचित्रणस्य दृष्ट्या अन्यनायकविरोधितत्त्वानां तुलने नायकस्य भूमिकाया: महत्त्वं पुन: पुन: वक्तुं आवश्यकता नास्ति। यद्यपि प्रतिद्वन्द्वस्य योजना आवश्यकी इति वक्तुं न शक्यते तथापि रूपकेषु स्निग्धता रोचकतादृष्ट्या उपयोगी सिद्धयति। अतीव अवहेलितपात्रत्वेऽपि प्रतिद्वन्द्वी समाजस्य कृते अतीव आवश्यक: यत: तस्य विना कर्तव्यबोध: न भवितुम् अर्हति। लेखका: आचार्यश्च एतादृशस्य आवश्यकस्य चरित्रस्य कस्यापि लक्षणस्य स्पष्टतया उल्लेखं कुर्वन्त: उपेक्षन्ते। संशोधनस्य दृष्ट्या अपि नायिका, विदूषक: इत्यादिषु अतीव विस्तृतविमर्श: प्राप्यते किन्तु नायकविरोधिविषये न, अत: अस्य विषयस्य विचार: अतीव आवश्यक:।

पादटिप्पणी

1. पाणिनीयशिक्षा-41-42
2. सुभाषितरत्नभाण्डागारम्, विद्याप्रशंसा-01
3. वाल्मीकिरामायणम्- 2/69/4
4. साहित्यदर्पण:- तृतीयपरिच्छेद:।
5. साहित्यदर्पण:- तृतीयपरिच्छेद:-33
6. महाभारतम्-1/2/137

सन्दर्भग्रन्थसूची

1. उपाध्याय, आचार्य बलदेव, 'महाकवि भास: एक अध्ययन' चौखम्भा सुरभारती प्रकाशन, वाराणसी 1994।
2. उपाध्याय आचार्य बलदेव: संस्कृतसाहित्य का इतिहास, शारदानिकेतन वाराणसी, दशम संस्करण-2009।
3. मिश्र: जगदीशचन्द्र, 'प्रतिमानाटक' चौखम्भा सुरभारती प्रकाशन वाराणसी 2001।
4. मिश्र: श्रीरामचन्द्र:, 'संस्कृतसाहित्येतिहास:' चौखम्भा विद्या भवन, वाराणसी, 1993।
5. विश्वनाथ, साहित्यदर्पण, चौखम्भा संस्कृत संस्थान, वाराणसी।
6. वाल्मीकि, रामायण, गीताप्रेस, गोरखपुर।
7. महाभारत, गीताप्रेस, गोरखपुर।

सहायकाचार्य:, शिक्षाशास्त्रविभाग:,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:,
नवदेहली-110016

ISSN 2348-7828

कर्तृतृतीयाविभक्त्यर्थविमर्शः

डॉ. गणेश्वरनाथ झा

शोधसारः- प्राचीनानां वैयाकरणानां नये कर्तरि अर्थे विहिताया तृतीयाविभक्तेः अर्थः आश्रयः। तथा चोक्तं सुबर्थनिर्णये वैयाकरणभूषणसारे द्वितीयातृतीयासप्तमीविभक्तीनामाश्रयः अर्थः। अत्र तृतीयाया आश्रयार्थकत्वे आश्रयत्वं शक्यतावच्छेदकं वाच्यं, तच्च आश्रयत्वं यदि सखण्डोपाधिरूपं स्यात् तर्हि निरूपकभेदेन आश्रयस्यभेदात् अनन्तशक्तिकल्पनं स्यात् अतः गौरवम्। तस्मात् अत्र शोधे आश्रयत्वम् अखण्डोपाधिरूपं न तु आश्रयनिष्ठाधिकरणतानिरूपिताधेयतावत्वरूपमिति प्रमाणपुरस्सरं निरूपितं वर्तते। किञ्च नव्यानां नागेशभट्टानां नये कर्तरि अर्थे विहितायाः तृतीयाविभक्तेः कर्तृत्वशक्ति मान्द्योत्यार्थः वाच्यार्थश्च क्रियाकारकभावसम्बन्धः। तथा च 'रामेण गम्यते' इत्यादौ रामाभिन्नकर्तृत्वशक्तिमद्वृत्तिः उत्तरदेशसंयोगानुकुलो व्यापार इति वाक्यार्थबोधः। अर्थात् 'रामाभिन्नकर्तृत्वशक्तिमद्विशिष्टः उत्तरदेशसंयोगानुकुलो व्यापारः कर्तृक्रियाभावसम्बन्धेन इति निष्कृष्टो वाक्यार्थो भवति'। एतादृशवाक्यार्थस्वीकारे कष्टं कृतः इत्यत्र क्रियाकारकभावसम्बन्धस्य द्वितीया वाचिका इति समर्थसूत्रस्थं भाष्यमेव प्रमाणं वर्तते। इति निष्कर्षः।

कूटशब्दाः- शक्यता, अवच्छेदकं, आश्रयत्वं, निरूपकं, शक्तावच्छेदकं, सखण्डोपाधिः, अखण्डोपाधिः, कर्तृत्वशक्तिमत्वं।

नैयायिकाभिमतकर्तृतृतीयाविभक्त्यर्थः- नैयायिकाः तावत् कर्तृत्वं करणत्वं च कारकविभक्तितृतीयाया अर्थः इति आमनन्ति।[1] 'कर्तृकरणयोः तृतीया'[2] इत्यनुशासनात्। तत्र मुख्यं कर्तृत्वं क्रियानुकूला कृतिरेव। सा च कर्त्राख्यातसमभिव्याहृते चैत्रः पचति इत्यादौ धात्वर्थक्रियां प्रति विशेष्यतया आख्यातेन अभिधीयते। तथा च चैत्रः पचतीति वाक्यात् चैत्रः पाकानुकूलकृतिमान् इति बोधः जायते। चैत्रेण पच्यते इत्यादिकर्माख्यातस्थले चैत्रेण कथ्यते इत्यादिभावाख्यातस्थले च धात्वर्थक्रियायां विशेषणतया सा कृतिः तृतीयाविभक्त्या प्रतिपाद्यते। तथा च चैत्रवृत्तिकृतिजन्यो यः पाकः तन्निरूपितकर्मत्वाश्रयः तण्डुलः, एवं चैत्रवृत्तिकृतिजन्यं कथनम् इति च बोधः उपर्युक्तवाक्यास्य क्रमेण जायते।

अत्र केचित् चैत्रेण पच्यते तण्डुल इत्यादिस्थलेपि कृतिराख्यातस्यैवाऽर्थः तृतीयार्थस्तु आधेयत्वमेव। तत्र आधेयत्वे प्रकृत्यर्थस्य चैत्रादेः निरूपितत्वसम्बन्धेन अन्वयः। विभक्त्यर्थाधेयतायाश्च आश्रयतासम्बन्धेन आख्यातार्थकृतौ अन्वयः। कृतेश्च जन्यतासम्बन्धेन धात्वर्थे पाकेऽन्वयः। पाकस्य च निरूपितत्वसम्बन्धेन आख्यातार्थे कर्मत्वेऽन्वयः। तस्य कर्मत्वस्य आश्रयत्वसम्बन्धेन तण्डुलेऽन्वयः। तथा च चैत्रनिरूपिताधेयत्वा-श्रयकृतिजन्यपाकनिरूपितकर्मत्वाश्रयस्तण्डुलः इति बोधः जायते। ननु कर्माख्यातस्थले पचति, पचतः इत्यादौ धात्वर्थविशेष्यतयैव कृतिबोधनम् आख्यातस्य क्लृप्तम्। अत्र कथं धात्वर्थविशेषणतया कृतिबोधकत्वम् इत्याकांक्षायां यक्समभिव्याहृताख्यातस्य तथा बोधकत्वात् नानुपपत्तिः। ननु तथाऽपि कर्तरि विहितायाः तृतीयायाः न आधेयत्वबोधकत्वम् इति चेत् चैत्रेण ज्ञायते गम्यते च इत्यादौ आधेयत्वार्थकत्वं तृतीयायाः क्लृप्तमेव इति न तत्कल्पनाधिक्यमिति वदन्ति। किन्तु तेषाम् इदं मतं न समीचीनम्। चैत्रेण पक्वम् इत्यत्र कृतिबोधकाख्यातविरहात् चैत्रवृत्तिकृतिजन्यः पाक इति बोधात् तृतीयायाः कृतिबोधकत्वम् आवश्यकमेव। न च पक्वमित्यादौ 'क्त' प्रत्ययस्यैव कृत्यर्थकत्वमिति वाच्यम्, तस्य कर्मविहितत्वेन कृत्यर्थकत्वासम्भवात् यदि च कर्तृकृतः कृतावेव शक्तिर्न तु विशिष्टे ज्ञाता इत्यादौ 'तृच्' प्रत्ययस्य आश्रयार्थकतायाः सर्वाभिमततया कृतावन्वयादेव कर्तृलाभसम्भवः इत्युच्यते तथा सति कर्तृकृतः कृत्यर्थकत्वसम्भवेपि चैत्रेण पक्वः तण्डुलः इति कर्मार्थकस्य 'क्त' प्रत्ययस्य कृत्यर्थकत्वं न सम्भवति। तत्र तु चैत्रवृत्तिकृतिजन्यपाककर्म इति बोधोऽनुभवसिद्धः। तन्निर्वाहाय तृतीयायाः कृत्यर्थकत्वमावश्यकमेव। कृत्प्रत्ययस्य 'क्तादेः क्वचित् चैत्रः ग्रामं गतः इत्यादौ कर्तृत्वबोधकत्वेऽपि' चैत्रेण पाच्यः ''दुष्पचश्चैत्रेण ओदनः'' चैत्रेण ओदनस्य पाकः इत्यादौ कृतां न कृतिबोधकत्वम् अतः तत्र कृतिबोधनिर्वाहाय तृतीयायाः कृत्यर्थकत्वम् आवश्यकमेव। एवञ्च चैत्रेण पच्यते इत्यादौ अपि कृतिः तृतीययैव बोध्यते, अतः तत्र तृतीयायाः आधेयत्वार्थकत्वम् अनुचितमेव। यदि च चैत्रेण पच्यतेत्यादौ कृतेः आख्यातार्थत्वम् आधेयत्वस्य च तृतीयार्थत्वं स्वीक्रियते तथा सति आधेयत्वस्य आश्रयत्वसम्बन्धेन कृतौ अन्वयो वक्तव्यः। तथा च शाब्दबोधस्य आधेयत्वाश्रयत्वरूपाधिकविषयकत्वं वक्तव्यम्, एवं च शाब्दबोधसामग्र्या आधेयत्वोपस्थितेरपि प्रवेशः कार्य इति गौरवं च स्यात्।

यद्यपि भट्टाचार्यैः व्युत्पत्तिवादे राजपुरुषवादे षष्ठ्यर्थस्य स्वत्वस्य संसर्गत्वं प्रकारत्वं वेतिजिज्ञासायाम् प्रकारतायामेव लाघवात् तदेव पक्षः समर्थितः तद्वत् प्रकृतेऽपि लाघवमेवानुसृत्य यदि पदार्थव्यवस्था क्रियेत तदा आधेयत्वस्य प्रकारत्वमेव युक्तं, किन्तु तादृश्याः प्रतीतेरभावात् यया प्रतीत्या आधेयत्वस्य प्रकारत्वमवगाह्येत प्रकृते आधेयत्वस्य प्रकारविधया भानं नाभ्युपगन्तुं शक्यते।

अथ कृतेस्तृतीयाविभक्त्यर्थत्वोपगमे 'चैत्रेण पच्यते तण्डुल:' इत्यत्र तस्या: जन्यत्वसम्बन्धेन धात्वर्थे पाकेऽन्वयस्वीकारे 'चैत्रेण पच्यते तण्डुलो न मैत्रेण' इत्यत्र तृतीयान्तार्थभूताया: मैत्रवृत्तिकृते: नजा अभावो धात्वर्थे बोधनीय:। तत्र मैत्रवृत्तिकृत्यभावीयप्रतियोगिता यदि समवायसम्बन्धावच्छिन्ना गृह्यते, अर्थात् समवायसम्बन्धावच्छिन्नमैत्रनिष्ठकृतिनिष्ठप्रतियोगिताकाभावो यदा विवक्ष्यते तथा सति तादृशाभावस्य मैत्रकर्तृकपाकेऽपि सत्त्वात् मैत्रकर्तृकपाकस्थलेऽपि 'मैत्रेण न पच्यते' इति प्रयोगापत्ति: स्यात्।

यदि चैतद्दोषवारणाय मैत्रनिष्ठकृतिवृत्तिजन्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावो गृह्यत इत्युच्यते चेत् तथा सति जन्यत्वस्य वृत्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावो न प्रसिद्ध्यति। तस्मात् कृतेस्तृतीयार्थत्वं न वक्तुं शक्यते।

ननु 'मैत्रेण तण्डुलो न पच्यते' इत्यादौ न नजा तृतीयार्थमैत्रवृत्तिकृतेरभाव: प्रत्याय्यते येनोक्तदोषाशङ्का स्यादपितु आख्यातार्थकर्मत्वस्याभाव एव आश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताको नजा बोध्यते तथा च 'मैत्रवृत्तिकृतिजन्यपाकर्मत्वाभाववान् तण्डुल:' इति बोधो जायते तथा च नोक्तदोष इति चेत् अत्रोच्यते यत्र कर्मवाचकतण्डुलादिपदानां प्रयोगो नास्ति तत्र तादृशकर्मत्वाभावप्रतीतिर्दुर्घटा। नञ: अनुयोगिविनिर्मोकणाभाव-बोधकस्वस्याव्युत्पन्नत्वात्। अत उक्तरीत्या कर्मत्वाभाव: नञा बोधयितुं न शक्यते तथा च पूर्वोक्तरीत्या कृत्यभाव एव बोधनीय: स च न सम्भवति अतस्तृतीयाया: कृत्यर्थकत्वं न स्वीकरणीयमपितु आधेयत्वार्थकत्वमेव स्वीकरणीयम्। आधेयतायास्तृतीयार्थत्वे तु 'चैत्रेण पच्यते, न मैत्रेणेत्यत्र हि चैत्रनिष्ठा मैत्रनिरूपिताधेयत्वाभाववती च पाकानुकूलाकृतिरिति बोध: निर्वहति। अभिहितञ्चैतदाचार्यै:- **'आधेयत्वस्य तृतीयार्थत्वे चाधेयत्वाभावबोध एव कृतावङ्गीक्रियते।'**[13]

ननु मैत्रवृत्तित्त्वाभाववती चैत्रनिष्ठा कृतिरिति बोधाङ्गीकारे चैत्रमैत्रोभयकर्तृकपाकस्थलेऽपि मैत्रेण न पच्यत इति प्रयोगापत्ति:, मैत्रवृत्तित्वाभावस्य चैत्रनिष्ठकृतावबाधितत्त्वात् इति चेदत्रोच्यते नह्युक्तस्थले कृतित्वसामानाधिकरण्येन मैत्रवृत्तित्वाभावो नजा बोध्यतेऽपितु वर्तमाना या पाकानुकूला कृति: तत्त्वावच्छेदेन मैत्रवृत्तित्वाभावो नजा बोध्यते, तथा चोक्तस्थले वर्तमानपाकानुकूलकृतित्वसामानाधिकरण्येन मैत्रनिरूपितवृत्तित्वाभावस्य सत्त्वेऽपि वर्तमानपाकानुकूलकृतित्वावच्छेदेन मैत्रवृत्तित्वाभावो नास्ति। तादृशकृतित्ववत्यां मैत्रवृत्तिकृतौ मैत्रवृत्तित्वस्यैव सत्वेन तदभावासम्भवात् न 'मैत्रेण न पच्यते' इति प्रयोगस्यापत्ति:। अत्र कृतौ वर्तमानत्वविशेषणानुपादाने वर्तमानकालिकपाकानुकूलकृतेरभावेऽपि 'चैत्रेण न पच्यत' इति प्रयोगस्यानुपपत्ति: स्यात्, अतीतानागतपाककृत्यो: चैत्रवृत्तित्वसत्त्वेन पाकानुकूलवृत्तित्त्वावच्छेदेन चैत्रवृत्तित्वाभावस्यासत्वात्। कृतौ पाकानुकूलत्वविशेषणानुपादाने वर्तमानकृतित्वावच्छेदेन मैत्रवृत्तित्वाभावो 'मैत्रेण न पच्यते' इति वाक्यात् बोध्यते इत्यायाति। तथा सति यदा मैत्र: पाकं न करोति अन्यत् किञ्चित् करोति स्नानादिकं तदा 'मैत्रेण न पच्यते' इति इष्ट: प्रयोगो न स्यात् वर्तमानत्ववत्यां स्नानादिक्रियान्तरानुकूलायां कृतौ मैत्रवृत्तित्वस्यैव सत्त्वेन तदभावस्य बाधात्। पाकानुकूलत्वविशेषणोपादाने तु वर्तमानपाकानुकूलाकृतिरन्यदीया कृतिरेव तत्र मैत्रवृत्तित्त्वाभावस्य सत्वात् तदा 'मैत्रेण न पच्यते' इति प्रयोगस्योपपत्ति:।

ननु कर्माख्यातस्थले कालक्रियो भयविशिष्टकृत्तित्वाच्छेदेन मैत्रादिवृत्तित्त्वाभावो नजा प्रत्यायितुं न शक्यते। यद्यपि तादृशस्थले आख्यातेनोपस्थितस्य कालस्य कृतिविशेषणतयैव भानात् कालविशिष्ट-कृतित्वावच्छेदेन तृतीयार्थस्याधेयत्वस्याभावो नजा बोधयितुं शक्यते किन्तु कर्माख्यातस्थले कृते: धात्वर्थक्रियायां जन्यतासम्बन्धेन विशेषणतया क्रियैव कृतिविशिष्टा भवति न तु कृति: क्रियाविशिष्टा। तथा च वर्तमानकालपाकक्रियोभयविशिष्टकृतित्त्वावच्छेदेन मैत्रवृत्तित्त्वाभावबोध: कथं भवितुमर्हति इति चेदुच्यते पाकानुकूलवर्तमानकृतित्वस्य तृतीयार्थान्वयितावच्छेदकत्वाभावेऽपि वर्तमानकृतित्वस्यैव कर्माख्यातस्थले तृतीयार्थाधेयत्त्वान्वयितावच्छेदकत्वेऽपि च नञ्समभिव्याहारे सति 'मैत्रेण न पच्यते' इत्यत्र मैत्रवृत्तित्वप्रतियोगिकस्य नञर्थस्याभावस्य आख्यातार्थकृतौ वर्तमानपाकानुकूलकृतित्वव्यापकस्वरूप-सम्बन्धेनान्वयस्वीकारात् न काचिदनुपपत्ति:।

ननु कर्माख्यातस्थले वर्तमानपाकानुकूलकृतित्वस्य नान्वयितावच्छेदकत्वं येन तद्व्यापकत्वं अभावसम्बन्धे भासिष्यतेऽपितु केवलकृतित्वस्यैवान्वयितावच्छेदकत्वम्। किञ्चान्वयितावच्छेदकव्यापकत्वं विशेषणसम्बन्धे भासते इति नियमस्वीकारे 'शरदि पुष्यन्ति सप्तच्छदा:' इति प्रयोगानापत्ति:। अयम्भाव: सप्तच्छदनामकपुष्पाणि शरत्काले विकसन्ति, अथवा सप्तच्छदो वृक्षविशेष: तत्र शरत्काले पुष्पोत्पत्तिर्जायते, सप्तच्छदनामकवृक्षा: शरत्कालवृत्तिपुष्पोत्पत्त्याश्रया इत्यर्थ:।'शरदि पुष्यन्ति सप्तच्छदा:' इत्यत्र पुष्यधातो: पुष्पोत्पत्तिरर्थ: सप्तम्यन्तार्थशरत्कालवृत्तित्वं धात्वर्थपुष्पोत्पत्तावन्वेति। एवञ्च शरद्वृत्तित्वस्यान्वयिनी पुष्पोत्पत्तिरेव न तु सप्तच्छदपुष्पोत्पत्ति:। अत: पुष्पोत्पत्तित्त्वमेवान्वयितावच्छेदकम् अत: सप्तच्छदपुष्पोत्पत्तित्वावच्छेदेनान्वयो न सम्भवति। नन्वत्र पुष्पोपत्तित्वस्यान्वयितावच्छेदकत्वे तद्व्यापकत्वं शरदवृत्तित्त्वे वक्तव्यं तच्च न सम्भवति पुष्पोत्पत्तित्वस्य वसन्तादिकालिकपुष्पोत्पत्तावपि सत्त्वेन तत्र शरद्वृत्तित्वस्याभावात्

यदि च अन्वयितावच्छेदकपुष्पोत्पत्तित्वसामा–नाधिकरण्येन शरद्वृत्तित्वस्यान्वयस्तदा शरदि पुष्यन्ति सप्तच्छदा: शरदि पुष्पन्ति चम्पका इत्यविशेषेण प्रयोगापत्ति:। न चेष्टापत्तिर्वक्तुं शक्या। चम्पकस्य कालान्तरे शरदि च विकसितत्वात् 'शरदि पुष्यन्ति चम्पका' इति प्रयोगस्यानिष्टत्वात्।

यदि च 'शरदि पुष्पन्ति सप्तच्छदा:' इत्यत्र शरत्कालवृत्तित्वं न आख्यातार्थे आश्रयत्वे धात्वर्थे पुष्पोत्पत्तौ वाऽन्वेति अपितु सप्तच्छदपदार्थे एव विशेषणतया भासते तथा च 'शरत्कालवर्तिन: सप्तच्छदा: पुष्पोत्पत्याश्रया' इति बोध:। अत एवोक्तवाक्ये 'शरदि' इत्यत्र या सप्तमी सा न कारकविभक्ति: तस्या: धात्वर्थे आख्यातार्थे वाऽन्वयाभावात्। 'शरदि पुष्पन्ति सपतच्छदा:' 'शरदि पुष्यन्ति चम्पका:' इत्यनयो: अविशेषेण प्रयोगापत्तिवारणन्तु इत्थं बोध्यम्–'शरदि पुष्पन्ति सप्तच्छदा:' इत्यत्र क्रियाया: धातुत एव लाभात् निमित्तत्वे सति कर्तृत्वमाख्यातार्थ:। धात्वर्थस्य पुष्पोत्पत्ते: निरूपितत्वसम्बन्धेन निमित्तत्वेऽनुकूलत्वसम्बन्धेन कृतौ च अन्वय:। तथा च शरत्सम्बन्धविशिष्टे सप्तच्छदे पुष्पोत्पत्ति–निमित्तत्वस्य अन्वये तद्विशिष्टे भासमानं यत् तत्रापि तत् सामानाधिकरण्येन भासते इति रीत्या धर्मिपारतन्त्र्येण शरत्सम्बन्धेऽपि पुष्पोत्त्पत्तिनिमित्तत्वमन्वेति इत्यतो नोक्तप्रयोगयोरविशेषापत्ति:। शरत्सम्बन्धे चम्पकोत्पत्तिनिमित्तत्वाभावात्।

यद्वा क्रियानिमित्तत्वस्य आख्यातार्थत्वानङ्गीकारेऽपि शरत्सम्बन्धविशिष्टसप्तच्छदमुद्दिश्य पुष्पोत्पत्तेर्विधानात् उद्देश्यविधेयभावस्थले उद्देश्यतावच्छेदकप्रयोज्यत्त्वं विधेये भासत इति व्युत्पत्ते: शरत्सम्बन्धप्रयोज्यत्वं पुष्पोत्पत्तौ प्रतीयते। तच्च शरत्सम्बन्धप्रयोज्यत्त्वं शरत्सम्बन्धनिमित्तकत्वरूपं सप्तच्छदपुष्पोत्पत्तावेव वर्तते, न तु चम्पकपुष्पोत्पत्तौ। कालान्तरेऽपि चम्पकपुष्पोत्पत्तेर्जायमानत्त्वेनान्यथासिद्धत्वात्। अत: शरदि पुष्पन्ति चम्पका इति प्रयोगस्य नापत्ति:। उद्देश्यविधेयभावस्थले उद्देश्यतावच्छेदकप्रयोज्यत्वं विधेये भासत इति स्वीकारादेव 'शीतलं सरोऽवगाढवतो निदाघदु:खं व्यपैति' इत्यत्र शीतलसरोऽवगाहनप्रयोज्यत्वस्य निदाघदु:खनिवृत्तावगम्यते।

यद्यपि उद्देश्यतावच्छेदकावच्छिन्नत्वं विशेषणसम्बन्धे भासते इति नियमाङ्गीकारे प्रसक्तदोषाणां वारणं सम्भवति तथाप्युक्तनियमे प्रमाणाभावादुक्तनियमो नाङ्गीकार्य:, न चोक्तनियमानङ्गीकारे दीधितग्रन्थविरोध: इति वाच्यम्, तथाहि दीधितिकृता 'इह भवने मैत्रेण पक्ष्यते तेमनम्' इत्यत्र एवकारेण एतद्भवनाधिकरणतेमनपाकत्वावच्छिन्ने मैत्रसमवेतभविष्यत्कृतिविषयत्वं मैत्रान्यसमवेतभविष्यत्कृतिविषयत्वं मैत्रान्यसमवेतभविष्यत्कृतिविषयत्वाभावश्च बोधनीय:। तच्च न सम्भवति एतद्भवनाधिकरणतेमनपाकत्वेन रूपेण पाकस्य धातुना अनुपस्थित्या तस्यान्वयितावच्छेदकत्वाभावेन तदवच्छेदेन मैत्रान्यसमवेतकृतिविषयत्वाभावस्य बोधयितुमशक्यत्वात् इति उक्तम्। इत्थञ्चासम्भवोक्ति: अन्वयितावच्छेदकावच्छिन्नत्वमेव विशेषणसम्बन्धे भासत इति नियममङ्गीकृत्यैव दीधितिकृतोक्तम्। अन्यथा एतद्भवनाधिकरणकतेमनपाकत्वेन रूपेण पाकस्यानुपस्थितावपि धात्वर्थे पाके मैत्रान्यसमवेतकृतिविषयत्वावच्छिन्नत्वविशिष्टस्वरूपसम्बन्धेन अन्वयसम्भवेन विवक्षितलाभात् दीधितिकृतामसम्भवोक्तिर्न सङ्गच्छते।

अत्रोच्यते–यथा 'पर्वतो वह्निमान्' इत्यत्र पर्वतत्वावच्छेदेन वह्निविशिष्टत्वावगाहिबुद्धौ धर्मिणि पर्वते विशेषणतया भासमानं पर्वतत्वं विशेषणे वह्नौ अवच्छिन्नत्त्वसम्बन्धेन भासत इति 'पर्वत: पर्वतत्वावच्छिन्नवह्निमान्' इत्याकारकबोधो भवति। तद्वत् प्रकृते पाकत्वावच्छेदेन मैत्रान्यसमवेतकृतिविषयत्वाभावविशिष्टबुद्धौ धर्मिणि पाके विशेषणतापन्नं पाकत्वं विशेषणनञर्थाभावे अवच्छिन्नत्वसम्बन्धेन भासितुमर्हति। एतद्भानाधिकरणकतेमनपाकत्वं तु धर्मिणि विशेषणतानापन्नम्। तत् कथमवच्छिन्नत्त्वसम्बन्धेन नञर्थे भासते इत्याशयेन दीधितिकृतां पूर्वोक्तासम्भवोक्ति:, अतो नियमोऽयमप्रामाणिक एव। तदुक्तं व्युत्पत्तिवादे–

'अवच्छेदकावच्छेदेन विशिष्टबुद्धौ धर्मिणि विशेषणतया भासमानमेव रूपं विशेषणेऽवच्छिन्नत्वसम्बन्धेन विशेषणम् इत्याशयेन तेषां तदभिधानात्।'[4]

ननु अवच्छेदकावच्छेदेन विशिष्टबुद्धौ विशेषणे अवच्छेदकावच्छिन्नत्वस्य संसर्गतया भानं न सम्भवति, 'घटो द्रव्यम्' इत्याद्याकारिकायां घटत्वावच्छेदेन द्रव्यत्वविशिष्टत्वावगाहिविशिष्टबुद्धौ विशेषणीभूतस्य द्रव्यत्वस्य स्वरूपत एव भानेन तत्र घटत्वावच्छिन्नत्वस्य भानं न सम्भवति अन्वयितावच्छेदकरूपेण द्रव्यत्वस्यानुपस्थितत्वात् इति चेदत्रोच्यते घटो द्रव्यमित्याकारकशाब्दबोधे घटेऽभेदसम्बन्धेन द्रव्यं विशेषणतया भासते। द्रव्यस्य च द्रव्यत्वेनोपस्थितत्वात् द्रव्ये घटत्त्वावच्छिन्नत्वभानस्य सम्भवात्। ननु घटविशेष्यकद्रव्यत्वप्रकारकप्रत्यक्षे कथं विशेषणे द्रव्यत्वे घटत्वावच्छिन्नत्वस्य भानं सम्भवति, द्रव्यत्वस्य स्वरूपत एव प्रकारत्वात् इति चेदत्रोच्यते घटविशेष्यकद्रव्यत्वादिप्रकारकप्रत्यक्षे घटत्त्वादिविशिष्टे अवच्छेदकावच्छेदेन भानानङ्गीकारेऽपि न काचित् क्षति:। तथा च मैत्रेण न पच्यत इत्यादौ पाककृतित्वस्यान्वयितानवच्छेदकत्वेऽपि अर्थलभ्यतादृशधर्मावच्छिन्नत्त्वस्य संसर्गांशे भानं निराबाधमेव। एवञ्च चैत्रेण न पच्यत

इत्यादौ तृतीयाया: कृत्यर्थकत्वे जन्यतासंबन्धावच्छिन्नप्रतियोगिताक: चैत्रवृत्तिकृत्यभाव: पाके बोधयितुं न शक्यते। वृत्यनियामकसम्बन्धस्या-भावप्रतियोगितानवच्छेदकत्त्वादिति आधेयत्वं तृतीयार्थ इति प्रधानपूर्वपक्ष: स्थित:।

अत्रोच्यते- मैत्रेण न पच्यते इत्यादौ तृतीयाया आधेयत्वमर्थ:। तत्र चाधेयतायां निरूपितत्त्वसम्बन्धेन मैत्रस्यान्वय:। नञर्थेऽभावे च आधेयत्त्वस्य आश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन अन्वय:। तस्याख्यातार्थकृतावन्वय:। आख्यातार्थकृते: जन्यतासम्बन्धेन धात्वर्थे पाकेऽन्वय:। पाकस्याख्यातार्थकर्मत्त्वेऽन्वय: इति रीत्या चैत्रनिरूपिताधेयत्वाभाववत् कृतिजन्यपाककर्मेति बोधवर्णनसम्भवेऽपि 'चैत्रेण न पक्व' इति कर्मणि भावे वा क्तप्रत्ययस्थले तथा बोधो न सम्भवति। तत्र कृतिवाचकशब्दस्याभावात्। पक्वेत्यत्र क्तप्रत्ययस्य कर्मार्थकत्वेन कृत्यर्थकत्त्वाभावात्। अतस्तृतीयायास्तत्र कृतिजन्यत्वमर्थ:। कृतौ चाधेयतासम्बन्धेन मैत्रस्यान्वय:। जन्यत्वस्य च नञर्थेऽभावे आश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वय:। तथा च मैत्रवृत्तिकृतिजन्यत्वाभाववत्पाककर्मेति बोधोऽङ्गीकार्य:। अत: कृतिजन्यत्वं तृतीयार्थ इति स्वीकारे न कोऽपि दोष इति भाव:।

नञ्समभिव्याहारस्थले आख्यातार्थस्य वर्तमानत्वस्य नञर्थाभावेऽन्वयो भवति। तथा च यदा मैत्र: सुप्त: तदा मैत्रेण पक्ष्यते इति प्रयोगपत्ति: नास्ति। यदि हि तत्राख्यातार्थस्य वर्तमानत्वस्य कृतावन्वयोऽभ्युपेयेत, तथा सति मैत्रवृत्तिवर्तमानकृतेरप्रसिद्ध्या मैत्रवृत्तिभविष्यत्कृतिजन्यत्वस्य पाके सत्वेन मैत्रेण पक्ष्यत इति प्रयोगापत्ति: स्यात्, वर्तमानत्वस्य नञर्थाभावेऽन्वयस्वीकारे तु वर्तमानमैत्रवृत्ति-कृतिजन्यत्वाभाववत्पाककर्मेति बोध: वर्तमानत्वस्य नञ्समभिव्याहारस्थले धात्वर्थे कृतौ वाऽन्वये विनष्टघटं न पश्यतीत्यत्र विनष्टघटकर्मकवर्तमानदर्शनस्य विनष्टघटकर्मक-दर्शनानुकूलवर्तमानकृतेर्वा अप्रसिद्ध्या तदभावबोधानुपपत्ति:। तस्मात् नञर्थाभावे एव वर्तमानत्वस्यान्वय: कर्तव्य:। तथा च विनष्टघटं न पश्यतीत्यादित: वर्तमानकालिको यो विनष्टघटकर्मकदर्शनाभाव: तदाश्रय इति बोधो जायते।

नन्वेवं तृतीयाया: कृतिजन्यत्वार्थकत्वे नजोऽभावार्थकत्वे नजा कृतिजन्यत्वाभाव: पाके बोध्यत इति स्वीकारे च मैत्रवृत्तिकृतिजन्यपाकदशायां चैत्रकर्तृकपाके मैत्रवृत्तिकृतिजन्यत्वाभावस्य सत्वात् मैत्रेण न पच्यत इति प्रयोगापत्ति: स्यात् यद्युच्यते पाकत्वावच्छेदेनैव मैत्रवृत्तिकृतिजन्यत्वाभाव: 'मैत्रेण न पच्यते' इति वाक्येन बोध्यते न तु पाकत्वसामानाधिकरण्येन तथा च नोक्तापत्ति: सम्भवति तदा उक्तापत्तेरभावेऽपि 'मैत्रेण ओदनं पच्यते न तु तेमनं' तदा मैत्रेण न पच्यते तेमनमिति प्रयोगानुपपत्ति:, ओदनपाके मैत्रवृत्तिकृतिजन्यत्त्वसत्त्वेन पाकत्वावच्छेदेन मैत्रवृत्तिकृतिजन्यत्वा-भावस्य बाधात् इति चेदुच्यते तत्र तेमनपाकत्त्वावच्छेदेन मैत्रवृत्तिकृतिजन्यत्वाभावबोधाङ्गीकारान्नानुपपत्ति:, तदा ओदनपाके मैत्रवृत्तिकृति- जन्यत्त्वसत्त्वेऽपि तेमनपाके तदभावस्य सत्त्वात्। विशेषणसम्बन्धे अन्वयितावच्छेदकावच्छिन्नत्वमेव भासते इति नियमाभावात् नञर्थाभावसम्बन्धे तेमनपाकत्वावच्छिन्नत्वं भासते। तथा चेयमेवरीति: कृतिजन्यत्त्वस्य तृतीयार्थत्वपक्षेऽनुसरणीया।

घटेन न पच्यत इत्यादय: प्रयोगा आकाशं न पश्यतीतिवत् उपपादनीया:। अर्थात् यथा- आकाशं न पश्यतीत्यत्र वृत्यनियामकनिरूपितत्व-सम्बन्धस्यापि अभावीयप्रतियोगितावच्छेदकतत्त्वमुपगम्य निकपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकाशाभाववद्विषयिताश्रयदर्शनविषयको बोध उपपाद्यते तद्वत् 'घटेन न पच्यत' इत्यत्रापि आधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताकघटाभाववत्कृतिजन्यपाकविषयकबोधोपगम: चैत्रेण ज्ञायत इष्यते गम्यत इत्यादौ तृतीयाविभक्त्यर्थ आश्रयत्वम्। तस्मिंश्च विभक्त्यर्थे आश्रयत्वे आधेयत्वसम्बन्धेनप्रकृत्यर्थस्यान्वय:, आश्रयत्वस्य च निरूपकत्वसम्बन्धेन धात्वर्थज्ञानादावन्वय:, तथा च चैत्रवृत्ति: या आश्रयता तन्निरूपकं ज्ञानम् इति बोध: पर्यवस्यति। यदि तु निरूपकत्वस्य वृत्यनियामकतया नञ्समभिव्याहृतस्थले निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावबोध: न सम्भवतीति उच्यते तथा सति तृतीयाया: तादृशस्थले आधेयत्वरूप एवार्थ: स्वीक्रियते। तत्र चाधेयत्वे प्रकृत्यर्थस्य चैत्रस्य निरूपितत्त्वसम्बन्धेनान्वय: आधेयत्वस्य च आश्रयत्वसम्बन्धेन धात्वर्थज्ञानादावन्वय:। एवञ्च चैत्रनिरूपिताधेयत्त्वाश्रय: ज्ञानमिति बोधो जायते। आश्रयत्वस्य वृत्तिनियामकत्वात् तस्य प्रतियोगितावच्छेदकत्त्वं सम्भवतीति आधेयत्त्वस्य तृतीयार्थत्वे न कोऽपि दोष:। 'नश्यते घटेन' इत्यादावपि प्रतियोगित्वे अनुयोगित्वे वा तृतीयाया: लक्षणा। तदुक्तं व्युत्पत्तिवादे-

'एवं चैत्रेण ज्ञायते, इष्यते, गम्यत इत्यादावाश्रयत्त्वरूपे कर्तृत्वे आधेयत्वरूपे कर्तृमत्त्वे वा, नश्यते घटेनेत्यादौ प्रतियोगित्वरूपे कर्तृत्वेऽनुयोगित्त्वरूपे कर्तृमत्वे वा लक्षणा।'[5]

व्युत्पत्तिवादे स्वातन्त्र्यपदार्थविचार:

चैत्रः कर्ता, मैत्रः कर्ता इत्यादिस्थलेषु यद्यपि कर्तृपदं यत्नाश्रयपरं तथापि 'कर्तृकरणयोस्तृतीया' इत्यादिसूत्रस्थं कर्तृपदं पारिभाषिकस्वातन्त्र्यपरम्। तत्र च '**स्वतन्त्रः कर्ते**'[6] ति सूत्रमेव मानम्, अन्यथा सूत्रप्रणयनमेव व्यर्थं स्यात्। किन्तत् स्वातन्त्र्यमिति चेदत्र ग्रन्थकाराः-

''स्वतन्त्रत्वं च कारकान्तरव्यापारानधीनव्यापारवत्त्वे सति कारकत्वम्।''[7]

तथा च कारकान्तव्यापारानधीनव्यापाराश्रयत्वे सति कारकत्वं स्वातन्त्र्यम्, अत्र कारकत्वमात्रोच्यमाने 'चैत्रस्तण्डुलं पचति' इत्यादौ क्रियाजनकत्त्वरूपस्य क्रियान्वयित्वरूपस्य वा कारकत्वस्य तण्डुलेऽपि सत्त्वात् तस्यापि कर्तृत्त्वं स्यादतस्तद्वारणायकारकान्तरव्यापारानधीनव्यापाराश्रयत्त्वविशेषणमपि दातव्यं, तदुपादाने तु तण्डुलस्य चैत्ररूपकारकान्तरव्यापाराधीनव्यापारवत्त्वान्न कर्तृत्वम्। कारकत्त्वमित्यनुच्यमाने उदासीने अतिव्याप्तिः स्यादतस्तदुपादानम्।

एवञ्च यद्यपि 'काष्ठं पचति' इत्यादौ काष्ठादेः यद्यपि पुरुषव्यापाराधीनव्यापारवत्वं वर्तते तथापि पुरुषव्यापारानधीनपाकानुकूलव्यापारवत्त्वरूपस्वातन्त्र्यविवक्षया काष्ठादेरपि कर्तृत्त्वं सिद्ध्यति। यद्यपि काष्ठादावचेतने वास्तविकं स्वाततन्त्य नास्ति, तथापि समभिव्याहृतक्रियाकारकान्तरव्यापारानधीनतत्क्रियानुकूलव्यापारस्यैव तत्क्रियावाचकपदसमभिव्याहृतप्रत्ययार्थत्वात्। 'काष्ठं पचति' 'काष्ठेन पच्यते' इत्यादौ च समभिव्याहृतपाकक्रियाकारकान्तरं न चैत्रादिकम्। यद्यपि काष्ठनिष्ठक्रियायाः जनकश्चैत्रोऽपि तथापि तद्बोधकपदस्य वाक्यघटकत्वाभावान्न दोषः। उक्तञ्च तत्रैवाचार्यैः-'**पुरुषव्यापारानधीनक्रियानुकूलव्यापारवतामेव काष्ठादीनामन्यव्यापारानधीनक्रियानुकूलव्यापारवत्त्वरूपस्वातन्त्र्यस्य काष्ठं पचतीत्यादौ विवक्षया काष्ठादेः कर्तृत्वम्।**'[8]

व्यापारवत्त्वे सति कारकतत्त्वमित्येवोच्यमाने 'चैत्रः स्थाल्यां काष्ठैः पचतीत्त्यादौ' स्थालीकाष्ठादीनामपि व्यापारवत्त्वात् 'चैत्रः स्थाली काष्ठानि पचन्ति' इति प्रयोगापत्तिः स्यादतः समभिव्याहृतक्रियाकारकान्तरव्यापारानधीनत्त्वं व्यापारविशेषणं वक्तव्यम्। तथा च 'चैत्रः स्थाल्यां काष्ठैः पचति' इत्यत्र या क्रिया पाकक्रिया तदीयं यत् समभिव्याहृतं स्थाल्यादिभिन्नं कारकं चैत्रः तदीयव्यापाराधीनव्यापारवत्त्वात् स्थाल्यादीनां न कर्तृत्वम्। एवञ्च न तादृशप्रयोगापत्तिः। नन्वेतादृशस्वातन्त्र्यविवक्षणे यत्र समभिव्याहृतं कारकान्तरमेव नास्ति 'चैत्रः पचति' 'काष्ठं पचति' इत्त्यादौ तत्र तद्घटितस्वातन्त्र्याभावात् कथं चैत्रादेः कर्तृत्त्वप्रतीतिः स्यादिति चेदुच्यते तादृशस्थले अनधीनान्तविशेषणं न प्रतीयते अपितु व्यापाराश्रयत्वमात्रं प्रतीयते, व्यापाराश्रयत्त्वमात्रप्रतीतिनिर्वाहस्तु स्वतन्त्रशक्त्यन्तरकल्पनयैव कर्तव्यः। तथा च तत्र विशेष्यांशे एव शक्तिः अतिरिक्ता स्वीक्रियते। उक्तञ्च ग्रन्यकृता-

'तन्निर्वाहश्च तत्र लकारादेः स्वतन्त्रशक्त्यन्तरकल्पनात्। विशिष्टविषयकशक्त्या विशेषणांशाविषयकबोधाजननात्।'[9]

अयम्भावः- विशिष्टविषयकशक्त्या विशेषणांशाविषयकबोधो न जायते। यदि च विशिष्टविषयकशक्त्याऽपि विशेषणांशाविषयकबोधो जायेत तथा सति मूषिकादेरपि पशुपदशक्यत्वापत्तिः स्यात्। पशुपदस्य लोववल्लाङ्गूलावच्छिन्ने शक्तत्वेऽपि मूषिके लोम्नोऽभावेऽपि लाङ्गूलस्य सत्त्वात् न मूषिकस्यापि पशुपदवायत्त्वापत्तिः स्यात्।

ननु समभिव्याहृतक्रियाकारकान्तरव्यापारानधीनव्यापारानाश्रयत्वे सति कारकत्वं यदि स्वातन्त्र्यं तर्हि तादृशस्वातन्त्र्यस्य 'चैत्रः पचति' 'स्थाली पचति' इत्यादिस्थलेषु चैत्रस्थाल्यादौ सत्त्वेऽपि 'चैत्रः मैत्रेण पाचयति' इत्यादौ प्रयोजककर्तृसमभिव्याहारस्थले मैत्रादिषु तादृशस्वातन्त्र्यस्याभावात् मैत्रादेस्तादृश-स्वातन्त्र्यप्रयुक्तकर्तृसंज्ञाया अभावेन पाकक्रियान्वयिकर्तृत्त्वार्थे तृतीयाया अनुपपत्तिः स्यादिति चेदत्र श्रीमद्गदाधरभट्टाचार्याः-

''तत्र ण्यन्तप्रतिपाद्यपाचनादिक्रियायामेव हेतोः कारकता स्वतन्त्रकर्तृव्यापारस्य पच्यादिक्रियायां कारकारन्तरव्यापारानधीनत्वात्।''[10]

अयम्भावः 'चैत्रो मैत्रेण पाचयति' इत्यादिण्यन्तधातुसमभिव्याहारस्थले चैत्रस्य ण्यन्तपाचिधातूपस्थाप्यक्रियां प्रत्येव कर्तृत्वं मैत्रस्य तु णिच्प्रकृतिभूतपच्धातुनिरूपितकर्तृत्वं वर्तते। मैत्रनिष्ठो यः पाकानुकूलव्यापारः स च व्यापारः पाकक्रियाकारकान्तरव्यापारानधीन एव, तथा च पाकक्रिया- कारकान्तरानधीनव्यापारवत्त्वात् मैत्रस्य स्वातन्त्र्यप्रयुक्तं कर्तृत्वमक्षतमेव। तथा च 'चैत्रो मैत्रेण पाचयति' इत्यत्र 'चैत्रवृत्तिव्यापारजन्यो यः पाकः तदनुकूलव्यापाराश्रयो मैत्रः' इति बोधो जायते। एवञ्च मैत्रस्य स्वातन्त्र्यप्रयुक्तकर्तृत्त्वात् कर्नर्थे न तृतीयानुपपत्तिः।

ननु पचन्तं मैत्रं यदा चैत्रः प्रेरयति तदा 'चैत्रो मैत्रेण पाचयति' इति प्रयोगो जायते। एवञ्च चैत्रस्य प्रेरणं विना मैत्रस्य पाकानुकूलव्यापाराजननात् प्रेरयितृव्यापारस्यापि पाकानुकूलव्यापारं प्रति कारणत्त्वं वाच्यं, तथा च मैत्रनिष्ठपाकानुकूलव्यापारस्य चैत्रव्यापाराधीनत्त्वात्

ISSN 2348-7828
कथं मैत्रस्य स्वातन्त्र्यम् इति चेत् अत्रोच्यते प्रेरयितृव्यापारस्यान्यथासिद्धत्त्वात् न पाकानुकूलत्वं तस्य। तथा चसमभिव्याहृतक्रिया-कारकान्तरव्यापारपदेन प्रेरयितृव्यापारो धर्तुं न शक्यते। यथा पाकार्थं तण्डुलक्रयणादिकं न पाकजनकम्भवति अवश्यक्लृप्तै: अधिश्रयणादिभिरेव पाकोत्पत्तौ तद्भिन्नत्वेन तण्डुलक्रयणादेरन्यथासिद्धत्त्वात्, तस्य च तण्डुलक्रयणादे: पाकोपयोगित्वं तु परम्परया स्वीक्रियत एव। एवमेव चैत्रनिष्ठव्यापारोपि पाकोपयोगी भवति न तु पाकजनक:, अत: पच्चातूपस्थाप्यक्रियाकारकतत्त्वं चैत्रस्य नास्तीति समभिव्याहृततत्क्रिया-कारकान्तरपदेन चैत्रस्य धर्तुमशक्यत्त्वात् तादृशकारकान्तरव्यापारानधीनव्यापारवत्त्वस्य मैत्रनिष्ठतया स्वातन्त्र्ये न किञ्चित् प्रतिबन्धकम्। उक्तञ्चाचार्यै:-'**स्वतन्त्रं प्रयुञ्जानस्य पुंसो व्यापारस्तण्डुलक्रयणादिवत् पाकादावन्यथासिद्धतया न कारणमिति पाकादिप्रयोजकव्यापारवत्त्वेऽपि तस्य तत्क्रियाकारकतत्त्वा-भावात्। अत एव चैत्रो मैत्रेण पाचयतीत्यादौ चैत्र: पचतीति न प्रयोग:।**''[11]

ननु 'चैत्र: मैत्रेण पाचयति' इत्यत्र मैत्रनिष्ठव्यापारस्य चैत्रनिष्ठव्यापाराधीनत्त्वेऽपि तत्क्रियाकारकान्तरव्यापारानधीनत्वात् मैत्रस्य स्वातन्त्र्योपपत्तावपि मैत्रपदोत्तरं तृतीया न स्यात् अनभिहिते कर्तृत्त्व एव तृतीयाया: विधानात्, कर्तृत्वस्य च णिच्छ्रुत्ययेनाभिधानात् अनभिहितत्त्वाभावात् तृतीयानुपपत्तिरिति चेदत्रोच्यते-पाचयतीत्यत्र णिच: कर्तृत्त्वनिर्वाहकव्यापारो नार्थ: येन णिजर्थघटकतया कर्तृत्वस्य णिचा अभिधानं स्यादपितु व्यापारमात्रं णिजर्थ: तत्र न व्यापारे धात्वर्थपाकस्य कर्तृत्त्वनिर्वाहकत्त्वसम्बन्धेनान्वय:। 'अनन्यलभ्यो हि शब्दार्थ' इति न्यायेन पाकस्य धातुना एव लाभात् व्यापारमात्रमेव णिचा अभिधीयते, कर्तृत्त्वनिर्वाहकत्वरूप: सम्बन्धश्च आकाङ्क्षाभास्य एव। अत: शक्यतावच्छेदकतयापि णिचा स्वतन्त्रकर्तृत्त्वेनाभिधीयत इति अनभिधानात् मैत्रपदोत्तरं तृतीयोपपद्यत एव। तदुक्तमाचार्यै:-

'कर्तृत्वनिर्वाहकत्वसम्बन्धेन पाकाद्यन्वयिनो हेतुकर्तृव्यापारस्य णिजर्थत्त्वेन स्वतन्त्रकर्तृत्त्वस्य णिचाऽनभिधानात्।'[12]

यदि च कर्तृत्त्वनिर्वाहकव्यापारस्यैव णिजर्थत्त्वं स्वीक्रियते तथा सत्यपि अनभिहिते कर्तरि तृतीयाया: विधानात्, आश्रयविशिष्टस्य कर्तृत्त्वस्य णिचाऽनभिधानादपि तृतीयोपपादयितुं शक्यते। तथा चोक्तं तत्रैवाचार्यै:-

'कर्तृत्त्वरूपफलावच्छिन्नस्य तादृशव्यापारस्य णिजर्थतामतेऽपि आश्रयोपरक्तस्य कर्तृत्त्वस्यान्यतो भानानिर्वाहेण कर्तुरनभिधानात् तृतीयोपपत्ति:।'[13]

नन्वेवं सति 'चैत्र: पचति' इत्यत्र कथं न तृतीया? कृतिरूपस्य कर्तृत्त्वस्य तिङाभिधानेऽपि आश्रयविशिष्टस्य तस्य तिङानभिधानात् चैत्रपदोत्तरं तृतीया स्यादिति चेदुच्यते अनभिहिते इत्यत्र अभिधानपदस्य शक्त्या बोधनमिति नार्थ: येन चैत्र: पचति। इत्यत्र आख्यातेन शक्त्या कृतेरेव बोधनेन कृत्याश्रयस्य कर्तु: शक्त्या बोधनाभावेन अनभिधानसद्भावात् चैत्रपदोत्तरं तृतीयापत्ति: स्यात्, अपितु अभिधानमित्यस्य बोधनमात्रमर्थ:, तथा च 'अनभिहिते कर्तरि' इत्त्यस्य कृत्त्याश्रयस्य कर्तु: आख्यातेनबोधनाभावे तृतीया भवतीति सूत्रार्थ:। चैत्र: पचतीत्यत्र तिङ: कृत्यर्थकत्त्वेऽपि कृतेराश्रयतासम्बन्धेन चैत्रपदार्थेऽन्वयेन आकाङ्क्षाबलाद् आकाङ्क्षाघटकतया तिङ: कृत्याश्रयरूपकर्तृबोधहेतुत्त्वमस्तीति कर्तृबोधनाभावरूपानभिधानस्याभावात् न चैत्रपदोत्तरं तृतीयाया आपत्ति: सम्भवति।

नन्वेवमपि आख्यातेन कृतेर्मुख्यविशेष्यतयोपस्थानस्थले 'चैत्रेण पचति' इति प्रयोगापत्ति: स्यात् आश्रयविशिष्टस्यानभिधानात् इति चेदत्रोच्यते, आश्रयातिरिक्तांशेऽविशेषणतया कृतिबोधनमेव कर्त्रभिधानं नाम, इत्युक्ते यदा आख्यातेन आश्रये विशेषणतया कृतिरुपस्थाप्यते तदा कर्ताभिहितो भवति आश्रयातिरिक्ते विशेषणतया यदा कृति: बोध्यते तदा तु कर्तुरनभिधानमेव। तथा च 'चैत्र: पचति' इत्यादौ कृते: मुख्यविशेष्यत्त्वविवक्षायामा-श्रयेऽपि तस्या अविशेषणत्त्वात् आश्रयातिरिक्तेऽपि विशेषणत्वाभावात् आश्रयातिरिक्तविशेषणत्वाभावस्य सत्त्वात् आश्रयातिरिक्त: अविशेषणत्वेन कृतिबोधनरूपस्य कृत्यभिधान-स्यैव सत्त्वात् तदभावरूपमनभिधानं नास्तीति चैत्रपदोत्तरं न तृतीयाविभक्त्यापत्ति:। उक्तञ्चाचार्यै:- '**आश्रयातिरिक्तांशेऽविशेषणतया कृतिबोधनस्यैव कर्त्रभिधानरूपत्वात्।**'[14]

ननु 'कर्तृकरणयोस्तृतीया' इत्यादिसूत्रेषु कर्तृपदं 'स्वतन्त्र: कर्ता' इत्त्यनुशासनात् स्वतन्त्रपरम्। स्वातन्त्र्यञ्च पूर्वोक्तनिर्वचनपरम्, तथा च तादृशानुशासनानुरोधेन तृतीयाया: स्वतन्त्रव्यापारे शक्तिरिति पर्यवस्यति: 'चैत्रेण पच्यते' इत्यादिस्थलेषु तृतीयाया: कृत्त्यर्थकत्वं कृतिजन्यत्वार्थकत्त्वञ्चोक्तं, तथा चानुशासनविरोध आपतति इति चेदत्रोच्यते तादृशानुशासनाद्यद्यपि स्वतन्त्रव्यापारे तृतीयाया: शक्तिर्लभ्यते तथापि स व्यापारो द्विविध: कृतिरूप: तदतिरिक्तश्च। तत्र कृति: चेतननिष्ठा, तदतिरिक्तश्च व्यापारोऽचेतननिष्ठ:, तयो: लाघवात् कृतावेव तृतीयाविभक्ते: शक्तिरुपगम्यते, अचेतननिष्ठ- कृत्यतिरिक्तव्यापारे तु तृतीयाया: निरूढा लक्षणा कल्प्यते, 'स्वतन्त्र: कर्ता' 'कर्तृकरणयोस्तृतीया'

इत्याद्यनुशासनन्तु तृतीयाविभक्तेरनादितात्पर्यमुभयत्राप्यस्ति इत्येतावन्मात्रं ज्ञापयति, व्यापारे तात्पर्यसत्त्वेऽपि गौरवात् तत्र शक्तिर्नैव कल्प्यते। सूत्रेण बोधितं व्यापारेऽनादितात्पर्यन्तु निरूढलक्षणायामेवोपयुज्यते। निगदितश्चैतद्व्युत्पत्तिवादे भट्टाचार्यपादैः-

'इदं त्ववधेयं यद्यपि स्वतन्त्रव्यापार एव तृतीयादेरनुशासनं, तथापि लाघवात् कृतिरूप एव कर्तृत्वे तृतीयादेः शक्तिः। अचेतनव्यापारे निरूढलक्षणैव। अनुशासनस्यानादितात्पर्यमात्रग्राहकत्वात्। लाघवसहकृतस्यैव तादृशतात्पर्यस्य शक्तिकल्पकत्वात्। व्यापारे तत्सत्त्वेऽपि गौरवेण शक्त्यसिद्धेः।'[15]

ननु कृतिव्यापारोभयत्र तृतीयायाः शक्तिस्वीकारे कृतित्वस्य व्यापारत्वस्य च शक्यतावच्छेदकत्वं स्वीकार्यं, तथा चोभयोः शक्यतावच्छेदकत्त्वस्वीकारे गौरवं स्यात् तदपेक्षया कृतित्वजातेरेवावच्छेदकत्त्वस्वीकारे लाघवात्कृतावेव शक्तिरित्येतावता प्रतिपादितं, तत्रोच्यते कृतिव्यापारोभयसाधारणस्य व्यापारत्वस्यैव जातित्वमुपगम्य तस्य तृतीयाशक्यतावच्छेदकत्वस्वीकारे शक्यतावच्छेदकद्वयकल्पनाप्रयुक्तं गौरवं नास्ति अतस्तादृशव्यापारत्वस्यैव शक्यतावच्छेदकत्त्वमङ्गीकार्यम् इति चेदत्रोच्यते व्यापारत्वस्य जातित्वमुपगम्य तस्य शक्यतावच्छेदकत्त्वं वक्तुं न शक्यते गुणत्वेन साङ्कर्यात् व्यापारत्वस्य जातित्वासिद्धेः । तथाहि गुणत्वाभावधिकरणे क्रियायां व्यापारत्वं वर्तते एवं व्यापारत्वाभावाधिकरणे गुणे च गुणत्त्वं वर्तत इति कृत्त्वा गुणत्त्वव्यापारत्त्वयोः परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र यत्ने समावेशात् व्यापारत्त्वस्य जातित्त्वं न सिद्धयति। तेन व्यापारत्वस्य शक्यतावच्छेदकतत्त्वस्वीकारे न लाघवम्। अतः कृतित्वस्यैव शक्यतावच्छेदकत्त्वं स्वीकृत्य कृतौ शक्तिस्तृतीयायाः स्वीक्रियते व्यापारे तु निरूढा लक्षणेति न कोऽपि दोषः। कर्तृत्त्वरूपकृतिबोधस्थले कृतौ च स्वीक्रियमाणा शक्तिः न कारकान्तरव्यापारा- नधीनत्त्वमन्तर्भात्य स्वीक्रियते अर्थात् कृतिनिष्ठा या शक्यता सा केवलं कृतित्त्वावच्छिन्ने वर्तते न तु कारकान्तरव्यापारानधीनत्त्वविशिष्टकृतित्त्वावच्छिन्ने, तादृशव्यापारानधीनत्त्वांशेऽवच्छेदकत्वकल्पने मानाभावात्। 'चैत्रकाष्ठस्थाल्यः पचन्ति 'इत्यादिप्रयोगवारणन्तु तादृशस्थले समभिव्याहृत-क्रियाकारकान्तर व्यापारानधीनतत्क्रियानुकूलव्यापारे लक्षणामङ्गीकृत्य करणीयम्। उक्तञ्चैतत् सर्वमपि आचार्यैः-

'एवञ्च कर्तृत्वरूपकृतिबोधस्थले कारकान्तरव्यापारानधीनत्वं न प्रतीयते इति तदन्तर्भावेणशक्तिकल्पने मानाभावः। व्यापारलाक्षणिकेन कर्तृप्रत्ययेन लक्षणया तदन्तर्भावेण व्यापारबोधनादेव पूर्वोक्तातिप्रसङ्गवारणात्। अन्यथा तदन्तर्भावेण कृतिशक्तावपि तादृशाति- प्रसङ्गस्य दुर्वारत्वात्।'[16]

इत्थञ्च तृतीयायाः 'चैत्रेण पच्यते' इत्यादौ कृतिर्वा कृतिजन्यत्त्वं वाऽर्थः। चैत्रः पचतीत्त्यादि कर्तृप्रत्ययसमभिव्याहारस्थले पाकविषयिणी पाकानुकूला या कृतिः तादृशकृत्याश्रयत्वरूपकर्तृत्त्व- बोधनिर्वाहार्थं धात्वर्थपाकस्य आख्यातार्थकृतौ जनकत्वविषयित्वोभयसम्बन्धेनान्वयः। ननु कृतेः सविषयकपदार्थतया विषयित्वसम्बन्धेनैव धात्वर्थस्य पाकस्य कृतावन्वयोऽस्तु किमर्थं जनकत्त्वसम्बन्धेनाप्यन्वयः स्वीक्रियत इति चेदुच्यते यत्र पाकविषयिणी कृतिरस्ति किन्तु पाको न निष्पन्नस्तत्र पचतीति प्रयोगवारणाय जनकत्वस्यापि सम्बन्धवत्त्वं स्वीक्रियते, जनकत्वञ्चात्र फलोपधायकत्वरूपं विवक्षितं न तु स्वरूपयोग्यत्वरूपम्, अन्यथा पाकनिष्पत्तिदशायां कृतौ स्वरूपयोग्यत्त्वस्य पाकजनकत्त्वस्य सत्त्वेन पचतीति प्रयोगापत्तिः स्यात्। एवं कर्मणि प्रयोगस्थले 'चैत्रेण पच्यत' इत्यत्र तृतीयार्थकृतेः धात्वर्थपाके जन्यत्वविषयत्त्वोभयसम्बन्धेनान्वयः । तथा च 'चैत्रः पचती'ति वाक्यात् 'पाकोपधायकपाकविषयककृत्याश्रयश्चैत्रः' इति बोधो जायते, 'चैत्रेण पच्यते' इत्यादिवाक्यात् चैत्रवृत्तिर्या कृतिः तज्जन्यः तद्विषयश्च यः पाकः तत्कर्म तण्डुल इति बोधो भवति। तदुक्तमाचार्यैः-

'एवञ्च चैत्रः पचतीत्यादौ विषयिताघटितकर्तृत्वबोधनिर्वाहाय यथा कृतौ पाकादेरुपधायकत्त्वविषयित्वोभयसम्बन्धेनान्वयः, विषयितायाः सम्बन्धत्वेऽप्युपधायकत्वनिवेश आवश्यकः, पाकाद्यनिष्पतिस्थले पचति, पक्ष्यति इत्त्यादिप्रयोगस्य प्रामाण्यवारकत्वात्, तथा चैत्रेण पच्यत इत्यादावपि तृतीयार्थकृतेर्जन्यत्वविषयत्वोभयसम्बन्धेनान्वयो बोध्यः।'[17]

कृतिजन्यत्त्वस्य तृतीयार्थत्वपक्षे तु तस्य स्वाश्रयत्त्वस्वनिरूपककृतिविषयत्त्वोभयसम्बन्धेन धात्त्वर्थपाकेऽन्वयः, स्वं कृतिजन्यत्वं, तन्निरूपिका या कृतिः तादृशकृतिविषयत्त्वं पाके, एवं स्वं कृतिजन्यत्वं तदाश्रयत्त्वमपि तत्रैवेति कृतिजन्यत्त्वस्य तृतीयार्थत्वपक्षे एतादृशोऽन्वयः स्वीकर्तव्यः।

तदुक्तम्-'कृतिजन्यत्त्वस्य तृतीयार्थत्त्वे जन्यत्वसम्बन्धमध्य एव स्वनिरूपकविषयत्वं प्रवेशनीयम्। कृतिविषयत्त्वमेव वा तृतीयार्थः। स्वनिरूपकजन्यत्वं विषयतायाः सम्बन्धमध्येऽन्तर्भावनीयम्।'[18]

ISSN 2348-7828

पादटिप्पणी

1. व्यु.वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 388
2. अष्टा., सूत्रसंख्या 2-3-18, पृ.सं. 15
3. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 390
4. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 396
5. व्यु.वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 399
6. अष्टा., सूत्रसंख्या 1-4-54, पृ.सं. 10
7. व्यु.वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 400
8. व्यु.वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 16
9. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 401
10. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 401
11. व्यु.वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 401
12. व्यु.वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 403
13. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 403
14. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 404
15. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 404
16. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 404-405
17. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 3818.
18. व्यु. वा., तृतीयाविभक्त्यर्थनिरूपणम्, पृ.सं. 38

सन्दर्भग्रन्थसूची

1. सिद्धान्तकौमुदी-आचार्यभट्टोजिदीक्षितः, संपादकः- वासुदेवशर्मापणशीकरः, 1985, मेहरचन्द लक्ष्मणदास, नवदेहली।
2. व्याकरणमहाभाष्यम् प्रदीपोद्योतसहितम् - श्रीगुरुप्रसादशास्त्री, 2006, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।
3. व्युत्पत्तिवादः - गदाधर भट्टाचार्यः, सुदर्शनाचार्य विरचित, संपादक - हरेरामत्रिपाठी, राष्ट्रियसंस्कृतसंस्थान, नवदेहली
4. व्याकरणमहाभाष्यम् (नवान्हिकम्) - महर्षिः पतञ्जलिः, 19996, श्रीराजस्थानसंस्कृत कॉलेज।
5. अष्टाध्यायी - पाणिनी, खेमराज श्रीकृष्णदास, श्रीवेङ्कटेश्व मुद्रालय।
6. व्याकरणमहाभाष्यम् - व्याख्याकारश्च श्रीहरिनारायणतिवारी, चौखम्बासंस्कृतभवनम्, वाराणसी।
7. शब्दकौस्तुभः - आचार्यभट्टोजिदीक्षितः संपादकः- विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्रिमोकाटे, 1898-1917, चौखम्बा संस्कृत सिरीज सं. 2, वाराणसी।
8. लघुसिद्धान्तकौमुदी - श्रीमद्विद्वद्वरदाराजाचार्यः, सम्वत्. 2057, गीताप्रेस, गोरखपुर।
9. काशिकावृत्तिः - वामनजयादित्यौ, 1890, वनारस।
10. महाभाष्यप्रदीपः - श्रीकैयटः, 1995, काशी।
11. सिद्धान्तकौमुदी (लक्ष्मीटीका) - सभापतिशर्मोपध्यायः, 1966, मोतीलाल बनारसीदास, वाराणसी।
12. वैयाकरणभूषणसारः (शाङ्करीव्याख्यासहितः)-आचार्यशङ्करशास्त्री, 1957, आनन्दाश्रममुद्रालयः।
13. लघुविभक्त्यर्थनिर्णयानुशीलनम् - आचार्य भारतभूषण त्रिपाठी, 2010, राष्ट्रियसंस्कृतसंस्थान, लखनऊपरिसरः, लखनऊ।
14. अमरकोषः - श्री अमरसिंह, 1997, चौखम्बा संस्कृतप्रतिष्ठानम्, नवदेहली।
15. शब्दशक्तिप्रकाशिका - आचार्यजगदीशः,संपादकः- ढुण्ढिराजशास्त्री, 2002, काशी संस्कृत सिरीज सं. 199, वाराणसी।

सहायकाचार्यः समन्वयकश्च, व्याकरणशास्त्रविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा,

ISSN 2348-7828

माध्यन्दिनसंहितायामुदात्तादिस्वराणां हस्ताभिव्यञ्जनविचार:

डॉ. राहुलकुमारझा

शोधसार:- ऋग्गादिवेदानां यथोच्चारणं नैकसमं श्रूयते, तथैव तेषां हस्तप्रदर्शनमपि नैकसदृशमुपलभ्यते। यथा वेदाध्यायिन: सन्ति बहव: शाखा: परम्पराश्च, तथैव तासामध्ययनरीतयोहि उच्चारणप्रकाराश्च विभिन्ना: प्राप्यन्ते। साम्प्रतमपि विविधासु शाखासु विभिन्नासु वैदिकपरम्परासु हस्तेन क्रियमाणंहि उदात्तादिस्वरप्रदर्शनं दृश्यते। विभिन्नासु शिक्षासु विभिन्नशाखाविशेषं परम्पराविशेषं वा अधिकृत्य हस्तस्वरप्रदर्शनप्रकारा: प्रोक्ता: सन्ति। अत्र तु केवलं माध्यन्दिनीयशाखाप्रयुक्तासु शिक्षासुसमधिगतानां हस्तस्वरप्रदर्शनप्रकाराणां विमर्श: प्रस्तूयते। अत्र समुपलब्धासु माध्यन्दिनीयशिक्षासुयाज्ञवल्क्यशिक्षायां विशेषेण प्रचोदितो हस्तस्वरप्रदर्शनप्रकार: प्राथम्येन अत्र उपस्थाप्यते।

कूटशब्द:-वेद:, मन्त्र:, स्वर:, संहिता, पाठ:, माध्यन्दिनशाखा, उदात्त:, अनुदान:, स्वरित:।

महर्षिणयाज्ञवल्क्येन स्वशिक्षायां स्वरप्रकरणे हस्तचालनविधौ प्रथमं हस्तसन्निवेशप्रकार: प्रोक्त:। तत्र सर्पफणाकारम् उत्तानम् उन्नतञ्च हस्तं कृत्वा स्वरप्रदर्शनाय प्रादेशदेशाभ्यन्तर एव तं चालयेदिति नियम: समुपन्यस्त:, तत्र कियान् प्रादेशिको भवतीति जिज्ञासाया: निराकरणमपि-अनुपदश्लोकेनैव समुपदिष्टम्। यथा-

अङ्गुष्ठस्योत्तरं पर्व तर्जन्युपरि यद्भवेद्।
प्रादेशस्य तु सोद्देशः तन्मात्रं चालयेत्करम्॥[१]

तत: हस्तस्वरूपनिरूपणे मनुष्यतीर्थादिलक्षणेन समन्वितं हस्तं विधाय तत्र हस्तचालनवेलायां कुत्र कियदन्तरं कर्तव्यमित्यस्यापि समुपदेशो विहित:। तदनुसारं मनुष्यतीर्थमुच्चं यथा स्यात्तथाकृत्वा पितृतीर्थेन यथोदकं दक्षिणं पतेत्, तथा विधाय हस्तस्य अधस्तलप्रदेशस्य अङ्गुलिमूलभागं निम्नं कृत्वा ऋज्वङ्गुलियुतपितृचुलुकवत् हस्तं निर्मापयेत् इति, प्रदेशसीमायां स्वरानुसारेण हस्तचालनस्य कर्तव्यतया तत्र उदात्तस्थानात् स्वरितस्थानेनीयमाने हस्ते उदात्तस्वरितयो: त्र्यङ्गुलमन्तरालं भवति। तथैव स्वरितस्थानात् मध्यत: वामपार्श्वे उदात्तस्थानेप्राप्तवते करे त्र्यङ्गुलमात्रमन्तरं जायते। एवमेव मध्यत: स्वरितस्थाने अनुदात्तस्थानंप्रति गच्छतो हस्तस्य षडङ्गुलमितमन्तरं भवति। एतेन उदात्ते हस्तस्वोर्ध्वगमनमनुदात्ते च अधोगमनंस्वरिते च मध्ये स्थिति: प्राप्यते।[2]

अयं तु हस्तस्वरप्रदर्शनस्य सामान्यप्रकार: प्रोक्त:, परन्तु क्वचित्उदात्तस्य वामभागे प्रदर्शनं अनुदात्तस्य च दक्षिणभागेऽपि प्रदर्शनं प्राप्यते, तदिह विमृश्यते। यत् संहितापाठकालेउदात्तस्वरात्परो यदा अनुदात्तस्वर: समायाति, तदानीमुदात्तप्रदर्शनाय वामभागे हस्तो धर्तव्य:[3]। यथा-'तस्मादश्वा आजायन्त'[4] इत्यत्र तकारोच्चारणसमये हस्तस्य वामभागे स्थिति:, न तु दक्षिण भ्रूवप्रान्ते तस्य स्थिति: कर्तव्या उत्तरत्र मकारोत्तरवर्तिन आकारस्य अनुदात्तीभूतत्त्वात्। एवमेव अनुदात्तप्रदर्शनेऽपियत्र अनुदात्ते अनुदात्त-परकोदात्तपरत्वं स्यात्, तत्र पूर्वानुदात्ते हस्तस्य दक्षिणतो न्यास: कर्तव्य:, यत्र तु अनुदात्ते स्वरितपरकोदात्तपरत्वं स्यात्, तत्र अनुदात्तो अधो हस्तस्य न्यास: कर्तव्य:। यथा-'यस्मिन्नृच: सामयजूंषि'[5] इत्यत्र यकारोत्तरोदात्ताकारस्य अनुदात्तत्वे, सकारमकारोत्तरवर्तिनि इकारे परे ह्युच्चारणसमये हस्तस्य वामतो न्यास: कर्तव्य:, एवं सकारमकारोत्तरवर्तिनि अनुदात्तेकारस्योच्चारणकालेनकारद्वयोत्तरवर्तिन उदात्तस्य ऋकारस्यचकारोत्तरवर्ति अनुदात्तस्य अकारस्य च सत्त्वात् दक्षिणतो हस्तस्य न्यास: कर्तव्यो भवति। पुन: उदात्तस्य ऋकारस्यउच्चारणकाले चकारोत्तराकारस्य अनुदात्तस्य सत्वात् दक्षिणतो हस्तस्य न्यास: कर्त्तव्यो भवति। उत्तरत्र अनुदात्तपरकोदात्तस्य सकारोत्तराकारस्य विद्यमानत्वात्।

पुन: सकारोत्तराकारस्य उच्चारणावसरे हस्तस्य वामे स्थिति:, उत्तरत्रानुदात्तस्य विद्यमानत्वात्। तत्र मकारोत्तराकारस्य अनुदात्तस्य तु उच्चारणवेलायां परत्र अनुदात्तपरकोदात्तस्य अभावात्हस्तस्य अधोगमनं न दक्षिणतो गमनमिति नियम:। इत्थम् अनुदात्तप्रदर्शने हस्तस्य स्थानविमर्श:। पुनरत्र विचार्यते यत् यत्र क्वचन बहव: अनुदात्ता: स्वरान्यतराव्यवहिता आयान्ति, तत्र अनुदात्तस्य कुत्र प्रदर्शनं क्रियते? इति जिज्ञासायामुच्यते यत्र बहवो ह्यनुदात्ता:, तत्र अन्तिममनुदात्तं प्रतीक्षमाणा: पूर्वेऽनुदात्ता: हस्तेन मध्ये एव प्रदर्श्यमाणा: तिष्ठन्ति प्रचयवदिति। यतो हि माध्यन्दिनानामुच्चारणात् उदात्तात् उच्चतरम् एतन्नामकं भिन्नस्वरो नास्ति तथा नीचात् अनुदात्तात् नीचतरम् एतदाख्यम् अन्य: स्वर: कोऽपि नास्ति। एतावता ही अन्तिमम् अनुदात्तं यावत् पूर्वस्थितेषु हि अनुदात्तेषु उच्चार्यमाणेषु मध्ये एव हस्त: प्रदर्शनीय: नाध:, न च दक्षिणत इति वैदिकशिक्षासम्प्रदायतोऽवगम्यते। यथा-'बलविज्ञायस्थविर:'[6] इत्यत्र बलवि इति अक्षरत्रयम् अनुदात्तविशिष्टं हस्तेनप्रदर्श्यमाणं

ISSN 2348-7828
मध्ये तिष्ठति, अन्त्यो 'ज्ञा' इति अनुदात्तोऽनुदात्त: परत्वाभावात् मध्ये न तिष्ठति, किन्तु नीचै: क्रियते, इति माध्यन्दिनानाम् अनेकेषु अव्यवहितेषु अनुदात्तेषु शिक्षासम्मतेयं स्वरव्यवस्था दृश्यते।

एवमेव प्रचयस्वरस्य उच्चारणे हस्तस्य मध्ये एव स्थितिर्भवति। स च प्रचय: स्वरितात्पर: उदात्तमय:। तथाहि प्रातिशाख्यम् स्वरितात्परमनुदात्तमुदात्तमयम्। अत एव स्वरितवत् प्रचयस्यापि हस्तप्रदर्शनं प्रचयं नासिकाग्रत: इत्यनेनमध्येनासिकाग्रेक्रियते। शिक्षान्तरेषुबहुत्र-प्रचित:, प्रचय:, प्रच:, निचित:, निचय:, तान:, एकश्रुति:, एकस्वर: इति नामान्तरेणापिउदात्तमयस्य प्रचितस्य अवबोध: कारित: शिक्षाचार्यै:।

प्रचये तावदयं विशेष:, यत् वैदिकै: स्वरितात् परे दृश्यमाने प्रचये स्वरितस्वरं वेगेन मुख्यत: हस्ततश्च पात्यते, यत्र तु स्वरितात् परो न भवेत् प्रचय:, तत्र स्वरितं स्वरं मृदुच्चारणीयं न वेगेन पातनीयम् इति। एवं रीत्याउदात्तादित्रयाणां स्वराणां हस्तेन प्रदर्शनंनिरूप्यजात्यादीनां स्वरिताविशेषाणांतिर्यक्प्रतिपादनविधौसोदाहरणंहस्तप्रदर्शनं मयाप्रस्तूयते। तत्रजात्याभिनिहितक्षैप्रप्रश्लिष्टा: स्वरिता: यदा पितृपिण्डप्रदानमुद्रावत् दक्षिणतोऽर्धन्युब्जं हस्तं कृत्वा प्रदर्शनीया भवन्ति। यदाच उदात्त: परो भवति, तदा मनुष्यदानमुद्रावत्वामत: पूर्णन्युब्जं हस्तं कृत्वा ते स्वरणीया भवन्ति। यथा हि उदात्तपरत्त्वाभावानाम् अर्धन्युब्जानाम् उदाहरणम्।

'वैष्णव्यौ'[7] इत्यत्रवकारयकारयो: सन्धिस्थले त्रिर्यक् स्वर: दृश्यते, अयमेव जात्यस्वर:। 'वेदोऽसि'[8] इत्यत्र दकाराधोऽभिनिहित: स्वर:। 'अभ्यर्षत'[9] इत्यत्र यकाराध: क्षैप्र: स्वर:। 'अभीन्धतामुखे'[10] इत्यत्र भीकाराध: प्रश्लिष्ट: स्वर:। अत: परम् उदात्तपराणाम् अनुदात्तपूर्वाणां पूर्णन्युब्जजात्यादीनाम् उदाहरणम्। यथा-'भूर्भुव: स्वर्द्यौरिव'[11] इत्यत्र स्व पदात् अध: उत्तानशयित: षष्ठाङ्कसदृश: जात्यस्वर:। 'प्रसवेऽश्विनोर्बाहुभ्याम'[12] इत्यत्रवेकारस्याधोऽभिनिहित: स्वर:। 'विश्वंन्यत्रिणम्'[13] इत्यत्र यकाराध: क्षैप्र:। 'स्रुचीवेति'[14] इत्यत्रचीकाराध: प्रश्लिष्ट:। एषाम् अर्धन्युब्जपूर्णन्युब्जजात्यादिस्वरितानां तिर्यक् हस्तचालनेकिञ्चिदन्तरंकरणीयं भवति। तत् कियद् अन्तरमितिजिज्ञासायाम् उच्यते-

षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च।
तच्चतुर्भागमात्रं तु हस्तं तेनैव वर्तयेत्॥[15]

अत्रैव प्रत्येतव्यम्, यदर्धन्युब्जस्थले मूलस्थानस्थितंहस्तं पितृतीर्थत:, सार्धाङ्गुलान्तरालंनामनेन जातमर्धन्युब्जंततो हृदयं यावत्षडङ्गुलान्तरं मण्डलाकारं संचाल्यपुन: मूलस्थानं प्रापयेत्। यदि एतेभ्य: परो ह्यनुदात्तो भवेत्, तदा तु तिर्यङ् निहननंपितृतीर्थनिम्नीकरणात्मकमपोद्य 'ऋजुंनिहत्य प्रणिहन्यते उदात्ते'[16] इति ऋजुनिघातविधायकप्रातिशाख्यसूत्रादुत्तानमेवपूर्वं मूलस्थानतो हृत्सन्निकृष्टम् अवतार्य, पुन: षडङ्गुलान्तरालात्मके मध्ये प्रत्यावृत्य च प्रणिहन्यते।

इदानीं वर्णविशेषोच्चारणे हस्ताकृति: विषये मया उच्यते-वैदिकमन्त्रोच्चारणे मकारव्यञ्जनस्य सूचनाय तदुच्चारणे हस्तस्य मुष्ट्याकृति: भवति। एवमेव आवसानगतस्य नकारस्य उच्चारणे तर्जन्या नखस्य अंगुष्ठेन स्पर्श: कार्य:। एवमेव यदा ककार:, टकार:, ङकार:, णकार: वा मन्त्रार्धावसाने पूर्णमन्त्रावसाने वा समायाति, तदानीं तत्र तर्जनीं नमयित्वाप्रदर्शनं कार्यम्। पुन: पकारविशिष्टोऽवसानगते स्वरे पञ्चाङ्गुल्यमेकीकृत्य प्रदर्शयेत्। तथा तकारविशिष्टावसानेस्वरे कुण्डलाकृति: अङ्गुष्ठेन तर्जनी उत्तमपर्वसर्गात्मिका दर्शयितव्या भवति[17]। मल्लशर्मकृतायां शिक्षायां तथा प्रातिशाख्यप्रदीपशिक्षायां सम्प्रदायप्रबोधिनीशिक्षायाञ्च अपि प्रोक्तवर्ण विशेषोच्चारणे तादृशी एव हस्ताकृति: निरूपिता प्राप्यते, इति तु अवसानगतानां व्यञ्जनविशेषाणामुच्चारणे हस्तावयवं प्रतिपादितम्। अत: परमुष्मविशेषोच्चारणे हस्ताङ्गुलिप्रक्षेपविधि: निरूप्यते। शलुष्माण: इति प्रत्याहार वृत्या श ष स ह इति चत्त्वारो वर्णा: उष्म पदाभिधेया भवन्ति। एतेषु परभूतेषु विसर्गोच्चारणेतर्जनी कनिष्ठिका वा एकाङ्गुलि: निस्सारणीया भवति, तत्रोदात्तात्परो यदि विसर्ग: स्यात् तदा तदुच्चारणे तर्जनी निस्सारणीया भवति। तथा च यदा अनुदात्तात् परो विसर्ग: स्यात् तदा तदुच्चारणे कनिष्ठिकाङ्गुलि: निस्सारणीया भवति, एवमेव यदा स्वरितात् परो विसर्गोच्चारणं क्रियते, तदा तर्जनीकनिष्ठिके उभे गोवत्सश्रृंगवन्निस्सारणीये भवत:।[18]

मल्लशर्मकृतशिक्षायामपि वाच्यान्तरेण उपर्युक्ततथ्यमेव पुष्टीक्रियते। यथा-

स्वरितेभ्य: क्रमेणैव दक्षिणोत्तरगामिनी।
कनिष्ठा तर्जनी चैवत्याज्या तूर्ध्वे हि देशिनी॥[19]

ISSN 2348-7828

अनुदात्तयुते ह्रस्वे सस्वराच्च परेऽपि वै।
सुज्ञैःकनिष्ठिका त्याज्या सविसर्गे द्विजोत्तमैः॥

एवमनुस्वारोच्चारणे द्विविधं तर्जन्याप्रदर्शनं भवति। अयमनुस्वारः उष्मवर्णपरः लघुदीर्घभेदेन द्विविधः। अस्य लक्षणं सामान्यतः सर्वशिक्षासु एकसदृशमेव। यथा ह्रस्वात्परो दीर्घः दीर्घात्परो ह्रस्वः। एतदनुसारं ह्रस्ववर्णात्परोऽनुस्वारः दीर्घसंज्ञकः दीर्घवर्णात्परोऽनुस्वारः ह्रस्वः अर्थात् लघुसंज्ञकः इति। उच्चारणवेलायां यदा लघुः अनुस्वारः समायाति, तदा तत्र अङ्गुष्ठाङ्गुल्या तर्जन्या आकुञ्चनं भवति। अर्थात् तर्जनीपृष्ठभागे अङ्गुष्ठस्य स्पर्शः क्रियते। दीर्घानुस्वारोच्चारणे तु केवलं तर्जन्याः प्रदर्शनं क्रियते।'स्वरिते तूभयं क्षिपेदिति'[20] शिक्षावचनेन सामान्येन स्वरित उष्मवर्णपरस्य विसर्गस्य उच्चारणे तर्जनी कनिष्ठिके प्रदर्शनीये भवतः,परन्तु क्वचित् उष्मपरत्त्वाभावेऽपि वकारविशिष्टेन विसर्गोच्चारणे तर्जनीकनिष्ठिकयोः निक्षेपः सम्भवति। यथा–**'अतिविश्वा–परिष्ठा'**[21] यद्यपि अत्र विसर्गो न उष्मवर्णपरः, तथापि वकारविशिष्टविसर्गोच्चारणे विशेषविधिश्रवणात् अत्र उभयप्रक्षेपो विहितः। पुनः वकाररहित सोष्मस्वरिततत्वविशिष्ट दीर्घ–विसर्गोच्चारणे एकां कनिष्ठिकाम् एव केवलां निस्सारयेद् इति विशेषविधिः। तथा च वकाररहितसोष्म–स्वरितविशिष्टह्रस्वविसर्गोच्चारणे तर्जनीकनिष्ठिके उभयेऽपि क्षिपेत् इति विधिः। यथा–**'वसोः–पवित्रमसि'**[22] अत्र स्वरितात्परस्यापि विसर्गोच्चारणे केवलंकनिष्ठिकानिस्सारणीया भवति। **'तन्मे मनः शिव–सङ्कल्पमस्तु'**[23] अत्र उभयमपि निस्सारणीयं भवति। एवमेव अन्यदपिज्ञातव्यं, यत् यदि जात्यस्वरितः वकारयुक्तः स्यात्, तद्तद्भूतस्य विसर्गस्योच्चारणे तर्जनी कनिष्ठिके उभेऽपि निस्सारणीये भवतः। यथा–**'व्वायव्व्याः'**।

एषः एवार्थः उभयोरपि ह्रस्वे च वकारे स्वरितेसति।
दीर्घेऽपिचोभयोः क्षेपः इति शास्त्र व्यवस्थितिः॥[24]

इति निष्कर्षमभिवदतोलघुमाध्यन्दिनशिक्षाकारस्य अस्य अभिप्रेतः। एतेन इदं निष्कृष्यते, यदुभयक्षेपस्य स्थलद्वयं शास्त्रनियतम्, तत्र प्रथमं विसर्गयुक्तंह्रस्वविशिष्टस्वरितस्थलम्, द्वितीयं वकारसहितं दीर्घस्वरितात्परं विसर्गोच्चारणपरमिति। याज्ञवल्क्यशिक्षायामुभयक्षेपस्य स्वरस्थलं निष्कृष्य निदर्शितम्। यथा–

विसर्गान्तः स्वरो ह्रस्वः स्वरितो यत्र दृश्यते।
दीर्घस्तु स वकारश्च तत्रोभक्षेप उच्यते॥
एवं प्रकारेण माध्यन्दिनीयोच्चारणविधिः संक्षेपेण वर्तते।[25]

इति शम्

पादटिप्पणी

1. याज्ञवल्क्यशिक्षा–5.2
2. याज्ञवल्क्यशिक्षा स्वरप्रक्रिया – 55
3. याज्ञवल्क्यशिक्षा स्वरप्रक्रिया – 57
4. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 31.8
5. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा–31.5
6. शुक्लयजुर्वेदमाध्यन्दिनशाखा–17.37
7. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 1.12
8. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 2.21
9. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 17.98
10. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 11.61
11. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 3.5
12. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 1.10
13. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 17.16
14. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 29.69
15. याज्ञवल्क्यशिक्षा स्वरप्रक्रिया–56
16. वाजसनेयप्रातिशाख्यम् – 1.124
17. याज्ञवल्क्यशिक्षा स्वरप्रक्रिया – 61 – 62
18. याज्ञवल्क्यशिक्षा स्वरप्रक्रिया – 63
19. मल्लशर्मकृतमाध्यन्दिनीयशिक्षा –24.325
20. याज्ञवल्क्यशिक्षा – 3.63
21. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 12.84
22. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 1.2
23. शुक्लयजुर्वेदमाध्यन्दिनीयशाखा – 34.1
24. लोमशीशिक्षा– 25 – 26
25. याज्ञवल्क्यशिक्षा –69

सहायकाचार्यः,वेदविभागः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातः।

ISSN 2348-7828

आचार्यकेशवरामशर्मणः काव्येषु हिमाचलस्य मन्दिरनिर्माणशैली

पङ्कजः

शोधसारः-भारतदेशे बहूनि प्रसिद्धानि मन्दिराणि सन्ति तेषु हिमाचलस्यापि बहूनि मन्दिराणि अन्तर्भवन्ति। एतानि मन्दिराणि हिमाचलप्रदेशे विविधशैलीशिल्पेषु निर्मितानि सन्ति। तासां शैलीनाम् अध्ययनम् अस्मिन् पत्रे कृतमस्ति। मध्ये वास्तुशास्त्रस्य प्रमाणैः, आधुनिकविचारकाणां विचारैश्च प्रमाणानां पोषणमपि पत्रेऽस्मिन् कृतमस्ति।

कूटशब्दाः-संस्कृतिसाहित्यम्, हिमाचलम्, कविः, केशवरामशर्मा, वास्तु, मन्दिरम्।

संक्षेपाक्षरसूची-

1.	अ.हि.	अलौकिक हिमाचल प्रदेश
2.	हि.क.वै.	हिमाचल का कला वैभव
3.	हि. वै.	हिमाचलवैभवम्
4.	वि.वा.शा.	विश्वकर्मवास्तुशास्त्रम्

मन्दिरनिर्माणशैली-हिमाचलप्रदेशः देवभूमिनाम्ना विश्वविख्यातोऽस्ति, कारणं हिमाचलस्य देवसंस्कृतिरस्ति। तत्रापि अत्र निर्मितानि मन्दिराणि। हिमाचलप्रदेशे 6000 इतोऽपि अधिकानि मन्दिराणि सन्ति। तत्रापि 2000 प्रसिद्धानि मन्दिराणि विद्यन्ते[1]। एतानि मन्दिराणि विविधकालखण्डेषु निर्मितानि। अतः एतेषां निर्माणशैल्यामपि वैविध्यं दृश्यते। यानि प्राचीनानि मन्दिराणि सन्ति तेषु नागरशैल्याः (शिखरशैली) दर्शनं स्वतः जायते। किन्तु कालान्तरे यदा भारते शासनव्यवस्था परिवर्तिता तदा मन्दिरनिर्माणशैली अपि प्रभाविताभूत्, तस्मादत्र अन्याः शैल्यः अपि दृश्यन्ते। यासां समुल्लेखः विविधैः विचारकैः स्व-स्वमतानुसारम् इत्थं कृतम्- **अलौकिक हिमाचल प्रदेश** इत्यस्य प्रसिद्धस्य ग्रन्थस्य लेखकः जगमोहनबलोखरा कथयति यत्-

हिमाचलप्रदेशे मानवैः वास्तुकलायाः विलक्षणशैलीभिः मन्दिराणां निर्माणं कृतमस्ति येन सुन्दरहिमाचलस्य संस्कृतिः समृद्धाभूत्। इयं वास्तुकला विविधस्थानानां कलाभिः प्रभावितास्ति। पुनश्च अस्यां बाह्याक्रमणानां प्रभावोऽपि नैवावलोक्यते। तेन हिमाचलस्य संस्कृतिः, कला, वास्तुशिल्पादीनि तत्वानि अद्यापि सुरक्षितानि सन्ति। एतस्य पुष्टिम् अत्रत्यानि पुरातनानि मन्दिराणि कुर्वन्ति[2]।

तन्मते हिमाचलस्य मन्दिरेषु प्रमुखरूपेण तिसृणां निर्माणशैलीनां प्रभावः दृश्यते-

1. शिखरशैली(नागरशैली) 2. पैगोड़ाशैली

3. पर्वतीया शैली च।

1. शिखरशैली- बलोखरामते हिमाचले अष्टमशताब्द्यां निर्मितानि मन्दिराणि अस्यामेव शैल्याम् अन्तर्भवन्ति। इयं शैली गुप्तकाले प्रचलिता आसीत्। अस्यां चतुष्कोणात्मकं मन्दिरं निर्मीयते। मन्दिरस्य छदि शिखरात्मिकी भवति। मन्दिरस्य कृते तादृशस्य स्थानस्य चयनं क्रियते यत्र सूर्यस्य प्रकाशः साक्षात् ईश्वरस्य प्रतिमायां पतेत्। अयोध्यायां नवनिर्मिते श्रीराममन्दिरेऽपि इयं व्यवस्था दृश्यते, तत्र सूर्यस्य रश्मिः साक्षात् श्रीरामचन्द्रस्य ललाटे तिलकस्योपरि पतति।[3] गर्भगृहस्य समीपं सभामण्डलस्य निर्माणं क्रियते। मन्दिरस्य तोरणद्वारेषु विविधाः चित्रकलाः क्रियन्ते। भित्तिषु विविधदेवानां चित्राण्यपि निर्मीयन्ते। एवमेव प्रमुखद्वारेषु पशु-पक्षीणां चित्राण्यपि दृश्यन्ते। अस्यां मुख्यरूपेण नूरपुरस्य विष्णुमन्दिरम्, मसरूरस्य (कांगड़ा) शिवमन्दिरम्, चम्बायाः लक्ष्मीनारायणमन्दिरम्, मण्ड्याः भूतनाथमन्दिरम्, त्रिलोकनाथमन्दिरम्, पञ्चवक्त्रादीनि बहूनि मन्दिराणि अन्तर्भवन्ति।[4]

2. पैगोड़ाशैली- बलोखरामते नागरशैल्यातिरिक्तं पैगोड़ाशैल्यामपि हिमाचले मन्दिराणि निर्मितानि सन्ति। इयं शैली भूटाननेपालादिषु देशेष्वपि दृश्यते। अस्यां निर्मितानि मन्दिराणि वर्गाकारात्मकानि आयताकारात्मकानि वा भवन्ति। मन्दिरस्य भित्तिषु देवदारुवृक्षस्य स्थूलानि काष्ठानि दृश्यन्ते। मन्दिरनिर्माणे पाषाणानां मध्ये काष्ठस्यापि प्रयोगः क्रियते। अनेन मन्दिरस्य भित्तयः सुदृढाः भवन्ति। एतेषां छदिनिर्माणमपि समतलपाषाणैः (स्लेट) क्रियते। मन्दिरस्य आलिन्दनिर्माणं काष्ठद्वारा क्रियते। एतानि त्रि-पञ्च-सप्त-तलात्माकानि भवन्ति। एतानि बहुछद्यात्माकान्यपि भवन्ति। हिमाचले अस्यां मण्डीजनपदस्य पराशरमन्दिरम्, रिवालसरस्य बौद्धमन्दिरम्, मनाल्याः हिडिम्बामन्दिरम्, शिमलायाः भीमाकाली-मन्दिरादीनि प्रसिद्धानि सन्ति।[5]

हिमाचलस्य जनपदद्वये किन्नौरे लाहौलस्पीत्याञ्च अस्याः शैल्याः अत्यधिकः प्रभावः दृश्यते, यतः तत्र बौद्धधर्मावलम्बीनां संख्या अधिकास्ति। तत्र बहूनि बौद्धमन्दिराणि बौद्धविहारद्वयञ्च अत्यधिकं प्रसिद्धमस्ति। स्पीतिघाट्यांताबोबौद्धविहारम्प्रमुखं स्थानं भजते। अस्य निर्माणम् 10-11 तमी शताब्द्याम् अभवत्। विहारमिदं तलत्रयात्मकं भवति। अस्य भूतले प्रतिमाः स्थाप्यन्ते, अन्येषु तलेषु पूजा क्रियते। केषुचित् विहारेषु पुस्तकानि प्रतिमा अपि अन्येषु तलेषु स्थाप्यन्ते। गर्भगृहे प्रधानदेवतायाः वासः भवति। यं परितः परिक्रमापथकक्षोऽपि दृश्यते। अस्मिन् परिक्रमामार्गे मणिचक्राणां शृंखलापि निर्मिता भवति। श्रद्धालवः परिक्रमाकाले तान् मणिचक्रान् स्पृशन्ति। केषुचित् बौद्धविहारेषु बौद्धभिक्षुकाणाम् आवासस्यापि समुचिता व्यवस्था कल्पिता भवति।[6]

3. पर्वतीया शैली- बलोखरामते इयं तृतीया मन्दिरनिर्माणशैली अस्ति। इयं हिमाचलस्य परम्परागतशैली कथ्यते। इयम् अविकसितेषु ग्राम्यक्षेत्रेषु दृश्यते। यत्र मन्दिरनिर्माणाय पाषाणानां प्रयोगः क्रियते। मन्दिरस्य छदिनिर्माणमपि समतलपाषाणैः क्रियते। मन्दिरस्य द्वाराणि वातायनानि च देवदारुकाष्ठैः निर्मीयन्ते। पुनश्च एतेषु काष्ठेषु विविधा चित्रकलापि क्रियते। मन्दिरस्य गृहभागे प्रधानदेवस्य मुखं स्थाप्यते, यस्य दर्शनार्थं द्वारम् उद्घाटितमेव भवति। देवस्य आभूषणानि, वस्त्राणि, वाद्ययन्त्राणि अन्यानि च बहुमूल्यानि वस्तूनि सुरक्षिते स्थाने स्थापितानि भवन्ति। संक्रान्तिदिने मन्दिरेषु विशेषपर्वः भवति यत्र देवस्य गुरः[7] आगत्य जनानां समस्यानां समाधानं करोति। अस्यां शैल्यां निर्मितानि कानिचित् प्रसिद्धानि मन्दिराणि- कुल्लूजनपदस्य बिजलीमहादेवः, किन्नौरजनपदस्य कामरुमन्दिरं सांगला, रघुनाथमन्दिरं कुल्लू, परशुराममन्दिरं निरमण्डः, हाटकोटीमन्दिरं रोहडू इत्यादिनि प्रसिद्धानि मन्दिराणि सन्ति।[8]

मन्दिरनिर्माणशैलीसन्दर्भे किशोरीलालवैद्यस्य विचारः- हिमाचलकलासंस्कृतिभाषाकादमी-पक्षतः प्रकाशिते **हिमाचल का कला वैभव** इत्यस्मिन् पुस्तके किशोरी लाल वैद्यस्य एकः लेखः प्रकाशितोऽस्ति। यत्र तेन हिमाचलस्य मन्दिरनिर्माणशैलीसन्दर्भे स्वविचाराः प्रकटिताः-तन्मते भारतदेशे मन्दिरनिर्माणस्य तिस्रः शैल्यः प्रचलिताः सन्ति। उत्तरीभारते नागरशैली, मध्यभारते चालुक्यशैली, दक्षिणभारते च द्रविड़शैली[9]। तथा तु उत्तरभारते नागरशैली प्रसिद्धा तथापि विविधप्रभावैः अत्र मन्दिरनिर्माणे अन्येषां शैलीनामपि समावेशः जातः तस्मादसौ अग्रे तस्याः एकादशत्वं स्वीकरोति[10]। तानि यथा-

1. शिखरशैली (नागर)
2. पैगोड़ाशैली (मेरु)
3. गुम्बदशैली
4. पिरामिडशैली
5. तिर्यकाच्छादनशैली
6. समतलाच्छादनशैली
7. मीनारशैली
8. गोंपाशैली
9. गुहाशैली
10. देशजशैली
11. मिश्रितशैली ।

शिखरशैली (नागरशैली)- तन्मते शिखरशैली नागरशैल्याः नामान्तरणमस्ति, इतिहासेऽपि अस्याः समुल्लेखः प्राप्यते एव। तदनुसारं हिमाचलस्य निम्नलिखितानि मन्दिराणि अस्याम् अन्तर्भवन्ति-

मसरूर-कांगड़ायाः शिवमन्दिरम्-अष्टमशताब्द्यां शिखरशैल्यां निर्मितं शैलोत्कीर्णैकाश्ममन्दिरमस्ति।

यद्यपि मन्दिरमिदं खण्डितावस्थायां विद्यते तथापि पुरातत्वविभागस्य संरक्षणे वर्तमानेऽपि जीवति।[11]

बजौराकुल्लोः विश्वेश्वरमन्दिरम्-नागरशैल्यां निर्मितमिदं मन्दिरम् अतीव सुन्दरमस्ति। अद्वितीयेयं संरचना मूलस्वरूपे संरक्षितास्ति।

लक्ष्मीनारायणमन्दिरम्, चम्बा- 920 तः 940 ईस्वीमध्ये निर्माणम्। निर्माता राजा शैलः। अस्मिन्नेव गौरी-शंकरमन्दिरं युगाकारवर्मा (940 ई.), राधाकृष्णमन्दिरम्, राजा अजीतसिंहः (1794-1808ई.)[12]।

बैजनाथमन्दिरम्, कांगड़ा-1204 ई. मध्ये जालंधर-त्रिगर्तस्य राज्ञः जयचन्द्रस्य राज्यकाले धनिकाभ्यां मण्युकाहुकाभ्यां निर्मितम्।

पैगोडाशैली- आचार्यवैद्यानुसारं एशियामहाद्वीपे यत्र-कुत्रापि बौद्धधर्मस्य अधिकः प्रचारः आसीत् तत्रास्यां शैल्यां मन्दिराणि निर्मितानि सन्ति। हिमाचलप्रदेशेऽपि बौद्धधर्मस्य प्रभावः विद्यते एव। तस्माद् अत्रापि बहूनि मन्दिराणि अस्यां निर्मितानि सन्ति। तन्मते तिब्बत-नेपाल-भूटान-चीन-जापान-कोरिया-श्रीलंका-वर्मा-थाईलैंडादिदेशेषु अधुनापि अस्यां निर्मितानि मन्दिराणि सुरक्षितानि सन्ति। तद्वत् हिमाचले-पराशरदेवमन्दिरम् (मण्डी), ब्रह्मामन्दिरम् (ढीरी), गौरीशंकरमन्दिरम् (करसोगः), बौद्धमन्दिरम् (रिवालसरः) अस्याः शोभावर्धकानि सन्ति।[13]

ISSN 2348-7828

गुम्बदशैली– भारते यदा मुगलानां शासनकाल आसीत् तदानीं यानि मन्दिराणि निर्मितानि तेषु **मस्जिद** इत्यस्य प्रभावः दृश्यते। तस्मात् मन्दिरेषु मस्जिदमिव गुम्बदाकारः दृश्यते। अस्य एकं कारणम् इदमपि आसीद् यत् आक्रान्तेभ्यः मन्दिराणां संरक्षणं भवेत्, तस्मादियं शैली आश्रिता।[14] यद्यपि हिमाचलस्य ज्वालादेव्याः मन्दिरं नागरशैल्यां निर्मितं तथापि केषाञ्चित् विचारकाणां मतमस्ति यत् मातुः मन्दिरस्य छदौ गुम्बदाकाराकृतिः विद्यते तस्मादिदं मन्दिरं अस्यामन्तर्भवति।[15]

पिरामिडशैली– हिमाचलस्य जुब्बलक्षेत्रे एतादृशानि मन्दिराणि अवलोक्यन्ते। पिरिमिडशब्दस्य अर्थः भवति त्रिकोणात्मकम्। यानि मन्दिराणि त्रिकोणात्मकानि भवन्ति तानि अत्र अन्तर्भवन्ति। अस्य उदाहरणमस्ति महासूमन्दिरं जुब्बलः।

तिर्यकाच्छादनशैली– येषु क्षेत्रेषु हिमपातः भवति तत्र अस्यां मन्दिराणि निर्मितानि सन्ति। तिर्यकाच्छादनकारणेन मन्दिरेषु हिमः नैव तिष्ठति तेनैव मन्दिराणां संरक्षणं भवति। हिमाचलस्य शिमलादिजनपदेषु बहूनि मन्दिराणि अस्यां निर्मितानि सन्ति।[16]

समतलाच्छादनशैली– येषां मन्दिराणां आच्छादनं समतलं भवति, तानि मन्दिराणि अत्र अन्तर्भवन्ति। हिमाचलस्य कांगड़ा-हमीरपुरादिजनपदेषु अस्यां मन्दिराणि निर्मितानि सन्ति। हमीरपुरस्य नर्बदेश्वरमन्दिरम् अस्यामेव निर्मितमस्ति।

मीनारशैली– यद्यपि आचार्येण अयं प्रकारः स्वीकृतः किन्तु कस्मिन्नपि ग्रन्थे अन्तर्जाले वा अस्य समुल्लेखः नैव प्राप्तः।

गोंपाशैली– अस्यां बौद्धविहाराणि अन्तर्भवन्ति। केचन विचारकाः पैगोड़ा शैल्यामेव अस्याः अन्तर्भावं कुर्वन्ति। किन्तु आचार्यवैद्यस्तु पृथक्रूपेण इमां शैलीं स्वीकरोति। हिमाचलप्रदेशे किन्नौरे लाहौलस्पीतौ च अस्यां बौद्धविहाराणि निर्मितानि सन्ति। तत्र लाहौले की-गोंपाविहारम् प्रसिद्धमस्ति।[17]

गुहाशैली– हिमाचले बहुषु स्थलेषु गुहास्वपि देवस्य प्रादुर्भावः जातोऽस्ति, यत्र प्राचीनकालादेव जनैः पूजार्चना क्रियते। अस्य उदाहरणस्वरूपं मण्डी-पठानकोटमार्गे द्रष्टुं शक्यते। धर्मशालातः पञ्चाशतकिलोमीटरदूरे मन्दिरमिदं स्थितमस्ति। इदं त्रिलोकपुरमन्दिरनाम्ना प्रसिद्धमस्ति।[18]

देशजशैली– 'देशज' इत्यस्य शब्दस्य व्युत्पतिजन्यः अर्थस्तु 'देशे जातः इति देशजः' अर्थात् यासां मन्दिरनिर्माणशैलीनां हिमाचले एव समुद्भावोऽभूत् ताः अस्याम् अन्तर्भवन्ति। हिमाचलस्य कुल्लूशिमलादि जनपदेषु बहूनि एतादृशानि मन्दिराणि सन्ति येषां स्वरूपं पूर्णतया भिन्नमस्ति पुनश्च अस्याः समुद्भावः हिमाचले एव जातः तस्मादियं देशजशैली वक्तुं शक्यते। आचार्यवैद्येन स्वशोधपत्रे अस्याः नामोल्लेखस्तु कृतः किन्तु व्याख्या नैव प्रस्तुता । तस्मात् व्युत्पत्याधारेणैव अस्याः स्पष्टीकरणमत्र स्वीकृतम्।

मिश्रितशैली– यथा नाम्नैव ज्ञायते यदि कस्मिन्नपि मन्दिरे एकया सह अपरायाः शैल्याः लक्षणमपि दृश्यते तर्हि तत्र मिश्रितशैली भवति । हिमाचलेऽपि अस्यां मन्दिराणि निर्मितानि सन्ति इति किशोरीलालवैद्यमहोदयः स्वीकरोति ।पुनश्च अन्तर्जालमाध्यमेनापि मिश्रितशैल्याः प्रमाणिकता सिध्यति।[19]

मन्दिरनिर्माणशैलीसन्दर्भे आचार्यकेशवस्य विचारः– आचार्यकेशवशर्मणापि मन्दिरनिर्माणशैल्यां दृष्टिपातः कृतः वर्त्तते। तन्मते तु हिमाचले निर्मितानि मन्दिराणि प्राचीनवास्तुशास्त्रानुसारमेव निर्मितानि सन्ति, येन एतानि सुरसंस्कृतेः संरक्षणे समर्थानि विद्यन्ते–

देवालया अचलवास्तुविशिष्टशैल्या शैलोन्नताः कुशलशिल्पिजनैः प्रणीताः।
आधारभित्तय इव श्रुतिधर्मसेतोः सञ्चारयन्ति सुरसंस्कृतिरीतिमद्रौ।।[20]

अस्य आशयः वर्तते यत् हिमाचलस्य देवालयाः पर्वतमिव समुन्नताः कुशलैश्च शिल्पिकारैः निर्मिताः विद्यन्ते। इयं विशिष्टा पर्वतीया वास्तुशैली विद्यते। एतानि मन्दिराणि सुरसंस्कृतेः सञ्चारं कुर्वन्ति । पुनः एतानि श्रुतिधर्मसेतोः आधारभित्तय इव शोभन्ते।

वास्तुशास्त्रस्य प्राचीनेषु ग्रन्थेष्वपि मन्दिरस्य गर्भगृहविषये तोरणादीनाञ्च विषये विस्तृतं विवरणं प्राप्यते। उदाहरणस्वरूपम् अत्र केचन श्लोकाः उपस्थाप्यन्ते–

देवतानां गर्भगेहं वास्तुभूमिवशान्मतम्। दीर्घं वा चतुरश्रं वा धनुर्वद्गजपृष्ठकम्।।
दण्डद्वयं तद्विगुणं गर्भगेहप्रमाणकम्। एकैकभागवृद्ध्याः तच्चतुर्दशकसीमकम्।।
सालिन्द वा मुखद्वारं पंक्तिसोपानभासुरम्। दृढार्गलसमोपेतकवाटद्वयभासुरम्।।
दशहस्तादि तत्तुङ्गमानमुक्तं मुनीश्वरैः। कूटकोष्ठसमायुक्तं विमानैरपि मण्डितम्।।
द्वारमानक्रमेणैवं भित्तिमानश्च कल्पयेत्। एक प्रकारमथवा प्राकारत्रयभासुरम्।।[21]

वास्तुशास्त्रे प्रतिपादितानि एतानि लक्षणानि हिमाचलस्य मन्दिरेष्वपि दृश्यन्ते तस्मात् आचार्यकेशवशर्मण: कथनं युक्तियुक्तमस्ति इति सिद्धं भवति।

निष्कर्ष:- हिमाचलप्रदेश: देवभूमिनाम्ना विश्वप्रसिद्धोऽस्ति अत्र ग्रामे ग्रामे देवानां विपुलानि मन्दिराणि लसन्ति। एतानि विविधनिर्माणशैलिभिरलङ्कृतानि सन्ति। मुख्यरूपेण नागरशैली अत्र प्रसिद्धा दृश्यते। हिमाचले नागरशैल्या: नामान्तरणं शिखरशैलीति प्राप्यते। कानिचित् मन्दिराणि मिश्रितशैल्यामपि निर्मितानि सन्ति तेषामपि समुल्लेख: अस्मिन् कृतमस्ति।

पादटिप्पणी

1. हि.क.वै.- पृ.सं. 103
2. अ.हि.-पृ.सं. 189
3. httpsÑ//www.abvlive.com/gk/ayodhya-ram-mandir-what-is-surya-tilak-how-does-this-system-work-and-in-temples-2661148
4. अ.हि.- पृ.सं. 189-191
5. अ.हि.- पृ.सं. 190
6. अ.हि., पृ.सं. 190-191
7. कश्चित् जनविशेष: यस्मिन् देव: प्रविश्य स्वविचारान् प्रकटयति।
8. अ.हि.,पृ.सं. 191
9. हिमाचल के सन्दर्भ में मन्दिर स्थापत्य के इतिहास और परम्परा के अन्तर्गत किन्हीं शैलियों के विवेचन से पूर्व यह जानना आवश्यक है कि सम्पूर्ण भारत में कौन-सी प्रमुख शैलियाँ प्रचलन में रही हैं। इस प्रकार की तीन शैलियाँ हैं, जिनका सम्बन्ध क्रमश: उत्तरी, मध्य भारत और दक्षिणी भारत से रहा है। उत्तरी भारत अर्थात् विंध्य पर्वतमाला से ऊपर के भाग में नागर शैली का उद्भव और विकास हुआ। यह शैली 'आर्यवर्त शैली' के नाम से भी अभिहित है। द्वितीय चालुक्य शैली कहलाती है, जो उत्तर और दक्षिण के मध्य क्षेत्र अर्थात् पश्चिम भारत, दक्षिण और मैसूर का प्रतिनिधित्व करती है। तीसरी द्रविण शैली के नाम से ज्ञात है, जिसका संबंध तमिलनाडु और उत्तरी श्रीलंका से है।'।। हि.क.वै.- पृ.सं. 102।।
10. अनुमानत: हिमाचल प्रदेश में सभी छोटे-बड़े मंदिरों की कुल संख्या लगभग 6000 है। लेकिन ऐसे मन्दिर, जो किसी विशिष्ट आकार की परिचायक संरचनाएं हैं, उनकी संख्या 2000 के आस-पास आँकी गई है। इन मन्दिरों के विश्लेषण से पूर्व इन्हें स्थापत्य की दृष्टि से प्रमुखत: ग्यारह वर्गों में विभाजित किया जा सकता है: 1. शिखर (नागर) 2. पैगोड़ा (मेरु) शैली 3. गुम्बद शैली 4. पिरामिड शैली 5. ढलवाँ आच्छादन(छत) शैली 6. समतल आच्छादन शैली 7. मीनार (टावर, दुर्ग, बुर्ज आदि) शैली 8. बौद्ध विहार अथवा गोंपा शैली 9. गुहा शैली 10. देशज शैली 11. मिश्रित शैली।।। हि.क.वै.- पृ.सं. 103।।
11. ।। हि.क.वै.- पृ.सं. 106।।
12. हि.क.वै.- पृ.सं. 106
13. हि.क.वै.- पृ.सं. 111
14. हि.क.वै.- पृ.सं. 114-117
15. httpsÑ//www-himachalonline-in.translate.goog/about/tourism/religious-spots/architecture-of-temple-in-himachal-pradesh?_&_tr_sl=en&_&_tr_tl=hi&_&_tr_hl=hi&_&_tr_pto=tc
16. httpsÑ//www.iasbook.com/hindi/himalayi-mandir-sthapatya-ki-visheshtayen/
17. httpsÑ//hindi.livehistoryindia.com/story/amazing-india/key-monastery/
19. हिमाचल: यहां गुफानुमा प्राकृतिक मंदिर में दिखती हैं शिव की जटाएं, सतयुग से जुड़ा है बेहद रोचक किस्साव - Himachal Pradesh Kangra Trilokpur Shiva Temple Famous for Natural Shivling Jagran Special
20. 7वीं शताब्दी के मध्य के उपरांत मन्दिर स्थापत्य की एक मिश्रित शैली - IASbook
21. हि.वै.-1.53
22. वि.वा.शा.- 11.20-24

सन्दर्भग्रन्थसूची

1. बलोखरा, जगमोहन: अलौकिक हिमाचल प्रदेश, H.G.PUBLICATIONS, नई दिल्ली, 2015
2. वैद्य किशोरी लाल: हिमाचल का कला वैभव, हिमाचल कला संस्कृति भाषा अकादमी, शिमला, 2016
3. प्रो. शर्मा, केशवराम:हिमाचलवैभवम्, मान्यता प्रकाशन, नई दिल्ली, 2009
4. डॉ. 'जुगनू' श्रीकृष्ण: एवं प्रो.शर्मा बी.एल: विश्वकर्मवास्तुशास्त्रम्, परिमल पब्लिकेशन्स, शक्ति नगर दिल्ली, 2010

सहायकाचार्य: (साहित्यम्)
के.सं.वि.वि.वेदव्यासपरिसर:, बलाहर: (हि.प्र.)

ISSN 2348-7828

सूर्यसिद्धान्तोक्तः सृष्टिनिर्माणक्रमः

डॉ. अरुणकुमारः

शोधसारः- सूर्यसिद्धान्तानुसारं सृष्ट्यादौ अस्मिन् ब्रह्माण्डे पञ्चविंशतितत्त्वात्परः परब्रह्मस्वरूपः वासुदेवः आसीत्। अत्र वसुदेवस्यापत्यं पुमान् वासुदेवः इति व्युत्पत्या भगवतः कृष्णस्य बोधो भवति, किन्तु गूढार्थप्रकाशकारेण आचार्यरङ्गनाथेन वासुदेवस्य व्युत्पत्तिविषये उक्तं यत् - न हि वुदेवस्यापत्यमिति विग्रहः। तस्य जगत्कारणता निरूपणावसरेऽनुप्रयोगात्। अतोऽत्र वसत्यस्मिन् जगत् समस्तमसौ, वा समस्ते विश्वस्मिन् वसतीति वासुः। इत्यादिना परब्रह्म सच्चिदानन्दः विश्वव्यापकः वासुदेवः सिद्ध्यति। अयं वासुदेवः परं ब्रह्मस्वरूपः, पुरुषोत्तमः, अतीन्द्रियः, निर्गुणः, शान्तः, नित्यः पंचविंशं तत्त्वं जीवस्तस्मात् परः पुरुषः (वासुदेवः) मन्यते। यथा[1]-

मूलं प्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।

कूटशब्दाः-सृष्टिः, सूर्यसिद्धान्तः, ज्यौतिषम्, संस्कृतवाङ्मय, हिरण्यगर्भः।

तस्य वासुदेवाख्यस्य परब्रह्मणो अंशः (संकर्षणः) मायोपहितः बहिरन्तरगश्च सर्वगः (वासुदेवांशत्वाद् सर्वव्यापक इत्यर्थः) उक्तलक्षणयुक्तः संङ्कर्षणो देवः आदौ जलानि सृष्ट्वा तासु वीर्यं-शक्तिविशेषं अवासृजत्। यथा सूर्यसिद्धान्ते[2]-

वासुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः।
अव्यक्तो निर्गुणः शान्तः पञ्चविंशात् परोऽव्ययः।।
प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः।
सङ्कर्षणोऽपः सृष्ट्वादौ तासु वीर्यम् अवासृजत्।।

तदप्सु प्रक्षिप्तं वीर्यं अन्तर्बहिश्च सर्वत्र तमसा आवृतं सौवर्णसदृशं अण्डं गोलाकारं पिण्डरूपम् अभवत्। ततः सौवर्णाण्डात् सर्वादौ व्यक्तिभूतः (अभिव्यक्तः) सनातनपुरुषः उत्पन्नः। एष अनिरुद्धाख्यः षडैश्वर्यसम्पन्नः भगवान् वेदे हिरण्यगर्भः निरूप्यते। अयमेव आदिभूतत्वाद् आदित्यः तथा प्रसूत्या सूर्य उच्यते। यथा[3]-

तदण्डमभवद् हैमं सर्वत्र तमसावृतम्।
तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः।।

अयं संकर्षणांख्यो भगवाननिरुद्धो वेदे हिरण्यगर्भनाम्ना ज्ञायते। यथा[4]-

हिरण्यगर्भ समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम्।।

सर्वतः प्रथममभिव्यक्तत्वादयमनिरुद्धो आदित्य इत्युच्यते। जगदुत्पत्तितया अयं सूर्य इत्युच्यते। वेदे प्रसिद्धोऽयम्[5]-

आप्प्राद्यावापृथिवीऽअन्तरिक्षं सूर्यऽआत्माजगतस्त्थुषश्च।।

तस्यानिरुद्धस्य नामान्तराण्यत्र कथितम्[6]-

हिरण्यगर्भो भगवानेषच्छन्दसि पठ्यते।
आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते।।

ज्योतिश्शास्त्रस्य सुप्रसिद्धे ग्रन्थे बृहत्पराशरहोराशास्त्रेऽपि मैत्रेयपराशरसंवादे सृष्टिक्रमनिरुपणं वर्तते। पराशरमुनिः मैत्रेयं प्रति कथयति यत् स अनादिः प्रभुः सर्वव्यापकः जगत्कारकः शुद्धः निर्गुणोऽपि भूत्वा सगुणो वर्तते। सः स्वैकांशेन जगतः सृष्टिं करोति पालयति च। तत्त्वदर्शिनः महात्मन एवास्यामृतस्वरूपात्मकं पादत्रयं जानन्ति। व्यक्ताव्यक्तरूपविष्णुरेव वासुदेवोऽस्ति[7]-

एकोऽव्यक्तात्मको विष्णुरनादिः प्रभुरीश्वरः।
शुद्धसत्त्वा जगत्स्वामी निर्गुणस्त्रिगुणान्वितः।।
संसारसंहारकः श्रीमान्निमित्तात्मा प्रतापवान्।
एकांशेन जगत्सर्वं सृजत्यवती लीलया।।
त्रिपादं तस्य देवस्य ह्यमृतं तत्त्वदर्शिनः।
विदन्ति तत्प्रमाणं च सप्रधानं तथैकपात्।।

व्यक्ताव्यतात्मको विष्णुर्वासुदेवस्तु गीयते।
यदव्यक्तात्मको विष्णुः शक्तिद्वयसमान्वितः।।

अयमेव अनिरुद्धाख्यः सूर्यः अन्धकारमये विश्वे उत्कृष्टः ज्योतिरूपः आसीत्। अयमेव ज्योतिरूपः सूर्यः सविता नाम्ना उच्यते। एष सविता विश्वोत्पत्तिस्थितिप्रलयकारकः भुवनानि प्रकाशयन् परितो भ्रमति। एष सविता प्रकाशात्मा तमोहन्ता महत्तत्त्वं च वेदेषु विख्यातः।

अस्य सूर्यस्य ऋचः (ऋग्वेदः) मण्डलम्, सामानि (सामवेदः) किरणाः, यजूँषि च (यजुर्वेदः) स्वरूपम् उच्यते। अयं वेदत्रयात्मको भगवान् कालात्मा, कालकृत्, सर्वात्मा, सूक्ष्मः, सर्वत्रव्यापकः कथ्यते। अस्मिन्नेव हिरण्यगर्भे सूर्ये सर्वं विश्वं प्रतिष्ठितम् आसीत्। यथा सूर्यसिद्धान्ते[8]–

परं ज्योतिस्तमः पारे सूर्योऽयं सवितेति च।
पर्येति भुवनान्येष भावयन् भूतभावनः।।
प्रकाशात्मा तमोहन्ता महान् इत्येष विश्रुतः।
ऋचोऽस्य मण्डलं सामान्युस्त्रामूर्तिर्यजूंषि च।।
त्रयीमयोऽयं भगवान् कालात्मा कालकृद् विभुः।
सर्वात्मा सर्वगः सूक्ष्मः सर्वमस्मिन् प्रतिष्ठितम्।।

अयं हिरण्यगर्भाख्यः सूर्यः विश्वमये रथे संवत्सरात्मकं (वर्षरूपं) चक्रं कृत्वा तत्र छन्दांसि गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीरूपाणि सप्ताश्वान् नियोज्य सर्वदा पर्यटति[9]। अस्य वेदात्मनः सूर्यस्य पादत्रयम् अमृतम् (अनश्वरं) तस्माद् अगम्यं वर्तते। अस्य एव सूर्यस्य स्थावरजङ्गमात्मको विश्वरूपः चतुर्थचरणः प्रकटोऽभवत्। यथा सूर्यसिद्धान्ते[10]–

त्रिपादममृतं गुह्यं पादोऽस्य प्रकटोऽभवत्।

वेदेष्वपि प्रतिपादितं यत्[11]–

त्रिपादूर्ध्वम् उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशनेऽभि।।

अपि च[12]– **त्रिपादोऽस्य विश्वाभूतानि त्रिपाद्यामृतं दिवि।**
त्रिपादूर्ध्व उदैतेपुरुषः पादोऽस्येहाभवत् पुनः।। इति

अयमेव हिरण्यगर्भाख्यः भगवान् भूतभावनोऽनिरुद्धः सर्वशक्तिसम्पन्नः अहङ्कारतत्त्वरूपं ब्रह्माणं जगत्सृष्ट्यै असृजत्। यथा–सोऽहंकारं जगत्सृष्ट्यै ब्रह्माणमसृजत् प्रभुः[13]।। ननु 'सूर्य–चन्द्रमसौ धाता यथापूर्वमकल्पयत्' इति श्रुतिवाक्याद् ब्रह्मकर्तृकसूर्योत्पत्तिः कथ्यते, किन्त्वत्र सूर्यो ब्रह्माणमुत्पादयामास इति कथं सङ्गच्छते? अस्य संशयस्य निराकरणार्थम् उच्यते–यस्तु ब्रह्माकल्पितः सूर्यः सः 'चक्षोः सूर्यो अजायत' इति वाक्येन ब्रह्मणो दृग्गोचरो भवति। न तु सूर्यो ब्रह्मणोत्पादितो भवति। अत एवाह आचार्यभट्टकमलाकरः–ब्रह्मा न सूर्यादधिकः कथञ्चिद्[14] इति। बृहत्पराशरे स सत्वगुणप्रधानेश्वरोऽनिरुद्धनाम्ना कथ्यते तथा तस्मादहंकारस्वरूपस्य ब्रह्मण उत्पतिरत्र कथिता[15]–

अनिरुद्धात् स्वयं जातो ब्रह्माहंकारमूर्तिधृक्।
सर्वेषु सर्वशक्तिश्च स्वशक्त्याऽधिकया युतः।।

ततः स्वोत्पादितब्रह्मणे विश्वोत्पादनपद्धतिरूपान् वेदान् प्रदाय तं सर्वेषां लोकानामादिभूतं ब्रह्माणं तदण्डमभवद् हैमम् इति पूर्वोक्तसुवर्णाण्डमध्ये प्रतिष्ठाप्य–'अत्रस्थेन त्वया विश्वानि स्रष्टव्यानि' इत्युक्त्वा च स्वयं भुवनानि प्रकाशयन् परिभ्रमति। यथा[16]–

तस्मै वेदान् वरान् दत्वा सर्वलोकपितामहम्।
प्रतिष्ठाप्याऽण्डमध्येऽथ स्वयं पर्येति भावयन्।।

ततः सोऽहंकारमूर्तिभृत् ब्रह्मा जगदुत्पादने मनश्चक्रे। अर्थात् मया सृष्टिः कर्तव्या इति तस्य मनसि इच्छा जाता। ततः तस्य मनसः सकाशात् चन्द्रमाः समुत्पन्नः। चन्द्रो भवतु इति तस्य मनसैव चन्द्रमा उत्पन्न इति भावः। तन्नेत्राभ्यां तेजसां निधिः सूर्यः प्रत्यक्षोऽभवत्। ततः तस्यैव ब्रह्मणो मनसः सकाशात् खं (आकाशं), ततो वायुः, ततो अग्निः, अग्ने आपः, अद्भ्यः धरा इति यथाक्रममं गुणैकवृद्ध्या पञ्चसंख्यकानि महाभूतानि जातानि। यथा[17]–

अथ सृष्ट्यां मनश्चक्रे ब्रह्माऽहंकारमूर्तिभृत्।
मनसश्चन्द्रमा जज्ञे सूर्योऽक्ष्णोस्तेजसां निधिः।।

ऋग्वेदीयपुरुषसूक्तेऽपि मनसश्चन्द्रोत्पत्तिस्तथा नेत्रयोः सूर्यस्योत्पत्तिः कथिता[18]–

चन्द्रमा मनसो जातश्चक्षो: सूर्यो अजायत्

तत्र ब्रह्मणो मनस: सकाशादाकाश: समुत्पन्न:, आकाशाद् वायु:, वायुतोऽग्नि:, ततो अग्नित: आप:, अद्भयो पृथ्वी, यथोक्तक्रमेण गुणानामेकैकवृद्धिक्रमेण पञ्चमहाभूतानि समुद्भूतानि। आकाशं शब्दगुणसहितं शब्दस्पर्शसहितगुणद्वयोपेतो वायु:, शब्दस्पर्शरूपात्मक-गुणत्रयसमेतोऽग्नि:, शब्दस्पर्शरूपरसात्मकगुणचतुष्टययुतं जलं, शब्दस्पर्शरूपरसगन्धात्मकगुणपञ्चसमेता पृथ्वीरिति पञ्चमहाभूतानामुत्पत्तिर्जाता। पुन: सूर्यादिग्रहाणामुत्पत्तिरपि पञ्चमहाभूतादेव सञ्जाता। तद्यथा पूर्वमपि उक्तं यत् सूर्योऽग्निस्वरूप: सोमस्वरूपश्चन्द्र:। अग्नितत्वात् सूर्यस्योत्पत्तिस्तथा जलतत्त्वाच्चन्द्रस्योत्पत्तिरभवत्। भौमादय: पञ्च ताराग्रहा: तेजोभूखाम्बुवायुभ्य: क्रमादुत्पन्ना:। यथा भौमस्तेजस उत्पन्न:, भूमितो बुधो, बृहस्पतिराकाशात्, जलात् शुक्रस्तथा शनैश्चर: वायुतत्त्वादुत्पन्न:। यथा[19]-

मनस: खं ततो वायुरग्निरापो धरा क्रमात्।
गुणैकवृद्ध्या पञ्चेति महाभूतानि जज्ञिरे।।
अग्निषोमौ भानुचन्द्रौ ततस्त्वङ्गारकादय:।
तेजोभूखाम्बुवातेभ्य: क्रमश: पञ्च जज्ञिरे।।

पुन: ग्रहाणां सृष्टे: पश्चात् सर्वं वशं विद्यते यस्य स वशी अर्थात् स्वतन्त्रो ब्रह्मा आत्मानं तुल्यद्वादशभागेषु विभज्य राशिचक्रं सृष्टवान्। पुन: नक्षत्ररूपिणं सप्तविंशतिविभागात्मकं नक्षत्रचक्रं व्यभजत्[20]-

पुनर्द्वादशधाऽऽत्मानं विभजेद् राशिसंज्ञकम्।
नक्षत्ररूपिणं भूय: सप्तविंशात्मकं वशी।।

ग्रहर्क्षसृष्ट्यनन्तरं श्रेष्ठमध्याधमेभ्य: स्त्रोतोभ्य: सत्व-रजस-तमसविभेदात्मिकां प्रकृती: सृजन् देव-मनुष्य-पशुपक्षिकीटादिकं चराचरं विश्वं निर्ममे। अर्थात् पञ्चमहाभूतानां सत्वगुणेन सह संयोगेन उत्तमा सृष्टि:, पञ्चमहाभूतानां रजगुणेन सह संयोगेन मध्यमा सृष्टि: तथा च पञ्चमहाभूतानां तमगुणेन सह संयोगेन अधमा सृष्टिरुत्पन्ना इत्याशय:।

इत्थं गुणकर्मविभागेन (सत्वरजतमोरूपाणां गुणानां, पूर्वजन्मार्जितानां शुभाशुभकर्मणाञ्च विभागेन) देवादिकं यथास्वं सृष्ट्वा वेदप्रतिपादितात् पूर्वसृष्टिकल्पादिसृष्टिक्रमात् सर्वशक्तिसम्पन्नो ब्रह्मा ग्रहनक्षत्रताराणां, भूमे:, समस्तस्वर्लोकादिकस्यापि देवासुरमनुष्याणां, सिद्धानां च विभागं कल्पयामास। यथा सूर्यसिद्धान्ते[21]-

गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात्। विभागं कल्पयामास यथास्वं वेददर्शनात्।।
ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभु:। देवासुरमनुष्याणां सिद्धानां च यथाक्रमम्।।

इत्थं सृष्टिनिर्माणे ब्रह्मण: 47400 दिव्याब्दा: व्यतीता:। यथोक्तं सूर्यसिद्धान्ते-

ग्रहर्क्षदेवदैत्यादिसृजतोऽस्य चराचरम्।
कृताद्रिवेदा दिव्याब्दा: शतघ्ना: वेधसो गता:।। इति ।।

पादटिप्पणी

1. सांख्यकारिका - 3
2. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 12-13
3. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 14
4. ऋग्वेद: - 10.121.1
5. शुक्लयजुर्वेद: मैत्रसूक्तम्- 7
6. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 14
7. बृहत्पराशरहोराशास्त्रम्. अध्याय: -1, श्लो.-9-12
8. भूगोलाध्याय:, श्लो. - 16-18
9. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 19
10. सूर्यसिद्धान्त: - भूगोलाध्याय:, श्लो. - 20
11. ऋग्वेद: पुरुषसूक्तम् - 4
12. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 20 (आचार्यकपिलेश्वरशास्त्रिकृतश्रीतत्वामृतटीकायाम्)
13. सूर्यसिद्धान्त: - भूगोलाध्याय:, श्लो. - 20
14. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 20 (आचार्यकपिलेश्वरशास्त्रिकृतश्रीतत्वामृतटीकायाम्)
15. बृहत्पराशरहोराशास्त्रम् - 1.17
16. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 21
17. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 21
18. ऋग्वेद:, पुरुषसूक्तम् - 12
19. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 23-24
20. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 26
21. सूर्यसिद्धान्त:, भूगोलाध्याय:, श्लो. - 27-28

सहायकाचार्य:, परीक्षाविभाग:,
केन्द्रीयसंस्कृतविश्वविद्यालय:, नवदेहली

ISSN 2348-7828

विद्यावाचस्पतिरामचन्द्रमिश्रस्य परिचयः

पर्यवेक्षकः-डॉ. कृष्णकान्त झा, गवेषकः-रंजेश्वर झा

स सृष्टिवन्द्यो महतां सुधीनां गुरुर्मनीषी कविरामचन्द्रः।
यत्काव्यपीयूषरसप्रवाहस्वादामितानन्द मयो हि लोकः।।[1]

शोधसारः-संस्कृतसाहित्यस्य कविषु महाकविकालिदास- अश्वघोष- भारवि- माघ- भास भवभूतीनाञ्च नाम सर्वाग्रगण्यम् आयाति। एषां कवीनामनन्तरं गतशताब्द्यां कविवरविद्यावाचस्पतिरामचन्द्रशर्म्मणः स्थानं सर्वोपरि समुल्लेखितमस्ति। एषां कविवराणामेव परिचयं प्रकृतालेखस्य अत्राभीष्टम्-

आर्यावर्त्तीयभारतदेशस्य बिहारप्रान्तान्तर्गते मिथलामहीमध्ये सीतामढ़ी मण्डलस्य पकड़ी नामके ग्रामे मैथिलब्राह्मणानां शाखास्वन्यतमायां पञ्जीबद्धशाखायां मरड़े बेलौंच मूलकः काश्यपगोत्रीयः श्रीमन्मधुसूदनमिश्रस्य सुपुत्ररूपे विद्यावाचस्पतिः प. रामचन्द्रमिश्रः समाविशत्।[2]

कूटशब्दाः-संस्कृत साहित्यम्, मिथिलापरम्परा, कथा, नाटकम्, रामचन्द्रमिश्रः, कृतित्वम्।

महाकवीनां वंशपरिचयः जीवनवृत्तञ्च-मैथिलब्राह्मणानां शाखास्वन्यतमायां पञ्जीबद्धशाखायां कन्हाईमिश्रनामा एषां प्रपितामहो दरभर्तमण्डलस्य (यदानीं समये महाकवीनाञ्जन्म तदानीन्तु दरभर्तमण्डलमेव चासीत् नहि तु सीतामढ़ी मण्डलं किन्तु इदानीं तत् सीतामढ़ीमण्डलमेव) विद्याविदग्रगैः परिवृते ''ठाढी'' नामके ग्रामे वसतिञ्चक्रे। स स्वयं पण्डितवृत्तिकतया साधारणभूसम्पत्तिरभवत्। तस्यैक एव पुत्रः परमसात्त्विकः छित्तनमिश्र इति प्रसिद्धः, कन्या चैका जज्ञे।

कन्या सा मुजफरपुर् समीपवर्त्तिना चिकनौटा नामग्राममधिवसता प. विक्रम झा शर्म्मणा परिणिन्ये। तत्पुत्राः प्रसिद्धाः प. लाल जी शर्म्म- प. किशोरी शर्म्म प्रभृतयश्चत्वारो विद्याभासुराः समजायन्त।

एतेषां पितामहश्छित्तनमिश्रो बाल एव मृतपितृकतया स्वमनाथमिवानुभवन्दूरसम्बन्धेऽपि, सस्वेनोदारहृदयतया च ख्यातेन शीतलादत्त वर्माभिधेन पकड़ी-वर्त्तिभूसम्पत्तिना पकड़ीग्राममानीय निवासितः। तदवधि एषां पकड़ीग्राम एव ग्रामोऽभवत्।

तस्मिन्नेव ग्रामे वसन् कवीनां पितामहः चिकनौटावर्त्तिनः स्वावुत्तस्य विक्रमशर्म्मणोऽनुरोधेन चानपुरावासिनो वेणीदत्तशर्म्मणस्तनयां नाम्ना पर्यणैषीत्। सा च प्रथमं पुमपत्यं कविवराणां पितरं मधुसूदन मिश्रमापत् प्रथमपुत्रतया स्नेहवशेन सा एषां तातं क्वचन दूरस्थे ग्रामेऽध्ययनार्थं गन्तुन्नानुमेने। न च कश्चन प्रबन्धः समीपवर्त्तिनी ग्रामेऽ वर्त्तत। तेन एषां पिता सम्प्रपद्याप्याजानिकीं प्रतिभां शिक्षाक्षेत्रं ना चस्कन्दे। विलक्षण- स्मरणशक्तिकतया स्वाभाविकधार्मिकप्रवृत्तिकतया च स समाजे समाद्रियमाणो गृहस्थभावेन रममाणश्च स्वानुजन्मभिर्दृढास्थयाऽऽद्रियमाणः परमशैवश्चाऽवर्त्तत।

आसादितवयसस्तस्य विवाहः मुंगेरमण्डलान्तर्गतं तिलडीहा ग्रामं भूषितवतो वैयाकरणप्रवरस्य भूपनाथ झा शर्म्मणः प्रथमतनया ''जयमणि'' नाम्ना विश्रुत्या सह समजनि। परमसरलहृदयायास्तस्यास्तिस्रः सन्ततयो न कैशोरदशामप्यासादयन्, परं द्वौ जनौ जीवनस्य मध्याह्नमपि (एकस्तु विद्यावाचस्पतिरामचन्द्रमिश्रः) दृष्टवन्तौ। चिरजीविन्योस्तत् सन्तत्योः प्रथमा कन्यका उग्रतारा नामाभवत् द्वितीयश्च रामचन्द्रमिश्रः। एषां स्वसा एषामपेक्षया वर्षचतुष्टयाधिकवया परमबुद्धिमती श्रमशीला दयालुहृदयेचति संहत्य तामादर्शवनिताभावेन लोको बहुमानभाजनं व्यदधत्।

आवयोः पित्रा सस्नेहं पाल्यमानयोर्मात्रादिपरिजनेन च सप्रतीति पोष्यमाणयोः बाल्यमक्षरारम्भादिकतया क्रियया कृतोपक्रममेव यावदवर्त्तत, यावदेषां स्वसा परिणययोग्यामवस्थां कवयश्च व्रतबन्धनसमुपयुक्तां नाधिगतौ तावदेवाकाले एषां पिता स्वर्गतः।[3]

महाकवीनां जीवनवृत्तस्य विषये-बाल्यावस्थातः युवावस्थां यावत् पितुः स्वर्गगमनानन्तरम् इतस्ततः स्वसम्बन्धिनां सामीप्यं भ्रामयित्वा व्याकरणसाहित्यादिविविधशास्त्रान् पठितवन्त कविवराः। नित्यसन्ध्योपासकाः नित्यधर्मानुचारिणः ससमयं पठित्वा समुचितसमये एव अध्यापनपरायणाः कालान्तरेण यथास्थानम् अध्ययनम् अध्यापनं मध्ये च खलु काव्यादिग्रन्थान् विरचितवन्तः। महाकविभिः स्वमातुलेन प. श्रीनाथ झा शर्म्मणा गुरूवरेण सम्पूर्णसिद्धान्तकौमुदी कण्ठस्थी कृता। स्वगुरुं मातुलं प. श्रीनाथ झा शर्म्माणं महाभागं प्रति एतत्प्रशंसा अनेन शब्देन कृता-

अथ चाक्षुषी चमत्कृतसंस्कृतभाषाप्रयोगेषु। उन्मीलिते अभूतां श्रीश्रीनाथाख्यविबुधस्य।। मम मातुलस्य चरणौ निषेवमाणस्य न चिरेण।[4]

महाकवीनां कालक्रम:–संस्कृतसाहित्यस्य प्राचीनकवीनामिव एषां खलु विद्यावाचस्पतिरामचन्द्रमिश्रशर्म्मणां समयस्य विषये किञ्चित् परोक्षं नास्ति अपितु सर्वजनविदितमेव। एषां कालक्रम: क्रमश: अध: प्रस्तूयते–

(i) 12–3–19011–तमेशवीयवर्षस्य फाल्गुनशुक्लत्रयोदश्यां रविवासरे एषाञ्जन्म।[5]

(ii) 15–5–1918– तमेशवीयवर्षस्य वैशाखशुक्लपञ्चम्यां बुधवासरे एषां पितृणां तातपादानां स्वर्गतिरिति अष्टमवर्षे प्रारब्धमात्रे।[6]

(iii) वर्षे व्यतीते समाप्ते गुरूपातके–1919 तमेशवीयवर्षस्य ज्येष्ठशुक्लपक्षे एषां स्वसा सौभाग्येन चकफतेहावासिना प. ईश्वरनाथ झा शर्म्मणा पाणिग्राहितवती। सोऽयं वर पश्चात् एषां गुरुरपि जात:, तत्परवर्षे एषामुपनयनमपि जातम्।[7]

(iv) 1920 तमेशवीयवर्षस्य वैशाखे एषां स्वसुर्द्विरागमनं जातमिति भ्रात्रा मया प्रथमानुसारं तया सह गतम्। चकफतेहाग्रामस्तदा संस्कृतविद्याया: प्रधानं क्षेत्रमवर्त्तत। तत्रैव संस्कृतपाठशालायां प. झिर्तुर झा शर्म्मण: एषा अध्ययनसाधना प्रारभत्।

(v) 1923–तमेशवीयवर्षस्य चैत्रमासे प्रथमापरोक्षतीर्णमनन्तरं ते स्वमातुलेन प. श्रीनाथ झा महोदयेन सिद्धान्तकौमुदीं पठनाय तिलडीहा गतवन्त:।[8] स्वगुरूणा मातुलेन–चतुर्दशमासावधि: निरन्तरं सिद्धान्तकौमुद्या: अध्ययनानन्तरं स्वग्रामस्य स्थिताया पुपरी पाठशालायां प. ईश्वरनाथ झा (भगिनीपतिना) अग्रिमाध्ययनस्य प्रारब्धं कृतम्। 1926–तमेशवीयवर्षे मध्यमाकक्षा शास्त्रीकक्षायाम् अध्ययनं प्रारब्धितम्। तस्मिन्नेव वर्षे प. ईश्वरनाथ झा महाभागस्य नियुक्ति:– शारदा– संस्कृत विद्यालय:, नवानी (तमुरिया, जिला मधुवन्यां व्याकरणाध्यापकस्य पदे अभवत्। तेऽपि तत्र अध्ययनाय गुरूणा सह गतवन्त: नवानी ग्रामे।[9]

(vi) 1928– तमेशवीयवर्षे वर्तीयसंस्कृतपरिषदा स्वतन्त्रछात्रस्य रूपे काव्यतीर्थस्य परीक्षोत्तीर्णवन्त:।

(vii) धर्मसमाजसंस्कृतमहाविद्यालय: मुजफ्फरपुर– 1929 ई. तमे वेदान्तविषये पुन: मध्यमापरीक्षोत्तीर्णा विषयस्यास्यैव शास्त्रीकक्षायां नामतिभूय वेदान्तेन सत्र व्याकरणशास्त्रीयाध्ययनमपि अचलत्। अस्मिन्नेव मध्ये–1927 तमेशवीयस्य चैत्रमासे शिवनगर: जिला सीतामढ़ी इत्यस्य एकया कुलीनकन्यया साकं एषां विवाहोऽपि भवति।[10]

(viii) 1932 ई. तमे व्याकरणाचार्ये, 1932 ई. तमे वेदान्तेन शास्त्री– नव्यन्यायेन च शास्त्री प्रथमखण्डोत्तीर्णम्।

(ix) रामेश्वरसंस्कृतविद्यालय: सीवाने अध्ययनकार्यं कुर्वता एषां 1935 ई. तमे वेदान्ताचार्यस्य 1937 ई. तमे साहित्याचार्यस्य परीक्षोत्तीर्णा कृता।

1933 ईश्वीये दिसम्बरमासे एषाम् अध्यापनकाल: प्रारब्ध:। अध्यापनस्य विवरणिका संक्षेपेण परिदृश्यते–

(1) व्याकरण .साहित्यस्य प्रधानाध्यापक:– रा.सं.वि. सीवान– दि.–1933 त: न. 1943 ई. यावत्।

(2) वेदान्ताध्यापक: ध.सं. म.वि. मुजफ्फरपुर– 3–12 1943 त: 10–10–1953 ई. यावत्।

(3) साहित्याध्यापक: रा.सं. महा. वि. राँची–2–11–1953 ई. त: 10–7–1958 ई. यावत्।

(4) साहित्याध्यापक:– ध.सं. महावि. मुजफ्फरपुर– जु. 1958 ई. त: 1962 ई. यावत्।

(5) व्याकरणाध्यापक: रा. सं. महावि. पटना– 1962 ई. त: 17–9–1969 ई. यावत्।

17–9–1969 ई. तमे वर्षे– 58– वर्षस्यावस्थायाम्' एषां सेवानिवृत्ति: जाता। पुन: मिथिलाशोधसंस्थाने प्राच्यपण्डितस्य रूपे एषां सेवा प्रारभ्ते–

(6) प्राच्यपण्डित:– मि. सं. शो.सं. दरभर्त–जनवरी– 1970 त: सितम्बर– 1974 ई. यावत्।

(7) विभागाध्यक्ष:– स्ना. साहित्य वि. का.सिं.द.सं. वि.का. दरभर्त– 2–10–1974 ई. त: 31–8–1981 ई. यावत्।

(8) सम्मानिताध्यापकेन सह केन्द्रीयपुस्तकालयस्य मातृका (पाण्डुलिपि:) दरभर्त–सितम्बर 1981 त: जुलाई– 1982 ई. यावत्।

(9) शास्त्रचूड़ामणि: (प्राध्यापक:)– स्ना. सा.वि.का.सिं. द.सं. वि. दरभर्त– जुलाई– 1982 त: 1985 ई. यावत्।[11]

(10) 6–10–1994– खीष्टवर्षे आश्विने मासि सिते पक्षे प्रतिपद् बुधवासरे शारदीयनवरात्रस्य प्रारब्धमात्रदिवसे (कलशस्थापने) वि.वा.आ. रामचन्द्रमिश्र: महाकवि: इहलोकं परित्यज्य गतोऽसि परमां गतिं अर्थात् स्वर्गत:।

विद्यावाचस्पतिरामचन्द्रमिश्राणां महाभागानां कृतित्वम्–स्वपारिवारिकस्य सामाजिकदायित्वस्य च निर्वहनेन सार्धं–सार्धं एषां सारस्वतसाधनाऽपि यावज्जीवनं निरन्तरम् अचलत्। यस्य फलस्वरूपं एषां रचनासम्पत्ते: एका दीर्घा सूची विद्यते। स्वस्याम् आत्मकथायां कवय: अलिखन्नपि यत् सम्पूर्णरचनाया: नियतसंख्या अस्मामं स्मरणेऽपि नास्ति।' आचार्य रामचन्द्र मिश्र रचना संग्रह: ''इत्यस्मिन् ग्रन्थे एषां खलु कवीनां रचनानां संग्रहाणां श्लाघनीय: प्रयासोऽभवत्। एतेषां महाकवीनां रचनासम्पत्ति: वर्गीकरणस्य दृष्ट्या चतुश्श्रेणीषु विभाजयिप्तुं कर्त्तुं शक्यते– (क) मौलिकरचना (ख) टीकापुस्तकानि (ग) सम्पादनम् (घ) विविधश्च।[12]

(क) **मौलिकरचना**-

(i) वैदेहीचरितम्! (महाकाव्यम्) - का.सिं. द.सं.वि.वि. दरभर्तत: प्रकाशितम्।

(ii) संस्कृतसाहित्यस्येतिहास: चौ. वि. वाराणसीत: प्रकाशित:।

(iii) प्रबन्धपारिजातम्- चौ. वि. भ. वाराणसी त: प्रकाशितम्।

(iv) याज्ञसेनी (महाकाव्यम्) आ.रा. रचना संग्रहे प्रकाशितम्- 72-88 तमे पृष्ठे।

(v) मिथिलावैभवम् (काव्यशास्त्रक्षेत्रे मिथिला) आ.रा. रचनासंग्रहे प्र. 157-190 तमे पृष्ठे।

(vi) विज्ञमहाराजम् (रूपकम्) आ.रा. रचनासंग्रहे प्र. 149-156 तमे पृष्ठे।

(vii) स्मृतिरेखा (आत्मकथा) का. सिं. द.सं. वि.वि. दरभर्तत: प्रकाशिता।

(viii) तरुकथा (लघुकाव्यम्) नागप्रकाशन, दिल्ली त: मूलपुस्तकप्रकाशिता।[13]

(ix) अर्चना (मैथिल विद्वत्परिचय:) आ.रा. रचनासंग्रहे प्रकाशिता।

(ख) **टीकापुस्तकानि**- विद्यावाचस्पतिरामचन्द्रमिश्रेण कृता: टीका: द्वाविंशति: समुपलब्धा:-(1) अनर्घराघवम् (2) अभिषेकनाटकम् (3) अमृतोदयम् (4) अविमारकम् (5) कादम्बरी (उत्तरार्धम्) (6) काव्यादर्श: (7) चम्पूभारतम् (8) चम्पूरामायणम् (9) चैतन्यचन्द्रोदय: (10) तर्कामृतम् (11) नीलकण्ठविजय: (चम्पूकाव्यम्) (12) पञ्चरात्रम् (13) प्रतिमानाटकम् (14) प्रबोधचन्द्रोदय: (15) प्रभावतीपरिणय: (16) प्रसन्नराघवम् (17) प्रियदर्शिका (18) महावीरचरितम् (19) मालविकाग्निमित्रम् (20) विक्रमोर्वशीयम् (21) विद्यापरिणयनम् (22) रत्नावली नाटिका च।

उपर्युक्तेषु यानि टीकापुस्तकानि तानि चौखम्भा विद्याभवनम् वाराणसीत प्रकाशितानि केवलन्तु त्रीणि पुस्तकानि तानि-प्रथमम्- तर्कामृतम्- चौ. ओरियन्टालिया वाराणसीत: प्रकाशितम्, द्वितीयम्- प्रतिमानाटकम्- चौ. सं. सीरीज ऑफिस, वाराणसी त: प्रकाशितम्, तृतीयञ्च- विद्यापरिणयनम्- चौ.सं.सी. वाराणसीत: प्रकाशितम्।[14]

(ग) सम्पादितानि पुस्तकादीनि- (क) आर्याद्विशती-मि.सं.शो.सं.दरभर्त। (ख) कुमारसम्भवम् का.सिं.द.सं.वि.वि. दरभर्त। (ग) कुसुमाञ्जलिकारिका-का.सि.द.सं.वि.वि. दरभर्त। (घ) लौकिकन्यायरत्नाकर:। (ङ) शशिनाथनिबन्धावली- का.सि.द.सं.वि.वि. दरभर्त। (च) हरविजयम्: का.सि.द.सं.वि. दरभर्त। (छ) विश्वमनीषा-त्रैमासिकी पत्रिका-संस्कृतम्-प्रकाशक: का.सि.द.सं.वि.वि. दरभर्त- प्रथममंकम्- 2-10-1974 ई. तमे प्रकाशितम्- निरन्तरं दशवर्षं यावत् अस्य सम्पादक:। (ज) म.म. वागीशर्म्मप्रणीतमाख्यातार्थविषयकं श्लोकशतकम्- ''आ.रा. रचनासंग्रहे'' प्रकाशितम्। (झ) प. शशिनाथ शर्म्मप्रणीतं ''खण्डनखाद्यस्य'' पद्यबद्धं रूपान्तरम्।[15]

(घ) विविधा:- (क) पत्रम् (21- पद्यात्मकम्), (ख) समस्यापूर्त्तय: (267 पद्येषु)[16] (ग) उद्बोधनम् (1-पद्य)। (घ) ग्रीष्म (11-पद्यानि) (ङ) वर्षासमय: (3 पद्यानि) (च) भारतवन्दना (35-पद्यानि), (छ) वन्या (24-पद्यानि), (ज) आत्मपरिचय: (24-पद्यात्मक:) (झ) कृष्णं प्रपद्ये (1-पद्य)। (ञ) जरा (21-पद्यानि), (ट) श्रीकृष्ण: शरणं मम (11-पद्यानि) (ठ) काश्मीराक्रमणम्- (9-पद्यानि), (ढ़) श्रीराजलक्ष्मीसंस्तव: (23-पद्यात्मक:) (ड़) प्रणामपुष्पाञ्जलि: (3-पद्येषु), (ण) आर्यारत्नमाला (10-पद्येषु) च।[17]

उपरितनानां पद्यरचनानां अतिरिक्तानि कविभि: लिखितानि (17) सप्तदश निबन्धानि आ.रा. रचना संग्रहस्य तृतीयखण्डे (निबन्धा:) समुपलब्धानि सन्ति।[18]

विद्यावाचस्पति प. रामचन्द्रमिश्राणां विशिष्टसम्मानस्य प्राप्ति:- (क) का.सिं.द.सं. वि.वि. दरभर्त्या- विद्ययावाचस्पते: मानदोपाधि:- जुलाई-1975 तमेशवीयवर्षे प्राप्ता।

(ख) भारतीयतत्कालीनराष्ट्रपतिना- जैल सिंह महाभागेन 1984- तमेशवीयवर्षे इन्दिरा गाँधी ''इत्यस्या: प्रधानमन्त्रीत्वकाले सम्मानित:।[19]

अनेनैव प्रकारेण विद्याविदग्रगा: महाकवय: विद्यावाचस्पति प. रामचन्द्रमिश्राचार्य्या: स्वकाव्यप्रतिभया स्वक्षेत्रस्यैव न हि अपितु भारतराष्ट्रेन समं सम्पूर्णविश्वस्य अन्त: गुम्फिनस्वज्ञानाञ्जनशलाकया समेषां विद्याप्रेमिणां संस्कृतानुरागिणां शोधार्थिनाम् आधुनिककविवरेण्यानाम् अन्येषां जिज्ञासुनाञ्च मनांसि अप्रकाशयन्।

ये खलु महाकवय: अस्माकं प्रात: स्मरणीया: वर्त्तन्ते। तेषां काव्यादिकृतित्वेन वयं धन्या: अभूम। इत्युक्ति: सफला जायेत।

पादटिप्पणी

1. गवेषकेन ''पद्यमिदं'' विरचितं कविवरेण्यम्प्रति।
2. वि.वा. रामचन्द्रमिश्र प्रणीताया: ''स्मृतिरेखाया:'' प्रथमपृष्ठे। स्मृतिरेखा-प्रकाशक का.सिं.द.सं. वि.वि. दरभर्त- 1985- ई. तम: प्रकाशनवर्ष:।
3. वि.वा. रामचन्द्रमिश्र प्रणीत-तरुकथा- प्रभाव्या- डॉ. कृष्णकान्त झा - XXIII तमे पृष्ठे उद्धृतमस्ति। प्रकाश: प्रिंटवेल-दरभर्त- 2020 ई. तम: प्रकाशनवर्ष:।
4. वि.वा. रामचन्द्रमिश्रेण प्रतिमानाटक प्रसन्नराघवयोश्च टीकाया: ''ग्रन्थकर्त्तु: परिचय:'' इत्यनेन समुद्धृत:''।
5. स्मृतिरेखा- 2 तमे पृष्ठे कविना स्वस्मिन् परिचये समुल्लिखितमस्ति।
6. तरूकथा प्रभाव्याख्या- डॉ. कृष्णकान्त झा- XXIII-तमे पृष्ठे।
7. स्मृतिरेखा-3 तमे पृष्ठे।
8. तरुकथा प्रभाव्याख्या- XXXIII तमे पृष्ठे।
9. तरुकथा प्रभाव्याख्या - XXIV अतमे पृष्ठे।
10. तरुकथा प्रभाव्याख्या XXIV - तमे पृष्ठे पादटिप्पण्यां- एकं सन्तानं (भालचन्द्र) मिश्रस्य जन्मोपरान्ते अस्या: पत्न्या: स्वर्गवासोऽभवत्। पुन: द्वितीयो विवाह:- 1945- तमेशवीयवर्षस्य चैत्रमासे ग्राम-मोरबा डीह:, जि. समस्तीपुर प. गौरीकान्त झा महोदयस्य पुत्री तारिणी देव्या साकम् अभूत्, यस्यां पत्न्यां एषां त्रय: पुत्रा: तिस्रश्च पुत्र्य: अभूवम्। ते पुत्रा: चारुचन्द्र मिश्र: प्रभासचन्द्र मिश्र: उदयन कश्यपश्च। ता: पुर्त्य: मेधा विद्या रेवाश्चेति। एषु त्रिषु पुत्रेषु प्रभासचन्द्र: मिश्र: साम्प्रतिकम् अस्माभि: समं संलग्नमस्ति। स: इदानीन्तु भागलपुर संस्कृत महाविद्यालये प्रधानाचार्योऽस्ति।
11. तरुकथा प्रभाव्याख्या- डॉ. कृष्णकान्त झा - XXVI तमे पृष्ठे समुल्लिखितमस्ति)
12. स्मृतिरेखायां- 53 पृष्ठे- स्वयमेव कवय: कथयन्ति- मया लिखितानि बहूनि मूलपुस्तकानि व्याख्यादीनि विविधपुस्तकानि, यानि सर्वाण्यपि यथासम्भवं शीघ्रतयैव प्रकाशितानि, तानि सम्प्रति सर्वाणि स्मृतिमपि नारोहन्ति। यानि स्मर्यन्ते तानि मयात्र निर्दिश्यन्ते।
13. अस्या: तरुकथाया: विशद- हिन्दी-संस्कृत-प्रभाव्याख्या- डॉ. कृष्णकान्त झा प्रसिद्ध (विजयकान्त झा) आचार्येण- 2020 तमेशवीयवर्षे- प्रिंटवेल दरभर्त्या प्रकाशिता।
14. तरुकथा प्रभाव्याख्या - XXVII तमे पृष्ठे उल्लिखितमस्ति।
15. तरुकथा प्रभाव्याख्या XXIX - तमे पृष्ठे उल्लिखितमस्ति।
16. द्रष्टव्य- आ.रा.सं.- 142-144- तमे पृष्ठे।
17. तरुकथा- द्रष्टव्य:- प्रभाव्याख्या XXX- तमे पृष्ठे।
18. द्रष्टव्य- आ.रा. रचनासंग्रह- 95-148- तमे पृष्ठे।
19. तरुकथा प्रभाव्याख्या - डॉ. कृष्णकान्त झा- XXVI तमे पृष्ठे समुद्धृतमस्ति।

सन्दर्भग्रन्थसूची

1. आचार्य रामचन्द्रमिश्र रचनासंग्रह:।
2. स्मृतिरेखा (कवे: स्वात्मकथा)।
3. तरुकथा (लघुकाव्यम्)- प्रभाव्याख्या- डॉ. कृष्णकान्त झा (विजयकान्त झा) आचार्येण कृता।

डॉ. कृष्णकान्त झा
एसोसिएट प्रोफेसर
सह
संस्कृत विभागाध्यक्ष
महाराज लक्ष्मीश्वर सिंह महाविद्यालय,
सरिसव-पाही, मधुबनी
रंजेश्वर झा
पी-एच.डी. शोधार्थी
विश्वविद्यालयसंस्कृतविभाग:, ल.ना.मि.वि.वि., दरभर्त।

ISSN 2348-7828

विकासस्य आधारस्तम्भः नारी

डॉ. दीपकुमारः

शोधसारः- लोकेऽस्मिन् विद्या एव तज्योतिः यदि मानवे ज्ञानज्योतिर्ज्वालयति। अविद्यान्धतमसं व्योपहति दुर्गुणगणं वारयति,सद्गुणततिं संचारयति,कीर्तिं प्रथयति, गौरवं विकासयति,यशो वितनोति,भूभृत्सु च आदरमावहति। वेदशास्त्र-विज्ञानादीनां साध्वनुशीलने तत्वार्थज्ञानं च विद्येति नाम्ना स्वीक्रियते। वेदशास्त्रेषु अनुशीलनेन यत्र परमा आध्यात्मिकोन्नतिर्भवति तत्रैव विज्ञानस्य अपि उपकारो शोधश्च प्रभवति इत्युक्ते लौकिकाऽलौकिकज्ञानविज्ञानयोर्साधनं विद्या। शब्ददृष्ट्याऽपि अयं विद्याशब्दः स्त्रीत्वं सूचयति जातिदृष्ट्यापि विद्या शब्दः स्त्रीत्वं प्रमाणयति। इत्युक्ते विद्या स्त्रीस्वरूपिणी महर्षेः मार्कण्डेयस्य पुराणवचनं सार्थीकरोति। यत्र महर्षिणा भणितमस्ति-

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकयापूरितमम्बमेतत् का ते स्तुतिः स्तव्यपरापरोक्तिः॥[1]

एतेन पुराणवचनेन प्रमाणी भवति यद्यान्यपि ज्ञानविज्ञानानि, कलाः ,ब्रह्माण्डरहस्यानि वा सन्ति तेषां समुद्भवस्य विकासस्य वा यतः मूलमारब्धं तन्मूलं स्त्रीस्वरूपा भगवती एवावहति। यतः जगत्सु या अपि स्त्रियास्सन्ति ताः तस्याः देव्या एव विविधरूपाणि वर्तन्ते। अत्र जगत्सु याः स्त्रियः कथिताः ताः न केवलं नार्य अपितु स्त्रीजातीत्वं यास्वस्ति ताः सर्वा अभिधेयाः।

कूटशब्दाः-विकासः, नारीः, वेदः, पुराणम्, स्त्रीणामधिकारः, स्त्रीपुरुषयोरभेदः।

समाजस्याधारभूता नारी- अत एव स्त्री स्वरूपिणी विद्या मातृवत् संरक्षिका पितृवत् सत्पथप्रदर्शिका, कान्तावत् सुखदा, मनोरञ्जिका च, कीर्तिप्रदा, वैभवदायिनी, दुर्गुणगणनाशेन मनसः पावयित्री च भणितास्ति। सर्वमनोरथपूरणादेषा कल्पलतेति परिज्ञायते।

अत एव उक्तं-

मातेव रक्षति पितेव हिते नियुङ्क्ते कान्तेव चाभिरमयव्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं किं किं न साधयति कल्पलतेव विद्या।[2]

एषा विद्यास्वरूपिणी नारी, नारीस्वरूपिणी विद्या च सुसभ्यस्य सुशिक्षितस्य सुविकसितस्य समाजस्य राष्ट्रस्य उत वा विश्वस्य आधारमावहति। अत एव गृहिणी गृहमुच्यते। तत्र तावत् इष्टिकाबालुकादिभिः निर्मितं भवनमेव गृहं न भवति अपितु यत्र नारी सुखेन वसति तद् गृहमुच्यते। सम्पूर्णविश्वं यदि गृहमिति चिन्तयामः तदा एतस्य गृहस्याधारस्तम्भाः नार्यःसन्तीति कथने नास्ति अतिशयोक्तिः।

विकासहेतवः- यतः येन विकासः करणीयः भवति तस्मिन् दया, सेवा, धैर्यं त्यागः, औदार्यं, कर्मनिष्ठा, शुचित्वं समत्वादयो गुणाः सुतरां भवेयुः। एते सर्वेऽपि गुणाः नारीषु आधिक्येन प्रकृतिप्रदत्ताः भवन्ति। धर्मशास्त्रनीतिशास्त्रयोरभिमतमिदं विद्यते यत् सोमवेदेन स्त्रियै पवित्रत्वम, गन्धर्वेण, सुमधुरावाणी अग्निदेवेन च सर्वविधशुचये शक्तिर्प्रदत्तास्ति। तथा चोक्तम्-

सोमः शौचं ददावासां गन्धर्वश्च शुभां गिरम्। पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः॥[3]

विविधक्षेत्रेषु स्त्रीणामधिकारः- ममता, स्नेहः, आन्तरिकमृदुता, वात्सल्यादिविविधगुणोपेताः स्त्रियः प्रत्येकं क्षेत्रेषु स्वकीयमवदाननमाधुनिके काले यच्छन्त्यस्सन्ति। विज्ञानक्षेत्रे, प्रौद्योगिकक्षेत्रे, धर्मक्षेत्रे, शिक्षाक्षेत्रे, राजनीतिक्षेत्रे, चिकित्साक्षेत्रे, रक्षाक्षेत्रे, वित्तक्षेत्रे, चेदानीन्तनकाले नारीणां बाहुल्यमस्ति। ग्रामस्य पंचायतसदस्यतः राष्ट्रस्य राष्ट्रपतिपदं यावत् स्त्रीणाम् अधिकारक्षेत्रं विद्यते। न केवलं भारतवर्षे अपितु विश्वस्य अनेकेषु देशेषु नार्य उच्चतरपदेस्वासीना भूत्वा विकासगाथां लिखन्त्यस्सन्ति। येषु क्षेत्रेषु येषु पदेषु च नारीणामुपस्थितिः वर्तते तत्र कार्याणि तीव्रगत्या शान्त्या च परिपूर्णानि भवन्ति यतः तत्र वात्सल्यं त्यागः समत्वादिगुणाः प्रभावयन्ति। क्रीडाक्षेत्रेऽपि इदानीं नारीणां प्रभुत्वं सामर्थ्यं च सर्वैरङ्गीक्रियते। अतःशिक्षिताः नार्यः राष्ट्रस्य विकासाय, उत्तमनागरिकनिर्माणाय च महत्वपूर्णमवदानं ददति। अत एव महाकविना भर्तृहरिणा स्पष्टोद्घोषितं यत् ये जनाः नारीमबलेति चिन्तयन्ती ते विपरीतबुद्धयः वर्तन्ते।

'नूनं हि ते कविवरा विपरीतबोधा ये नित्यमाहुरबला इति कामिनीनाम्'[4]

स्त्रीपुरूषयोरभेदः- भारतदेशे तु अनादिकालादेव स्त्रीणामधिकाराः, तासां सम्माननं च पुरुषाणामपेक्षया गुरुत्वपूर्णमासीत्। मध्यकाले तावत् वैदेशिकानां आक्रमणेन कुसंस्कृताः जनाः स्त्रीणामनादरमाचरिवन्तः स्युर्नाम किन्तु बाहुल्येन यदि पश्यामः तदा ज्ञायते यदास्माकं देशे नार्यः प्रामुख्यं भजन्ति न तु गौणत्वम्। एतस्य कारणमिदं विद्यते यदस्माकं संस्कृतौ स्त्रीपुरुषयोरभेदः मन्यते। धर्मशास्त्रमेव भारतस्य

प्राचीनं संविधानं विद्यते। सर्वाः स्मृतयः विधिग्रन्थाः विद्यन्ते। तत्र व्यासस्मृतौ भणितमस्ति यत् पूर्वकाले ब्रह्मणा स्वगात्रं द्वयोः विभागयोर्विभक्तं। तदा एकेन पुरुषस्य अपरेण च स्त्रिय उत्पत्तिरभूत्। श्रुतिरपि अंगीकरोति यत् नारीं विना पुरुषः पूर्णतां नेति। प्रजानामाधारस्वरूपिणी नारी एवास्ति।

तद्यथा- **पाटितोऽयं द्विजाः पूर्वमेवदेहः स्वयम्भुवा। पतयोऽर्द्धेन चार्द्धेन पत्न्योऽभूवन्निति श्रुतिः॥**
यावन्न विन्दते जायां तावद्धौ भवेत् पुमान्। नार्द्धं प्रजायते सर्वं प्रजायेतेव्यति श्रुतिः॥[5]

महर्षिणा मनुनाऽपि किञ्चनेतद् प्रमाणितं यत् स्त्रीपुरूषौ एकस्य नाणकस्य पक्षद्वयमस्ति। स्त्रीं बिना पुरुषः सदैव अपूर्णः भवति।
एतावानेव पुरुषौ यज्जायस्मा प्रजेति ह। विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृताङ्गना॥[6]

भारतीयसंस्कृतौ तु स्पष्टमुद्घोषितं विद्यते यत् विश्वे यान्यपि रत्नानि विद्यन्ते तानि सर्वाण्यपि स्त्रीरत्नतुल्यानि न भवितुं शक्नुवन्ति। यतः तानि तु जडानि प्राणशून्यानि बुद्धिविद्याविवेकादिरहितानि सन्ति। अपि च तानि अन्येषां रत्नानामन्वेषणम् उत्पादनं प्रयोगं च न कर्तुं प्रभवन्ति। किन्तु स्त्रीरत्नं तु न केवलं स्वयं प्रकाशितं भवति अपितु स्वप्रखरप्रकाशेन सर्वान् द्योतयति। स्वगुणप्रभावादिभ्य बहूनां मानवीयरत्नानां सृष्टिं, पालनं संशोधनं च करोति। सामान्यरत्नं तु स्थिरं भवति। स्वयं कुत्राऽपि गन्तुं न शक्नोति किन्तु स्त्रीरत्नं मतिमदस्ति इति कारणात् विश्वविकासाय स्वयमेवेकस्मात् स्थानादपरं स्थानं सम्प्राप्य स्वदिव्यमयूखैः सर्वमपि जगत्जातं सुभासितं सुवासितं च कुर्वन्ति। एतद्रत्नममूल्यं वर्तते यतः रत्नं स्मृद्धे प्रतीकं भवतीति हेतोः विकासस्य समृद्धेश्चाधारभूतमिदस्त्रीरत्नम्। अत एवोक्तं-
'न स्त्रीरत्नसमं रत्नं'[7]

हितोपदेशकर्तुः नारायणपण्डितस्य त्वस्मिन्विषये कथनं इतोऽपि गुरुत्वपूर्णमस्ति। तेनोक्तं विद्यते यत्पुरुषाणां तुलनया स्त्रीषु चतिर्गुणा बुद्धिर्भवति। एतेन तु ज्ञायते यत् स्त्रीपुरुषयोः समत्वं नास्ति यतः पुरुषाणामपेक्षया स्त्रीणामुन्नतं स्थानं विद्यते।
'स्त्रीणां बुद्धिस्तासां चतुर्गुणा'

नार्यः हि समृद्धिमूलम्- अस्माकं भारतराष्ट्रे स्त्रीणामादरं स्वाभाविकरूपेण परम्परया क्रियते। अत एव शास्त्रेषु भणितं विद्यते यत् यत्र नार्यः पूज्यन्ते अर्थात् नारीणां यत्र स्वातन्त्र्यं सम्मानाधिकाराश्च स्वाभाविकाः भवन्ति। तत्र देवताः रमन्ते नाम तत्र सुख समृद्धिश्च आयाति। एतेन साकं शास्त्रेण विपरीतपरिष्ठितौ परिणामोऽपि प्रदर्शितः यत् यत्र नार्यः शोकाकुला अवमानिताश्च भवन्ति तस्य कुलस्य उत् वा समाजस्य कदाऽपि विकासो न भवति अपितु तत्र नाशः सम्भवति। सर्वाणि कर्माणि विफलानि भवन्ति।

यत्र नार्यस्तु पूजयन्ते रमन्ते तत्र देवताः। यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्। न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वता॥
जामयो यानि गोहानि शपन्त्यप्रतिपूजिताः। तानि कृत्याहतानीव विनश्यन्ति समन्ततः॥[8]

नारीणामधिकारसम्पादनाय सम्माननाय च ऋग्वेदे वाञ्छा विद्यते यत् नारी सर्वत्र सम्राज्ञी इव आद्रिता सम्मानिता च स्यादिति।
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वर्श्वा भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी भव अधि देवत्सु॥[9]

आपाला , घोषा, सरस्वती, सर्पराज्ञी,सूर्या, सावित्री,अदितिदाक्षयणी, लोपामुद्रा, विष्वसारा, मैत्रेयी इत्येता: त्रृषिकाः वैदिककाले नारीणां श्रेष्ठशिक्षाप्रबन्धनस्य प्रमाणमावहन्ति। भारतीयसंस्कृतेः सभ्यताचाश्च मूलं तु वेद एव। तत्र यदि नार्यः आद्रिताः तदा कुत अयं प्रश्नः यत् भारते नारीणां स्थितिः समाना न वर्तते। मानवजीवने सर्वतोभावेनपेक्षितं भवति बलं, धनं विद्या चेति। एतेषां त्र्याणां स्वामित्वं तु नार्य वहन्ति। यतः (महाकाली, महालक्ष्मी, महासरस्वती......

वाग्देवी एकादश रुद्रान् द्वादशादित्यान्, अष्टवसून् विश्वेदेवान् च संधृत्य सकलभूमण्डले संचरन्ति। वाग्देव्या एव मित्र -वरुण - अग्नि-सोम- त्वष्टा- भगादि देवाः सन्धृतास्सन्ति।

अहं रूद्रेभिवसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा विभर्ग्यम्यहमिन्द्राग्नी अहमश्विनोभा॥[10]

उपसंहारः- स्त्रीरत्नस्य तथा अमूल्यत्वं वैशिष्ट्यम् उपयोगिता च विद्यते यदेतस्य रत्नस्य स्वातन्त्र्यं न भवतीति महर्षिणा मनुना मनुस्मृतौ भणितम्। सन्दर्भेऽस्मिन् समाजे अमुं विषयं स्वीकृत्य विरोधोऽपि दृश्यते। यतः ये कुसंस्कृताः, शास्त्राध्ययनरहिताः चिन्तनशक्तिहीनाः दुराग्रहग्रसिताश्च सन्ति। तैरेवाऽत्र कुतर्कप्रदानपुरस्सरं निजाज्ञानस्य परिचयो दीयते। वस्तुतोऽत्र सन्मत्या शास्त्रपरम्परा पुरस्सरं सूक्ष्मचिन्तनस्यावश्यकता विद्यते। शास्त्रे यत्किमपि शास्त्रकारैः भणितं भवति तत्सर्वमपि लोकमाश्रित्य लोककल्याणाय च भवति। तथैव

ISSN 2348-7828

सामाजिकै : यदाचर्यते तस्य मूलं शास्त्रमेवावहति किन्तु समयपरिवर्तनभेदेन तत्र सामाजिकाचरणेषु विकारा: दोषाश्चापि समायान्ति। तान् विकारान् दोषान् च अविचार्य अदृष्ट्वा वा जना: शास्त्रमेव दोषपूर्णमिति कुप्रचारयन्ति। अस्माकं भारतीयपरम्परायां तु सर्वदा नार्य: प्रथमे स्वीक्रियन्ते पुरुषारनन्तरम्। तस्मादेवास्माकम् अर्चनपद्धत्यामपि देवताया: स्मरणकाले नामोच्चारणे च देवीनां स्मरणमुच्चारणं चादौ क्रियते। तद्यथा उमामहेश्वराभ्यां नम:, लक्ष्मीनारायणाभ्यां नम: सीतारामाभ्यां नम इत्यादय:। अपि सर्वासु देवतासु प्रबलबलयुक्ता दुर्गा एव मन्यते। एतस्मादेव यस्मात् सिंहात् सर्वेऽपि भयमानन्ति स: सिंह: देव्या: वाहनमस्ति। देवानां तुलनया देव्या: बाहव: आयुधाश्च अधिकास्सन्ति। एतत् सर्वमपि स्त्रीसम्मानप्रतीकत्वेनाऽङ्गी क्रियते। अस्मिन्नेव सन्दर्भे स्त्रीरत्नसंज्ञया सम्मानितास्ति। समाजे जनानां पार्श्वे यानि मूल्ययुक्तानि वस्तूनि सन्ति तानि वस्तूनि जना: रहसि स्थापयन्ति। माणिक्यमुक्तानीलपन्नगप्रवालादीनि यानि रत्नानि रजतसुवर्णादिधातवश्च भवन्ति तेषां रक्षासुरक्षां च वयं विशेषेण कुर्म:। तानि यत्र-तत्र भूमौ सिक्तायां न स्थापयाम अपितु जागरूकतया आच्छाद्य स्थापयाम येन य: कोऽपि तं रत्नं तां धातुं वा स्पृष्टुं उपयोक्तुं नेतुं न शक्नोति। तथैव स्त्रीरत्नं तु अमूल्यं विद्यते। एतत् रत्नमत्यन्तसावधानतया सौहार्देन जागरूकतया आदरेण च संरक्षणीयमिति कारणात् स्त्रिय: स्वातन्त्र्यं न आवहन्तीति उक्तं विद्यते शास्त्रकारै:। यत: अत्र यदि प्रमाद: क्रियते चेत् समाजे चौरा: लुण्ठका: यथा रत्नानि हरन्ति तथैव स्त्रीरत्नस्य अपि हानिं कुर्वन्ति। एतस्मात् वर्तमानकाले शास्त्राणि अनधीत्य अचिन्त्य अविचार्य स्त्रीस्वातन्त्र्यविषये निरर्थकं प्रलापं कुर्वन्ति। अत: स्त्रीरत्नस्य संरक्षण सम्माननं च प्रयत्नेन करणीयं येनाऽस्माकं संस्कृते: सभ्यताया: समृद्धेश्चाधारस्तम्भ: अनुदिनं दृढं भवेत्।

पादटिप्पणी

1. चण्डी सप्तशती
2. भोजप्रबन्ध: 5
3. याज्ञवल्क्यस्मृति: 1-7
4. वैराग्यशतकम्
5. व्यासस्मृति: 2-13,14
6. चाणक्यसूत्रम् 313
7. हितोपदेश: 2-119
8. मनु.स्मृ.3-56,57,58
9. ऋग्वेद 10.85.46
10. ऋग्वेद 10,129,1-2

सन्दर्भग्रन्थसूची

1. दुर्गासप्तशती
2. भोजप्रबन्ध:
3. याज्ञवल्क्यस्मृति:
4. वैराग्यशतकम्
5. व्यासस्मृति:
6. चाणक्यसूत्रम्
7. हितोपदेश:
8. मनुस्मृति:
9. ऋग्वेद:।

सहायकाचार्यः (ज्योतिषशास्त्रविद्याशाखा)

केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः बलाहरः।

ISSN 2348-7828

वैदिकदृशा ईश्वरीयनाम्नां विमर्शः

डॉ. प्रतिज्ञा आर्या

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः[1]।।

शोधसारः-बहुषु शास्त्रेषु ईश्वरस्य अनेकानि नामानि प्राप्यन्ते दृश्यन्ते श्रूयन्ते च। शोधपत्रेऽस्मिन् वेदप्रतिपादितस्य परमात्मनः कासाञ्चनाभिधायाः लघुचिन्तनमत्र प्रस्तूयते। यद्यपि ईश्वर एक एव किन्तु तस्य अनेकानि नामानि वर्त्तन्ते। किमर्थम् अनेकानि नामानि? तर्हि यथा लोके एकस्य जनस्य गुणकर्मसम्बन्धेभ्यः स्वभावानुगुणं नामानि भवन्ति किन्तु एकमेव मुख्यं प्रमुखञ्च भवति। तथैव ईश्वरस्यापि अप्रधानानि अनेकानि नामानि मुख्यञ्चैकमेव। तर्ह्यत्र लघुरूपेण केषाञ्चन नाम्नां विवरणं करिष्यते। **एकं सद्विप्रा बहुधा वदन्ति।**

कूटशब्दाः-विष्णुः, विराट्, आदित्यः, रुद्रः,भूः, भुवः,स्वः इत्यादीनि।

भूमिका-ईश्वरप्रदत्तसंविधानरूपीज्ञानस्य नाम वेद इति। प्रतिकल्पादौ परमपितापरमेश्वरः प्राणिमात्रस्य कल्याणाय वेदराशेः ज्ञानं मानवेभ्यः प्रददाति। यथा दृश्यमामिदं वैचित्र्यपूर्णं सकलमपि विश्वं विरच्य जीवमात्रस्य विचरणाय विहरणाय च संविधानमिदं प्रायच्छत्। मानवाः वेदेन प्रतिवस्तुनः सत्यशुद्धस्वरूपं विज्ञाय जगतः सदुपयोगं कुर्युरिति। यदि च वेदज्ञानं विनैव ईश्वरः प्राणिमात्रं जगत्यस्मिन् विचरणाय प्रेषयति तर्हि प्राणिनः ज्ञानं विना वस्तूनि दृष्ट्वापि तस्य व्यवहारे सदुपयोगे च असमर्थाः स्युः। तदर्थम् ईश्वरीयं ज्ञानमिदं प्राणिमात्रोपकाराय जगति विद्यते।

भूरिति वै प्रजापतिरिमामजनयत्। भुवः इति अन्तरिक्षम्[2]। सः भूरिति व्याहरत्। स भूमिमसृजत्[3]। स भुव इति व्याहरत्। सोऽन्तरिक्षमसृजत्[4]। स स्वरिति व्याहरत्। स दिवमसृजत्[5]। अर्थात् परमेश्वरः भूः, भुवः, स्वः एतेषां विचारणां कृत्वा भूलोकं अन्तरिक्षलोकं द्युलोकं च रचयामास। विदन्ति, जानन्ति, विद्यन्ते, भवन्ति, विन्दन्ति, विन्दन्ते, लभन्ते, विन्दते, विचारयन्ति सर्वे मनुष्याः ताः सर्वाः सत्यविद्याः यैर्येषु वा विद्वांसश्च भवन्ति ते वेदाः। वेदाः अग्निवाय्वादित्याङ्गिरसस्तु निमित्तीभूता वेदराशिप्रकाशार्थं भगवता कृता इति विज्ञेयम्। तेषां ज्ञानेन वेदानामनुपात्तेः वेदेषु शब्दार्थसम्बन्धाः परमेश्वरादेव प्रादुर्थभूताः तस्य पूर्णविद्यावत्वात्[6]। एतादृश सर्वविधज्ञानसम्पन्नेषु वेदेषु ईश्वरस्य बहुविधनाम्नामुल्लेखो वर्तते। तस्यैव विमर्शणमत्र क्रियते।

वेदेषु परमात्मनः मुख्यो नाम ओ३म् इति सप्रमाणं प्राप्यते-

(क) ओं खं ब्रह्म[7]।

(ख)ओमित्येतदक्षरमुद्गीथमुपासीत[8]।

(ग) ओमित्येतदक्षरमिदं सर्वं तस्योपाख्यानम्[9]।

(घ) सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति[10]।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।।

अर्थात् (क) अवतीत्योम्, आकाशमिव व्यापकत्वात्खम् सर्वेभ्यः बृहत्त्वात् ब्रह्म। ईश्वरः सर्वेषां प्राणिनां जीवानाञ्च संरक्षणं करोति अतः ओम् वर्त्तते। आकाशवत् व्यापकः अतः खम्, समेभ्यः बृहत् अतः ब्रह्म इति ईश्वरस्य नाम वर्त्तते। (ख) सर्वेषु वेदादिशास्त्रेषु परमेश्वरस्य प्रधानं मुख्यं नाम, स्वीयनाम च ओमित्येव वर्त्तते अन्यानि नामानि तु गौणिकान्येव वर्त्तन्ते। अतः ओमित्येव ध्येयम्। (ग) ओ३म् यस्य नाम वर्त्तते, यश्च न कदापि नष्टो भवति, तस्यैव उपासना करणीया नान्यस्य। (घ) वेदाः, उपनिषदः सर्वेऽपि धर्मानुष्ठानरूपं तपश्चरणं यस्य कथनं सर्वेषु च मान्यः यस्याश्च प्राप्तये, प्राप्तेश्च अभिलाषां स्थाप्य ब्रह्मचर्याद्याश्रमस्य पालनं मानवैः क्रियते तस्यैव नाम ओ३म् वर्त्तते। नैतत् पर्याप्तम् आचार्यमनुनाऽपि ईश्वरस्य नाम विषये एवं प्रतिपादितम्-

प्रशासितारं सर्वेषामणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्।
एतमग्निं वदन्त्येके मनुमन्ये प्रजापतिम्। इन्द्रमेके परे प्राणमपरे ब्रह्मशाश्वतम्।।[11]

अर्थात् यः सर्वेभ्यः प्राणिभ्यः जीवेभ्यश्च शिक्षयति, सूक्ष्मातिसूक्ष्मः स्वप्रकाशस्वरूपः, समाधिस्थबुद्ध्या जिज्ञासुः वर्त्तते सः परमपुरुष अवबोद्धव्यः। स्वप्रकाशयुक्तोस्ति अतः अग्निः। विज्ञानस्वरूपः मनुःमनन दाने[12] सर्वेषां पालकः अतः प्रजापतिः अपि परमैश्वर्यवान् वर्त्तते। इन्द्रः[13] सर्वेषां जीवनमूलकः, अतः प्राणः, निरन्तरं- निर + अन्तरम् = व्यवधानरहितम्, अन्तः, बहिः, सर्वत्र व्यापकत्वात् सर्वेषु च व्यापकत्वात् ब्रह्मा[14]। जगत् ईश्वरस्यान्तः विद्यमानमस्ति अपि च अन्तः बाह्याद्वा सम्पूर्णजगद् परमात्मनि व्याप्तमतः सः ब्रह्मा।

ISSN 2348-7828

स ब्रह्मा स विष्णुः स रुद्रस्स शिवस्सोऽक्षरस्स परमः स्वराट्।
स इन्द्रस्स कालाग्निस्स चन्द्रमाः।।[15]

अर्थात् जगतः कर्तृत्वात्, सर्जनत्वात्, सर्वत्र व्यापकत्वात् ब्रह्मा[16] शब्दोऽयं धनस्य वाचकोमपि अतः वर्धतेऽनेन धर्मादयः परमात्मकृपया धर्मादीनां वृद्धिर्जायते। विष्णुः[17] वेवेष्टि व्याप्नोति चराऽचरं जगत् स विष्णुः, ईश्वरव्यतिरिक्तं न कोमपि स्थानं सः सर्वत्र व्यापृतः अतः विष्णुः। दुष्टेभ्यः दण्डदायकः दुष्टान् यः रोदयति सः रुद्रः[18]। यो रोदयत्यन्यायकारिणो जनान् सः रुद्रः। मानवस्तु स्वार्थवशात् जनान् रोदयति किन्तु यः अन्यायकारकान्, दुष्टान् रोदयति सः रुद्रः। मङ्गलमयत्वात् समेषां कल्याणकर्तृत्वात् शिवः[19] अक्षरं यः सर्वमश्नुते न क्षरति न विनश्यति तदक्षरम्। स्वराट् यः स्वयं राजते स स्वराट् कालाग्निः योऽग्निरिव कालः कलयिता प्रलयकर्त्ता स कालाग्निरीश्वरः।

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः[20]**।।**

यः अद्वितीयः सत्यसमन्वितः ब्रह्मवस्तु वर्त्तते सैव इन्द्रादिनाम्ना व्यवह्रियते। द्युषु शुद्धेषु पदार्थेषु भवो दिव्यः। शोभनानि पर्णानि पालितानि पूर्णानि कर्माणि वा यस्य स सुपर्णः। रश्मिसदृशं जनान् लोकान् वा प्रकाशयति अतः सुपर्णः। यो गुर्वात्मा सः गरुत्मान्, यो मातरिश्वा वायुरिव बलवान् स मातरिश्वा। उपर्युक्तानां प्रामाणानां सुष्ठु अर्थं विज्ञाय ईश्वरस्यैव ग्रहणम्, एतेभ्यः नामभ्यः वैदिकशास्त्रैः स्वीकृतः। यतो हि ओम्, अग्न्यादयेभ्यः नामभ्यः मुख्यार्थेन ईश्वरस्यैव ग्रहणं भवति। यथा व्याकरण-निरुक्त-ब्राह्मणसूत्रादिषु ऋषि-मुनीनां व्याख्यानेन स्वीकारः वर्त्तते तथैव ग्रहणम् उत्तमं वर्त्तते न तु पृथकग्रहणमिति।

ओमिति पदेन तु केवलं परमात्मनोः ग्रहणं वर्त्तते नान्यस्य। अपि च अग्न्यादिशब्देभ्यस्तु प्रकरणानुसारं विशेषण-नियम- कारकानुगुणमेव ग्राह्यम्। अनेन सिद्धं वर्त्तते यत् विषयेषु यत्र यत्र स्तुतिप्रार्थनोपासनादिषु प्रकरणेषु सर्वज्ञः, सर्वव्यापकः, शुद्धः, सनातनः सृष्टिकर्त्तादि-विशेषणेभ्यः उल्लेखो भवति तत्र तत्र परमेश्वरस्यैव ग्रहणं भवति। अस्मिन् प्रकरणे केवलम् ईश्वरपदवाच्यानाम् अथवा सर्वज्ञादिविशेषणेभ्यः युक्तपदानामेव व्याख्यां विधास्यते।

अथ ओङ्कारार्थः- ओ३म् अत्र वर्णत्रयं दृश्यते- अ+ उ +म् गुणो भूत्वा ओम् इति जातम्। अकारः, उकारः, मकारश्चेति। अकारेण- विराट्, विश्वः, अग्निः। उकारेण- हिरण्यगर्भः, वायुः, तैजसः। मकारेण- ईश्वर, आदित्यः, प्राज्ञश्चेति। क्रमशः विषयविस्तारः-

विराट्-'वि' उपसर्गपूर्वकात् राजृ दीप्तौ धातोः[21] 'क्विप्' प्रत्यये कृते विराडिति शब्दः सिद्ध्यति। व्युत्पत्तिर्जायते- यो विविधं नाम चराऽचरं जगद्राजयति प्रकाशयति स विराट्, अर्थात् यः बहुप्रकारकमिदं जगत् प्रकाशयति सः विराट् वर्त्तते। जगति ईश्वरः व्यापृतः नैकोणुपरमाणुः यः ईश्वरेण व्यतिरिक्तस्स्यात् ईश्वरे जगत् वर्त्तते।

अग्निः- अञ्चु गतिपूजनयोः[22] अग्निशब्दस्य गतिरित्यर्थः अग, अगि, इणगत्यर्थः[23] एभ्यः त्रिभ्यः धातुभ्यः अग्नीति शब्दः सिद्ध्यति। गतिशब्दस्य त्रयोऽर्थाः ज्ञानं, गमनं, प्राप्तिश्चेति। पूजनं नाम सत्कारः। योऽञ्चति अच्यतेऽगत्यङ्गत्येति वा सोऽग्निः। यः ज्ञानस्वरूपं ज्ञानेन परिपूर्ण त्रिकालज्ञः वर्त्तते, सर्वज्ञः जगति विद्यमानवस्तुमात्रविषये, प्राणिमात्रविषये सम्यग्ज्ञानं, शुभाशुभकर्मणां फलव्यवस्थादिविषये यः सम्यग्जानाति, ज्ञानयोग्यः, पूजनयोग्यश्च वर्त्तते अनेन सेश्वरः अग्निरित्युच्यते।

विश्व- विश प्रवेशने[24] धातोः विश्वशब्दः सिद्ध्यति। विशन्ति प्रविष्टानि सर्वाण्याकाशादीनि भूतानि यस्मिन्, यो वा आकाशादिषु सर्वेषु भूतेषु प्रविष्टः स विश्व ईश्वरः। अर्थात् यस्मिन् आकाशादि समेऽपि भूताः प्रविशन्ति सम्पूर्णोऽयं संसारः ईश्वरे विद्यमान् नास्ति, अथवा यः अस्मिन् व्याप्तो भूत्वा प्रविष्टो भवति तदर्थं स ईश्वरः। एवम् अकारमात्रेण स्वीकृतान्येतानि नामानि।

हिरण्यगर्भः-ज्योतिर्वै हिरण्यम्,[25] ज्योतिर्वै शुक्रहिरण्यम्[26] तेजो वै हिरण्यम्[27]। इत्यैतरेयब्राह्मणे। अर्थात् यो हिरण्यानां सूर्यादीनां तेजसां गर्भ-उत्पत्ति-निमित्तमधिकरणं स हिरण्यगर्भः। अर्थात् यस्मिन् सूर्यादितेजयुक्तलोकः उत्पते यस्याधारेण वसति अथवा सूर्यादितेजः स्वरूपपदार्थानां गर्भ नाम उत्पत्तिः निवासस्थानं वा वर्त्तते तस्य परमेश्वरस्य नाम हिरण्यगर्भ इति। शब्दस्यास्यप्रमाणं यजुर्वेदे वर्त्तते- हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्[28]।

वायुः- वा गतिगन्धनयोः[29] गन्धनं हिंसनम्[30] यो वाति चराऽचरं जगद्धरति बलिनां बलिष्ठः स वायुः यः सम्पूर्णचराऽचरं जगद्धरति, प्रलयं करोति, जगदुत्पादयति बलिनां बलिष्ठः सेश्वरो वायुरिति। सम्पूर्णस्याऽस्य जगतः उत्पादकः, धारकः, प्रलयकर्त्ता च सेश्वरो वर्त्तते तं विना न किमपि कार्यं कर्त्तुं मानवेषु सामर्थ्यमस्ति। वायुः वेगवान् वर्त्तते तस्य समक्षं न कस्यापि बलं स्थिरं सः सर्वान् रुणद्धि तथैव सेश्वरः बलवान् सर्वसामर्थ्ययुक्तश्च।

तैजसः-तिज निशाने[31] इति धातोः तेज इति शब्दे प्रज्ञादिभ्यश्चेति सूत्रेण स्वार्थे तद्धितेऽर्थे अण् प्रत्यये कृते सति तैजस शब्दोऽयं सिद्ध्यति। अर्थात् यः स्वयं प्रकाशस्वरूपः सूर्यादितेजस्वी लोकेभ्यः प्रकाशः वर्त्तते, यः स्वयं प्रकाशवान् सर्वं जगत् प्रकाशयति, सर्वान् सूर्यादिग्रहान् च प्रकाशयति, अतस्तस्य नाम तैजस इति वर्त्तते।

ईश्वर: ईश ऐश्वर्ये[32] इति धातो: ईश्वर शब्द: सिद्धो भवति। य: सर्वैश्वर्यवान् वर्त्तते स ईश्वर: अर्थात् यस्य ऋतविचारशीलं ज्ञानम् अनन्त ऐश्वर्यसम्पन्न: ईश्वर: वर्त्तते। समस्ते एश्वर्यप्रदातृ शक्ति: यस्मिन् विद्यमाना स: ईश्वर: वर्त्तते नान्य:।

आदित्य:-दो अवखण्डने[33] इति धातो: अदितिशब्द:, अदितिशब्दे दित्यादित्यादित्यपत्युत्तरपदाण्य:[34] सूत्रेण प्राग्दीव्यतीयेऽर्थे ण्य: प्रत्यये कृते आदित्यशब्द: सिद्ध:। स्वार्थे तद्धितप्रत्ययोऽयं वर्त्तते। अत: अत्र चातुर्वर्ण्यादीनामुपसंख्यानम्[35] वार्तितकेन स्वार्थे ष्यञ् प्रत्ययो ज्ञेय: चातुर्वर्ण्यादिगण: आकृतिगण:। आदित्यस्यार्थ: न विद्यते विनाशो यस्य सोऽयमदिति:, अदितिरेव आदित्य: यस्य कदापि विनाशो न विद्यते, न च भवति तस्येश्वरस्यैव संज्ञा आदित्येति वर्त्तते। यदि ईश्वरस्य विनाश: स्यात् तर्हि तस्मिन् काले जगत: का स्थिति: अर्थात् ईश्वर: सदा सर्वत्र सर्वदा विद्यते न नश्यति। परं दुष्टान् नाशयति।

प्राज्ञ:-ज्ञा अवबोधने[36] धातो: प्र उपसर्गपूर्वकात् प्रज्ञ शब्देन स्वार्थेऽर्थे तद्धिते अण् प्रत्यये च कृते प्राज्ञेति शब्द: सिद्धो भवति। य: प्रकृष्टतया जगत: सकलं व्यवहारं जानाति स प्रज्ञ:, प्रज्ञ एव प्राज्ञ: अर्थात् य: निर्भ्रान्तज्ञानेन युक्त: सकलं चराऽचरं जगत: व्यवहारं यथावत् भूतभविष्यद्- वर्त्तमानकालं सम्यक् जानाति सर्वज्ञ:, बुद्धिमांश्च य: स: प्राज्ञ:।

निष्कर्ष:-वेदेषु वैदिकशास्त्रेषु च सहस्राधिक नाम्ना ईश्वरस्य स्वीकार: उच्चारणञ्च वा विहितमस्ति, तेभ्य: केषाञ्चन विवरममत्र विहितबहुभ्य: नामभ्य: स्वीकृत: परमेश्वरस्तु एक एव वर्त्तते। अथर्ववेदे उक्तमपि स्वयमेव ईश्वर:-

न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते न पञ्चमो न षष्ठो सप्तमो नाप्युच्यते।
नाष्टमो न नवमो दशमो नाप्युच्यते स एक एव वृद् एक एव।।

किन्तु विश्वजगदुत्पादक:, विश्वस्य प्राणिमात्रस्य पालक: संहर्त्ता च वर्त्तते, विभिन्नेभ्य: कार्येभ्य: गुणेभ्यश्च विभिन्नानि नामानि वर्त्तन्ते।

पादटिप्पणी

1. महाभारतशान्तिपर्व 232.24।
2. शतपथब्राह्मण 2.1.4.11।
3. तैत्तरेयब्रह्मण 2.2.4.2।
4. तैत्तरेयब्रह्मण 2.2.4.2-3।
5. तैत्तरेयब्रह्मण 2.24.3।
6. ऋग्वेदादिभाष्यभूमिका पृ.19।
7. यजुर्वेद 40.17।
8. छान्दोग्योपरिषद् 1.1।
9. माण्डूक्योपनिषद्1।
10. कठोपनिषद् 2.15 ।
11. मनुस्मृति 12.122-123।
12. धातुपाठ: दिवादिगण: 73।
13. इदि परमैश्वर्ये भ्वा.65।
14. बृहि: वृद्धौ भ्वा. 836।
15. कैवल्यौपनिषद् 18
16. बृहू उद्यमने तुदादि.74
17. विष्लृ व्याप्तौ जुहो.14
18. रुदिर् अश्रुविमोचने अदादि. 60
19. शिवु कल्याणे
20. ऋग्वेद: 1.164.46
21. धातुपाठ: भ्वादिगण: 569।
22. धातुपाठ: भ्वादि.115
23. धातुपाठ: भ्वादि.538,88, अदादि.38
24. धातुपाठ: तुदादि.133
25. शत.ब्रा.6.7.1.2।
26. ऐतरेय ब्रा.7.12
27. तै.ब्रा.8.1.9.1
28. यजुर्वेद13.4.
29. धातुपाठ:अदादि.2.43
30. धातुपाठ: चुरादि.10.152
31. धातुपाठ: अदादि. 1.698
32. धातुपाठ: अदादि.10
33. धातुपाठ: दिवादि.49
34. अष्टाध्यायी 4.1.85
35. महाभाष्य 5.1.124
36. धातुपाठ: क्रयादि.40

सन्दर्भग्रन्थसूची

1. सत्यार्थ प्रकाश-रामलाल कपूर ट्रस्ट सोनीपता हरियाणा।
2. महाभारतम्-स्वामी जगदीश्वरम् अमर प्रकाशन दिल्ली
3. धातुपाठ: - रामलाल कपूर ट्रस्ट, सोनीपत, हरियाणा।
4. अष्टाध्यायी रामलाल कपूर ट्रस्ट, सोनीपत, हरियाणा।
5. ऋग्वेदादिभाष्यमभूमिका रामलाल कपूर ट्रस्ट, सोनीपत, हरियाणा।
6. एकादशोपनिषद् श्री प्रहलादधूडमल प्रकाशन, टिन्डौन सिटी, राजस्थान।

सहायकाचार्या शिक्षाशास्त्रविद्याशाखा
केन्द्रीय संस्कृत विश्वविद्यालय: वेदव्यासपरिसर बलाहर:, हिमाचल प्रदेश:

ISSN 2348-7828

‘श्रीमद्भागवतान्तर्गतमङ्गलपद्यत्रयस्य सामासिकविमर्शः’

डॉ. रूपलालशर्मा

शोधसारः–

संस्कृतसाहित्यलेखनपरम्परा प्राचीनकालादेवाजस्रं प्रवहमाना वर्तते। कस्यापि संस्कृतग्रन्थस्य प्रणयनात् पूर्वं ग्रन्थकर्त्रा आचार्येण मङ्गलाचरणस्य परम्परा नितरां परिपाल्यते। महाभाष्यकारेण पतञ्जलिनापि मङ्गलाचरणस्य विषये प्रोक्तं – ‘‘मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाऽध्येतारश्च मङ्गलयुक्ता यथा स्युरिति’[1]। श्रीमद्भागतमहापुराणेऽपि महर्षिवेदव्यासेन आदौ मङ्गलाचरणविषयकपद्यानि रचितानि। तानि मङ्गलाचरणात्मकपद्यान्याश्रित्यैवास्मिन् शोधपत्रे व्याकरणदृष्ट्या सामासिकविर्मशः प्रस्तूयते।

निगमकल्पतरोर्गलितफलभूतं श्रीमद्भागवतमेकतः परमभक्तैरास्वाद्यं वर्तते। अपरश्च विद्वद्भिरपि संसेव्यं विद्यते, तद्यथा–विद्यावतां भागवते परीक्षा’ अस्य श्रीमद्भागवतशास्त्रस्य वैशिष्ट्यमनेनैव स्पष्टं भवति यदाधुनिकेऽस्मिन् परिवेशेऽपि सर्वत्र एतत्कथामन्दाकिनी प्रवहन्ती दृश्यते। तथैव विद्वान्सोऽपि विविधटीकाप्रणयनेन निरन्तरमस्य महाग्रन्थस्य ग्रन्थिभेदनं कृतवन्तः। यद्यपि विद्वद्भिः टीकाकारैश्चेदं शास्त्रमधिकृत्य व्याकरणशास्त्रदृष्ट्यापि सुबहुप्रतिपादितं तथापि विद्वान्सः किमपि नूतनं स्फोरयितुं शब्दशास्त्रीयं चिन्तनमत्रानारतं कुर्वन्त्येव। श्रीमद्भागवतशास्त्रस्य प्रारम्भिकाणि मङ्गलपद्यान्यत्यन्तमेव सरसानि भावपूर्णानि च वर्तन्ते। दार्शनिकदृष्ट्यापि विद्वद्भिर्मङ्गलपद्यपरिशीलनं विधीयते। यथाऽस्माभिः पूर्वमपि निर्दिष्टं यद् व्याकरणशास्त्रस्य विविधानि तत्त्वानि नवनवार्थानुसन्धाने विशिष्टां भूमिकां निर्वहन्ति, तस्मादेव अस्माभिरत्र प्रारम्भिकमङ्गलपद्यत्रयस्य समासशास्त्रीयं परिशीलनं विधीयते। अत्रेदमुल्लेखनीयं यच्छलोकघटकीभूतानां पद्यानां विग्रहप्रकारोऽपि नूतनार्थानुसन्धाने महत्त्वपूर्णां भूमिकां निर्वहति।

व्याकरणशास्त्रस्य घटकीभूतस्य समासशास्त्रस्य प्रयोगक्षेत्रमपि विशालं वर्तते, प्रायशः तत्प्रयोगेण कवयो विद्वान्सो दार्शनिकाश्च समासानां प्रयोगं विधाय स्वकीयासु पदावलीषु महान्तमर्थं बिभ्रति, तस्मादिह आदिमानां मङ्गलपद्यानां समासदृष्ट्या निरूपणं विधीयते।

कूटशब्दाः–श्रीमद्भागवतम्, मङ्गलाचरणम्, व्याकरणम्, समासः, साहित्यम्, पुराणम्।

प्रथमपद्यगतसमस्तपदविमर्शः–

श्रीमद्भागवतस्यादिमे मङ्गलाचरणात्मके पद्ये भागवतकारेण नैकेषां समस्तपदानां प्रयोगो विहितः तत्र ‘जन्माद्यस्य’[2] इति पदे जन्म आदिर्यस्येति तद्गुणसंविज्ञानबहुब्रीहिसमासो वर्तते, अभिप्रायोऽयं वर्तते यद् यस्मिन् जन्मादिपदेनैव स्थितिभङ्गयोरप्यवबोधो जायते। महर्षिणा वेदव्यासेन वस्तुतः ब्रह्मसूत्रस्यादिमसूत्रेणैवैतस्य महत्त्वभूतस्य भागवतशास्त्रस्यारम्भो विहितः। अपरं वैशिष्ट्यमपि जन्मादिपदेन द्योत्यते तच्च जन्म आदिर्ययोरिति विग्रहेणान्यपदार्थत्वेनात्र स्थितलययोरप्यवबोधो भवति। जन्मादिपदे य आदिशब्दः सः व्यवस्थावाची वर्तते। तत्रैव मङ्गलाचरणात्मके प्रथमे पद्ये ‘अभिज्ञ’[3] इति पदमपि वर्तत एतस्य च विग्रहवाक्यम् अभि जानाति इति अभिज्ञः (तम्) अत्र उपपदतत्पुरुषसमासो वर्तते, जानातीति ज्ञः अत्र ‘ज्ञा अवबोधने’[4] धातोः ‘आतश्चोपसर्गे’[5] इत्यनेन शास्त्रेण क–प्रत्यये विहिते ज्ञ इति पदं सिध्यति। ईश्वरो जगतः बुद्धिपूर्वकरचनामकरोत् अथवा कंसवञ्चनादिकार्येष्वेवंविधेषु च प्रयोजनेषु सर्वथाभिज्ञः ईश्वरो वर्तते, यथा सर्वज्ञः इति पदं वर्तते तथैवाभिज्ञः इति पदस्याप्यत्राभिप्रायो वर्तते। अत्रैवान्यपदं स्वराट्[6] वर्तते, स्वेनैव राजते (तम्) इति विग्रहवाक्ये राजृ–दीप्तौ धातोः क्विप्–प्रत्यये राडिति पदं निष्पद्यते। वस्तुतः एतानि सर्वाणि एतादृशानि पदानि ‘धीमहि’[7] (ध्यायेम) इति क्रियया सह अन्वीयन्ते। ‘तेजोवारिमृदाम्’[8] इत्यस्य पदस्य विग्रहवाक्यं तेजश्च वारि च मृच्च तेजोवारिमृदः तासां तेजोवारिमृदाम्, द्वन्द्वगर्भतत्पुरुषसमासोऽत्र वर्तते। एतस्य पदस्य विनिमय इति पदेनान्वयो वर्तते। अस्य पदस्य विषये एवमपि वक्तुं शक्यते यद्यथा क्वचिद् भ्रान्तिवशात् प्रचण्डातपे दूराद् दृष्टे सति दूरदेशे जलस्याभावेऽपि जलस्य भानमनुभूतिर्वा भवति तथैव वेदान्तदृष्ट्या संसारस्य जगतो वा परमार्थतः सत्ता न विद्यते परन्तु पुनरपि तस्यानुभूतिर्जायते। तथैवाजलेऽपि जलबुद्धिरेव तेजोवारिमृदां विनिमय इत्यस्ति।

प्रकृते ‘त्रिसर्गः’[9] इति पदे सङ्ख्यापूर्वत्वाद् ,‘संख्यापूर्वो द्विगुः’[10] इति शास्त्रानुसारं द्विगुसमासे विहिते त्रयाणां सर्गाणां समाहार इति विग्रहवाक्यपुरः सरं ‘द्विगुरेकवचनम्’[11] ‘स नपुंसकम्’[12] इत्यादिभिः शास्त्रवचनैश्च त्रिसर्गमिति पदं स्यात् परन्तु पुनरपि भागवतकारेण ‘त्रिसर्ग’ इति पुंलिङ्गे प्रयोगो विहितः तस्माद् वक्तुं शक्यते यदत्र द्विगुसमासश्च नास्त्येव तर्हि किं त्रयश्चेमे सर्गाश्च त्रिसर्गाः इत्यत्र ‘तत्पुरुषः समानाधिकरणः कर्मधारयः’[13] इति नियमेन कर्मधारयसमासः स्यात् पुनश्च व्यक्तिपक्षे एकवचने ‘त्रिसर्ग’ इति भवेदित्यपि समीचीनं न

प्रतीयते तर्ह्यन्ते त्रयः सर्गाः यस्य (परमात्मनः) बहुव्रीहिसमासेनैव विषयस्य प्रतिपादनं कृतं स्यात्, अत्रास्माभिरपि एवमेवानुभूयते यद् वस्तुतोऽत्र भागवतकारेण बहुव्रीहिसमासस्याश्रयेण परमात्मा श्रीकृष्ण एव एतस्याः सत्त्वरजस्तमोगुणान्विताया: त्रिविधसृष्टेः स्रष्टा वर्तते, तं प्रत्येव त्रिसर्ग इति पदं सङ्केतयति। अग्रे 'अमृषा'[14] इति पदस्य विग्रहवाक्यं न मृषा अमृषेत्यत्र नञ्तत्पुरुषसमासो वर्तते। 'न लोपो नञः'[15] इत्यनुशासनेन नकारस्य लोपे सति अकारे शिष्टेऽमृषेति वर्तते, मृषेति मिथ्यावाचकमव्ययपदं वर्तते। कीदृशः त्रिसर्गः? प्रत्युत्तरे अमृषा त्रिसर्ग इति वर्तते। वस्ततुतोऽयं त्रिसर्गोऽसत्यं वर्तते परन्तु परमात्मनो मायया मृषा सन्नप्यमृषा अर्थात् सत्यवत् प्रतीयते। पुनश्च प्रकृते प्रथमे पद्ये 'निरस्तकुहकम्'[16] इत्यस्य विग्रहवाक्यं निरस्तं कुहकं यस्मिन् (तम्) इत्यत्र बहुव्रीहिसमासो वर्तते। कुहकमिति कपटपर्यायो मायालक्षणं तत्कुहकं वक्तुं शक्यते। 'कुह–विस्मापने'[17] धातोः क्वुन्–प्रत्यये कृते सति कुहकमिति पदं निष्पद्यते, यस्मिन् परमात्मनि कपटस्य लेशमात्रमपि न विद्यते, अथवा संसाररूपाज्ञानतमो यस्यानुकम्पया निरस्तं नष्टं जायते, जीवस्य वाज्ञानस्य नाशनेऽपि परमात्मैव समर्थो वर्तते। तादृशं श्रीकृष्णपरमात्मनं वयं ध्यायेम इति भावार्थो वर्तते।

द्वितीयपद्यगतसमस्तपदविमर्शः–

श्रीमद्भागवतस्य प्रथमस्कन्धस्य प्रथमाध्यायस्य द्वितीये पद्ये 'प्रोज्झितकैतवः'[18] इति समस्तपदं वर्तते। एतस्य विग्रहवाक्यं प्रकृष्टतया उज्झितं कैतवं यस्मिन् (सः) इत्यत्र बहुव्रीहिसमासो वर्तते, सः कः ? इति जिज्ञायां प्रोच्यते यत् सः धर्मोऽथवा एतादृशः कपटरहितो धर्मोऽस्मिन् शास्त्रे निगद्यते, यतोऽग्रिमपदेनैतस्यैव पूर्वोक्तस्य पदस्य समर्थने हेतुमुपस्थापयति, 'निर्मत्सराणां सतां'[19] निर्गतं मत्सरं येषामिति ते निर्मत्सराः, तेषां निर्मत्सराणामर्थाच्छलकटपरहिता एव निर्मत्सराः, क्वचिद् मतोऽग्रे सरत्ययमिति। भावोऽयं विद्यते यदसौ मदधिकामुन्नतिं कुरुते इति दृष्ट्वा हृदि य ईर्ष्याभाव उपजायते स एव मत्सरः, तदेव परोत्कर्षस्यासहनमेव मत्सरः , तद्विरहितास्ते निर्मत्सरा इति। अन्यैः शब्दैरपि वक्तुं शक्यते यद् ये आप्ताः शिष्टा विबुधाश्च सन्ति येषाञ्च वाक्यमसंशयं वर्तते, तादृशाः सत्ये स्थिता नीरजस्तमा एव निर्मत्सराः सन्ति। प्रश्नोऽयमुदेति यत्कस्मात् ते निर्मत्सराः? तत्रोच्यते एवंविधानां नीरजस्तमसां साधूनां कश्चनापि निजस्वार्थो न वर्तते. मायारहिताश्च ते कस्माद् हेतोरसत्यभाषणं करिष्यन्ति, नूनं ते सत्याचरणं सत्यभाषणञ्चैव विधास्यन्ति, तेषाञ्च चेतांसि सर्वथा मालिन्यरहितानि वर्तन्ते, मलस्य लेशमात्रमपि तत्र न विद्यते। कैतवमिति पदं कितवस्य भावो गुणो वैतस्मिन्नर्थे तद्धितवृत्तौ अण्–प्रत्यये कृते निष्पद्यते। कैतवोऽत्र, इत्यस्मिन् पदे अत्रेति अव्ययम् अस्मिन् श्रीमद्भागवतशास्त्रे इत्यस्य कृते प्रयुक्तः, अर्थात् अस्मिन् भागवतमहापुराणे प्रोज्झितकैतवो धर्मः प्रकथित इत्यभिप्रायः।

कीदृशं भागवतरूपवस्तु तत्त्वं वा वर्तते? तस्मिन् विषये कथ्यते – 'शिवदम्' [20] शिवं (कल्याणं) ददातीति शिवदम्, अत्रोपपदतत्पुरुषसमासो वर्तते। एवंविधेन शिवदवस्तुना किं स्यात्? तस्मिन् विषये प्रोच्यते यत्त्रयाणां तापानामुन्मूलनमनेन स्यात्तदेव निगदितं भागवतकारेण 'तापत्रयोन्मूलनम्'[21] इति तापत्रयस्योन्मूलनं तापत्रयोन्मूलनं षष्ठीतत्पुरुषसमासः, भौतिकाध्यात्मिकाधिदैविकत्वेन त्रिविधतापाः प्रसिद्धा एव। एवं विधानां तापानां सर्वथा समूलकाशकशनं श्रीमद्भागवतशास्त्रेण भवति। सर्वेऽपि प्राणिन एभिः त्रिभिरेव तापैः सन्तप्ताः सन्ति। यथा घर्मकाले निदाघतप्ताः जनाः गङ्गाजलावगाहनेन शान्तिमधिगच्छन्ति तथैव भागवतरूपवस्तुनो मननेन चिन्तनेन निदिध्यसनेन च मानसशान्तिं प्राप्नुवन्ति। केनायं शास्त्रं प्रणीतम्? तस्मिन् विषये निगद्यते यद् महामुनिना श्रीमता वेदव्यासेनैतत्प्रणीतम्। महामुनिरिति विशेषणपदं महर्षिवेदव्यासाय प्रयुक्तम्। 'महामुनिः'[22] इत्यत्र विग्रहवाक्यं महांश्चासौ मुनिश्च महामुनिः 'कर्मधारयसमासः' महामुनिना कृतमिति महामुनिकृतं,तस्मिन् महामुनिकृते।

तृतीयपद्यगतसमस्तगतविमर्शः–

पद्येऽस्मिन् 'निगमकल्पतरोः'[23] इति समस्तपदं वर्तते तस्य विग्रहवाक्यं तु निगमरूपश्चासौ कल्पतरुश्च, निगमकल्पतरुः तस्य 'निगमकल्पतरोः' मध्यमपदलोपितत्पुरुषसमासः। निश्चयेन निःशेषेण सम्पूर्णतया वा गमयति बोधयति वा सर्वविधान् पुरुषार्थोपायान् सः निगमः, निगम इति पदमत्र वेदवाचकः, तादृशस्य निगमरूपस्य कल्पतरोः (वेदस्य) गलितं सुपक्वं फलं भागवतं वर्तते। कल्पतरोरिति साकाङ्क्षपदं वर्तते फलमित्यत्र तस्य पूर्णकं पदम्।

अग्रिमं समस्तपदं 'शुकमुखाद्'[24] इति वर्तते, शुकस्य मुखमिति विग्रहवाक्यम्, तस्मात् शुकमुखात्, षष्ठीतत्पुरुषसमासः, अथवा शुकमुखं यस्येति बहुव्रीहिः। अत्र शुक इति पदेन महामुनिर्भगवान् शुकदेवो व्यासनन्दनः कथ्यते, क्वचिच्च भागवते वैयासकिरित्यपि तस्य संज्ञा वर्तते। अपरस्मिन् लौकिकेऽर्थे शुक इति शुकपक्षिपर्यायपदं तत्र लौकिके व्यवहारे शुकपक्षिणः प्रसिद्धं किञ्चिद् वैशिष्ट्यमिदं

समासेनाकर्ण्यते– शुकपक्षिविशेषो विशेषतया फलस्य निरीक्षको भवति, स यस्मिन् फले स्वीयचञ्च्वा प्रहारं स्पर्शनं वा कुरुते तत् फलं सामान्यफलापेक्षया अतीव मधुरं स्वादु च वर्तते। तया दृष्ट्या भागवतशास्त्रं पश्यामश्चेदत्रापि भगवतः शुकदेवस्य मुखादेतस्य भागवतशास्त्रस्य प्रवचनं निसरणं वा जातं, राजा परीक्षितश्चेवंविधस्य भागवतरूपस्य विशिष्टफलस्य प्रधानतया भोक्ता, तन्माध्यमेनैवान्ये सर्वे ऋषयो सामान्याः जनाः पिपासवश्चापि एतस्य फलस्य रसास्वादनमकुर्वन्। अतो विशिष्टमेव एतच्छास्त्रं वर्तते, नास्त्यस्य वैशिष्ट्ये कश्चन सन्देहलवोऽपि।

सम्प्रति 'अमृतद्रवसंयुतम्'[25] इति समस्तपदं वर्तते, अमृतञ्चेदं द्रवञ्च अमृतद्रवं, तेनामृतद्रवेण संयुतममृतद्रवसंयुतम्, अत्रादौ कर्मधारयसमासः पुनश्च तृतीयातत्पुरुषः अतः, कर्मधारयगर्भतृतीयातत्पुरुषसमास इति वक्तुं शक्यते। अमृतद्रवसंयुतमेतस्य व्याख्याने श्रीधराचार्यचरणा ब्रूवन्ति यद् – 'अमृतरूपेण द्रवेण संयुतमिति'[26] अमृतमित्यस्य सामान्योऽर्थः यो मरणधर्मा नास्ति, अथवा अस्य कदापि मरणं विनाशो वा न जायते, तादृशस्तु परमात्मैव विद्यते अतोऽमृतपदेन परमात्मनः श्रीकृष्णस्यैव बोधो वरिवर्ति।

उपसंहारः–

इत्थमस्माभिः श्रीमद्भागवतमहापुराणस्य मङ्गलपद्यत्रयस्य समासशास्त्रीयं विवेचनमत्र प्रास्तावि। अत्र विविधप्रकारो बहुविधविग्रहः, तस्यापि संक्षेपेणैव निर्देशोऽस्माभिः कृतः। कथं विग्रहप्रकारवैविध्येन अर्थेष्वपि वैलक्षण्यं जायते इत्यप्यत्र सङ्केतितम्। इदमस्माभिरवधेयं यदत्र प्रायशोऽव्ययीभावसमासमतिरिच्य तत्पुरुषादीनां समेषां समासानां भेदोपभेदानामुदाहरणानि प्राप्यन्ते। इदं वक्तुं शक्यते यदस्याः पद्यत्रय्याः वैशिष्ट्यं सम्पादने सरसतायाश्चाधाने समासानां वैशिष्ट्यं वर्तते।

पादटिप्पणी

1. महाभाष्यम् – प्रथमोऽध्यायः, सूत्रसंख्या – 1.3.1
2. जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
   तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।
   तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा।
   धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि।। श्रीमद्भागवतमहापुराणम् , 1.1.1
3. श्रीमद्भागवतमहापुराणम् , 1.1.1
4. पा.धातु.पा. चौखम्भा संस्कृत सीरीज्, धातुसं.–1507
5. पा.अ.–3.1.136
6. श्रीमद्भागवतमहापुराणम् –1.1.1
7. श्रीमद्भागवतमहापुराणम् – 1.1.1
8. श्रीमद्भागवतमहापुराणम् – 1.1.1
9. श्रीमद्भागवतमहापुराणम् – 1.1.1
10. पा.अष्टा.सङ्ख्यापूर्वो द्विगुः–2.1.52
11. पा.अष्टा.–2.4.1
12. पा.अष्टा.–2.4.17
13. पा.अष्टा.–1.2.42
14. श्रीमद्भागवतमहापुराणम् , 1.1.1
15. पा.अष्टा.–6.3.73
16. श्रीमद्भागवतमहापुराणम् , 1.1.1
17. पा.धातु.पा.– (चौखम्भा संस्कृत सीरीज्) धातुसंख्या – 1901
18. धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां,
    वेद्यं वास्तवमत्र वस्तुशिवदं तापत्रयोन्मूलनम्।
    श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः,
    सद्यो हृद्योऽवरुध्यतेऽत्र कृतिभिः सुश्रुषिभिस्तत्क्षतात्।।
19. श्री.भा.महा.पु.– 1.1.2
20. श्री.भा.महा.पु.– 1.1.2
21. श्री.भा.महा.पु.– 1.1.2
22. श्री.भा.महा.पु.– 1.1.2
23. निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
    पिबत भागवतं रसमालयं मुहुरहो रसिका भुविभावुकाः।। श्री.भा.महा.पु.– 1.1.3
24. श्रीमद्भागवतमहापुराणम् – 1.1.3
25. श्रीमद्भागवतमहापुराणम् – 1.1.3
26. श्रीमद्भागवतम्, श्रीधरीटीका, 1.1.3

सहायकाचार्यः, व्याकरणम्
केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, बलाहरः, कांगडा, हि.प्र.

ISSN 2348-7828

हलन्त्यम् आदिरन्त्येन सहेतेत्यनयोः सूत्रयोर्मध्ये अन्योन्याश्रयदोषपरिहारः

डॉ. भूपेन्द्रकुमार ओझा

शोधसारः-लोकवन्दितं प्रसिद्धतमं व्याकरणशास्त्रं प्रक्रियांशैः परिकारांशैः दर्शनांशैः त्रिधा विभक्तो विद्यते। शब्दानुशासनशास्त्रेऽस्मिन् शब्दसाधुत्वस्य महत्वपूर्णस्थानं विद्यते। अस्मिन् विषये निगदितं भर्तृहरिणा वाक्यपदीये-तस्मान्निबध्यते शिष्टैः शब्दसाधुत्वविषया सैषा व्याकरणस्मृतिः[1]। शब्दसाधुत्वप्रतिपादकाः नैके सिद्धान्ताः सन्ति। तत्र प्रक्रियांशभागे नैकानि सूत्राणि सन्ति, तत्र प्रक्रियांशभागे प्रत्याहारनिर्माणमेका विशिष्टा प्रक्रिया विद्यते। प्रत्याहारनिर्माणे हलन्त्यम्[2], आदिरन्त्येन सहेता[3] अनयोः सूत्रयोः महत्वपूर्णं स्थानं विद्यते। अनयोः सूत्रार्थयोः मध्ये अन्योन्याश्रयदोषो दर्शितः शास्त्रकारैः तस्य दोषस्य नैकानि समाधानानि वैयाकरणसिद्धान्तकौमुदीप्रौढमरोरमा-लघुशब्देन्दुशेखरमहाभाष्यादिग्रन्थेषु विद्यन्ते।

कूटशब्दाः-संस्कृतव्याकरणम्, पाणिनिः, सूत्रम्, हलन्त्यम्, आद्रिरन्त्येनसहेता, अन्योन्यश्रयदोषः, लक्षणम्, लक्ष्यम्, परिष्काटः।

वैयाकरणसिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितेन उक्तम्-एषामन्त्याः इतः, अस्याशयो विद्यते यत् एषां-नाम चतुर्दशसूत्राणामन्त्याः - अन्तिमवर्णाः इत्संज्ञकाः भवन्ति। तदा केन सूत्रेणेत्संज्ञा जायते, हलन्त्यं सूत्रमुपस्थितं भवति। अस्य सूत्रस्यार्थो भवति-उपदेशेऽन्यंः हलित्स्यात्। वाक्यार्थज्ञाने पदार्थज्ञानं कारणं भवति। अर्थेऽस्मिन् हल्पदार्थस्य ज्ञानमपेक्षितं विद्यते। हलन्त्य सूत्रे अन्तशब्दान्त्यावयवपरः विद्यते, परन्तु हल्पदार्थस्य ज्ञानं नास्ति, यतपेक्षितं विद्यते, व्याकरणशास्त्रे त्रयः हल्पदार्थाः सन्ति। हल्[4]-विलेखनार्थकधातुः हकारादिलान्तसमुदायः, हल्चतुर्दशसूत्रम्[5]। यदि हलन्त्यं सूत्रे हल्पदार्थेन हल्विलेखनार्थकस्य धातोः ग्रहणं स्यात् तदा लकारस्यैव इत्संज्ञां करोति हलन्त्यं सूत्रम्।

यदि हल्विलेखनार्थकधातुः वा चतुर्दशसूत्रं वा गृह्यते तदा न विभक्तौ तुस्माः[6] इदं सूत्रं व्यर्थं भविष्यति, इदं सूत्रं विभक्तिस्थसकारम-काराणामित्संज्ञायाः निषेधं विदधाति। प्राप्तौ सत्यामेव निषेधः भवतीति नियमो विद्यते। यद्यत्र हल्पदेन हल्-विलेखनार्थस्य, हल्चतुर्दशसूत्रस्य वा ग्रहणं स्यात् तदा न विभक्तौ तुस्माः इति सूत्रस्य निषेधः व्यर्थमेव स्यात्। न विभक्तौ तुस्माः इति सूत्रस्य सार्थकतामुपपादयितुम् अत्र हल्पदेन हल्धातोः हल्चतुर्दशस्य वा ग्रहणं नास्ति। अत इदं सूत्रमेव प्रमाणं वर्तते, यदत्र हल्पदेन हकारादिलान्तसमूहात्मकप्रत्याहारो गृह्यते, उक्तव्याख्यानेन ज्ञायते यत् हलन्त्यं सूत्रे हल्पदार्थस्य ज्ञानमपेक्षितं तत् ज्ञानम् आदिरन्त्येन सहेता सूत्रार्थवाक्याधीनं विद्यते, तथा च प्रत्याहारविधायकम् आदिरन्त्येन सहेता सूत्रेऽस्मिन् इत्पदार्थस्य ज्ञानमपेक्षितं विद्यते, तत्ज्ञानं हलन्त्यं सूत्रार्थवाक्याधीनं विद्यते। हलन्त्यं सूत्रे यः हल्पदार्थः विद्यते तस्य ज्ञानम् आदिरन्त्येन सहेता सूत्रार्थवाक्याधीनं विद्यते। अतः परस्परापेक्षत्वमन्योन्याश्रयत्वमिति तथा च स्वज्ञप्त्यधीनज्ञप्तिकत्वञ्चान्योन्याश्रयत्वमिति लक्षणं प्रतिपादितं विद्यते। अन्योनाश्रयदोषपरिहाराय श्रीदीक्षितमहोदयेन हलन्त्यमिति सूत्रस्य द्विधा आवृन्ति कृता विद्यते। सर्वेषां शास्त्रकाराणां मते प्रथमावृतहलन्त्यमिति सूत्रं पदमेकं समस्तञ्च विद्यते। अस्मिन् सूत्रे षष्ठी[7] इति सूत्रेण समासः दीक्षितमहोदयेन स्वीक्रियते, हलः अन्त्यमिति विग्रहे, येन सूत्रस्यार्थो भवति यत् - हल् इति चतुर्दशसूत्रस्यान्तिमस्य लकारस्येत्संज्ञा भवति। एवं च मनोरमायां दीक्षितमहोदयेन हलि अन्त्यमिति वाक्विवक्षायाम् अत्र सह सुपा[8] सूत्रेण सप्तमी समासस्यापि विवक्षा क्रियते, परन्तु सह सुपा सूत्रेण समासस्तु अगतिकानां गतिः विद्यते। अत एव अनेके समासाः प्रदर्शिताः। हलन्त्यमिति प्रथमे सूत्रे षष्ठी समासः एव येन सूत्रार्थो भवति - हलिति चतुर्दशसूत्रेऽन्त्यः लकारः इत्स्यात्। तदा अनत्यस्येत्संज्ञस्य च ज्ञानं भवति। तदनन्तरम् आदिरन्त्येन सहेता इति सूत्रेण प्रत्याहरनिर्माणं भवति। तदा द्वितीयहलन्त्यमिति सूत्रं पदद्वयमसमस्तं पदद्वयं हलिति प्रथमान्तं पदम् अन्त्यमिति प्रथमान्तं पदं विद्यते। अतः अनेन सूत्रेण हल्रूपान्तस्येत्संज्ञा भवति। येनान्योन्याश्रदोषस्य परिहारः भवतीति वैयाकरणसिद्धान्तकौमुद्याशयः वर्तते। प्रौढमनोरमायां निरूपितं भटोजिदीक्षितेन तदाशयः प्रस्तूयते। आदौ मनोरमायां हलन्त्यमिति सूत्रे समासविषये चर्चा कृता विद्यते-यदि हलि अन्त्यमिति विग्रहे सप्तमी सौण्डैः[9] सूत्रेण क्रियते तर्हि सौण्डादिगणे पाठः अपेक्षितो भवति। परन्तु सौण्डादिगणे अन्तशब्दस्य पाठो नास्ति अतः सप्तमी समासः न युक्तः, यदि सप्तमी सौण्डैः सूत्रस्य योगविभागं कृत्वा समासः क्रियते चेत् अस्य सूत्रस्य योगविभागो न कर्तुं शक्यते। महाभाष्ये अस्य सूत्रस्य योगविभागो न दृश्यते। अस्मात् कारणादेव अत्र हलन्त्यं सूत्रे सप्तमी समासः नास्ति। तदनन्तरं षष्ठी

समासस्य चर्चा कृता वर्तते, परन्तु षष्ठिविभक्तिः द्वयोः भिन्नपदार्थयोः भवति तथा च सम्बन्धार्थमुपस्थापयति यथा रामस्य पुत्रः – रामपुत्रः अत्र षष्ठी सूत्रेण द्वयोः भिन्नपदार्थयोः समासः तथा च जन्यजनकभावः सम्बन्धो दृश्यते, तद्वत् हलन्त्यं सूत्रे कश्चन भेदः सम्बन्धश्च अपेक्षितः स्यात्। चेत् तर्हि षष्ठी समासः भवति। अत एव मनोरमायां सामीप्यं षष्ठ्यर्थः यद्वेति[10] पूर्वपक्षरूपेणोपस्थापितः दीक्षितमहोदयेन परन्तु शास्त्रे लोके सामीप्यं षष्ठ्या: समासो न भवति यथा ब्राह्मणकम्बलः इत्यादौ ब्राह्मणसमीपवर्त्यन्यदीयः कम्बलः प्रतीयते[11]। न वा चित्रगुशब्दाच्चित्रगवीणां समीपवर्ती वृक्षादिः प्रतीयते[12]। ब्रह्मणकम्बल इत्यत्र समासासमायोरुभयोः स्थलयोः ब्रह्मणस्वामी स्वत्ववान् कम्बलः इत्यस्य प्रतीतिः भवति न तु समीपार्थस्य। अत एव भगवता भाष्यकारेण समीपादिष्वर्थेषु षष्ठीसमास्य निषेधः कृतः विद्यते यथा– अत एव अन्तरादिषु न समासो, अनभिधानादिति स्पष्टमाकरे[13]। किं बहुना ब्राह्मणस्य कम्बलः चित्रा गावो अस्य इति व्यस्तप्रयोगोऽपि तत्रानिष्टः[14]। अस्तु समाहारद्वन्द्वः अस्मिन् विषये यदि हल् च ल इति विग्रहे चार्थे द्वन्द्वे[15] सूत्रेण समासे सति लकारद्वयं घटितं रूपं भविष्यति। अयमेव दोषः द्वन्द्वपक्षे वर्तते। हलन्त्यं सूत्रे प्रौढमनोरमायां सप्तमी समासः अयमेव विषयः पूर्वपक्षरूपेणोपस्थाप्य सह सुपा[16] सूत्रेण समासं प्रदर्श्य निष्कर्षरूपेण षष्ठी समासः स्वीकृतः श्रीमता दीक्षितमहोदयेन तथा च हलन्त्यं सूत्रमावृत्यान्योन्याश्रयदोषः परिहृतः। नागेशभट्टेन शेखरे यत् व्याख्यातं तत्प्रस्तूयते – स्यादेतत्। न विभक्तौ तुस्माः इत्यादेः सार्थक्याय हलन्त्यम् इत्यस्योपदेशेऽन्त्यं हल् इदित्यर्थस्यावश्यकत्वेन हलन्त्यम् आदिरन्त्येन इत्यनयोः परस्परापेक्षत्वेनाऽन्योन्याल्लकारे इत्संज्ञामबोधयित्वा हलामित्सञ्ज्ञाबोधनं पाणिनेरयुक्तम्[17]। अन्योन्याश्रयपरिहारायानेके प्रकल्पाः प्रदर्शिताः–प्रथमं तावत् हयवरट् इत्यादेरावृत्त्या शषस 'इत्यन्तं' नव सूत्रमुदिश्य दशमेव हलिति चतुर्दशसूत्रेण हल्संज्ञा क्रियते[18]। पक्षेऽस्मिन् दश सूत्रावृतिरूपं गौरवं विद्यते, तस्मादिदं मतं समीचीनं नास्ति। द्वितीयं समाधानं यथा – हलन्त्यम् आदिरन्त्येन सहेतेत्यनयोः सूत्रयोर्मध्ये प्रथमन्तावत् हलन्त्यमिति सूत्रे हल्पदार्थस्य वाक्यार्थबोधाय हल्पदार्थस्य ज्ञानमपेक्षितमत एवान्योन्याश्रयदोषः भवति। यदि हलन्त्यम् आदिरन्त्येन सहेतेत्यनयोः स्थाने–उपदेशे इदन्त्यम्[19], अच्[20], अनुनासिकः[21] इति सूत्रत्रयं यदि स्यात्। तथा–प्रथमसूत्रम् उपदेशे इदन्त्यमित्यस्य सूत्रार्थः–उपदेशावस्थायामन्त्याच्हल्वर्णयोरित्संज्ञा भविष्यति। द्वितीयेन अजिति सूत्रेण अनत्यस्येत्संज्ञा भवति, सूत्रद्वयेन–उपदेशे इदन्त्यम्, अज् चेत्यनेन अन्तेऽनन्ते चेत्संज्ञा सिद्धयति,येन रू, यू, भू प्रभृतिषु धातुषु द्वितीयेन सूत्रेणेत्संज्ञा प्राप्नोति। आदौ च हल्वर्णानामित्संज्ञाबोधनायानेकानि सूत्राणि विद्यन्ते, यथा–चुटू[22], लशक्वतद्धिते[23]। तदा तृतीयम् अनुनासिकः इदं सूत्रं व्यर्थं स्यात्। व्यर्थं सद् नियमं करोति। यद् अस्मिन् अनुनासिकः इति तृतीये सूत्रेऽजिति द्वितीयसूत्रात् अच्पदस्यानुवृत्तिः क्रियते। तृतीयेऽजित्यनुवृतौ सूत्रार्थो अचामित्संज्ञा तदा अनुनासिकानामेव अच्सूत्रानुवृतिसामर्थ्यादच्चेदित्भवति, तर्ह्यनुनासिकः एवेति नियमाश्रयणात् रुप्रभृतौ न दोषः[24] अस्य तात्पर्यं वर्तते यत् अन्ते यद्यचामित्संज्ञा तदानुनासिकानामेव नियमोऽयं स्वीकारात् रू यू भू इत्यादीनामन्ते स्थितानां धातूनामज्वर्णानामित्संज्ञायाः व्यावृतिर्भविष्यति। मतमिदं शेखरे निरूपितं विद्यते। एवञ्च नास्ति यत्र शुद्धनियमो भवति तत्र विपरीतनियमः आश्रियते यथा – प्रथमं तावत् अचामित्संज्ञा तदानुनासिकानामेवेति शुद्धनियमः। यद्यत्र विपरीतः नियमः स्यात् तदा तस्य स्वरूपं यथा–अनुनासिकानामित्संज्ञा तर्ह्यचामेव, तदा अनुनासिकहल्वर्णानामित्संज्ञैव न प्राप्नोति। मकारस्येत्संज्ञायाः प्रयोजनमपि दृश्यते यथा यः आगमः मिद्भवति सः आगमिनः अन्त्याचवयवः भवति, एतादृशं सूत्रं विद्यते मिदचोऽन्त्यात् परः इति। अत्र मित्पदे समासः वर्तते–मकारः इत् यस्य सः मिदिति। यस्मिन् आगमे मकारस्येत्संज्ञा भवति, तदागमः अन्त्यादचः परे स्यात्, तस्य च प्रयोजनम्। आगमिनः पूर्वावयवविधानमपि इति कार्यद्वयं विना अनुनासिकसंज्ञकहल्वर्णानामित्संज्ञा न संभवति। विद्यतेऽयं नियमः अन्यथा मिदचोऽन्त्यात् परः[25], अचोऽञ्णिति[26] इति सूत्रद्वयेन ज्ञायतेऽत्र विपरीतनियमो नास्ति। अन्यथा विपरीतनियमास्वीकारादेव मकारञ्कारण्काराणामित्संज्ञाः तत्तत्सूत्रेण सिद्धयन्ति। अनन्तरस्य विधिर्भवति प्रतिषेधो वा[27] अस्याशयः – अन्तरं व्यवधानं, न विद्यते अन्तरं व्यवधानं यत्र तदनन्तरं तस्य अन्तरस्य व्यवधानरहितस्य विधिर्भवति प्रतिषेधो वा यदीयं परिभाषात्र प्रवर्तिता स्यात् तर्हि तृतीयमनुनासिकः सूत्रं व्यवधानरहितेऽच्सूत्रे एव नियमं करोति। व्यवधानसहिते प्रथमे सूत्र उपदेशे इदन्त्यमित्यत्र नियमं न करिष्यति। येन रू श्रु भू प्रभृतिषु धातुष्वच्वर्णानामित्संज्ञा प्राप्नोति। अस्मिन् विषये समाधानं विद्यते यत् – योगविभागसामर्थाच्चानन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन नियमः[28]। यद्येतादृशः नियमं विवक्षितः स्यात् तदा योगविभागः व्यर्थमेव स्यात्। अस्य तात्पर्यं विद्यते यत् अनुनासिकः इति सूत्रं

व्यवधानरहितं व्यवधानसहितं चोभयोः स्थलयोः नियमः करिष्यति, येन उपदेशे इदन्त्यमिति सूत्रेऽपि नियमः भविष्यति। अन्योन्याश्रयदोषं परिहर्तुं शेखरकारः मतान्तरं प्रस्तौति–अन्योन्याश्रयदोषः तदा भवति यदा हल्बोधकं पदं तथा च इत्बोधकं पदं मात्रं संज्ञापरकं भवति। अस्मिन्नेव पक्षे। हलन्त्यम् सूत्रघटकं हल्पदार्थज्ञानमित्पदार्थाधीनमेवञ्चेत्पदार्थज्ञानम् आदिरन्त्येन सहेता सूत्राधीनं विद्यते। आदिरन्त्येन सहेता सूत्रघटकं सहेता पदं यदि योगरूढः स्वीक्रियते तर्हि अन्योन्याश्रयदोषवारणस्यावश्यक्ता एव न भविष्यति पूर्वं तावत् – सह आङ् पूर्वकं कटी वी धातुभ्यां इधातोः प्रश्लिष्टात् कर्तरि तृच्प्रत्यये कृते सति, सह+आ+एतृ इत्यत्र एङि पररूपम्[29] इत्यनेन पररूपे सति – सह+एति इति जाते। ओमाङोश्च[30] इत्यनेन पररूपे सति सहेता शब्दो निष्पद्यते। अस्यार्थः क्रियते सह–आ=समन्तात् एति गच्छति नाम बुद्धिविषयो भवतीति – सहेता नाम = मध्यमो वर्णः अन्यसहितादिसंज्ञकः स्यात्। अत्र पक्षे सहेता–मध्यमवर्णः संज्ञी आद्यन्तश्च संज्ञा भवति। अस्मिन् पक्षे सहेता पदेन आद्यन्ताभ्यां सह बुद्धिविषयकत्वेन मध्यमवर्णबोधकत्वात् यस्य कस्यापि प्रत्याहारबोधस्यापेक्षा भवति तस्य आद्यन्तयोः वर्णयोरादाय मध्यगतवर्णानां बोधो भविष्यति। एवमेव सर्वेषाम् अजादिप्रत्याहाराणां परिज्ञानं भविष्यति। अनेन प्रकारेण हलन्त्यम् सूत्रार्थबोधाय हल्पदार्थज्ञानं भविष्यति। अत्र पक्षे अन्योन्याश्रयदोषवारण–स्यावश्यक्ता एव न वर्त्तते। अस्मिन् पक्षे श्रीनागेशः दोषद्वयं दर्शयति, यत् भाष्ये महाभाष्यकारेण अन्योन्याश्रयदोषः दर्शितः एवञ्च समाधानमपि कृतं तत् सर्वं व्यर्थमेव भविष्यति। एवं सहेतृशब्दस्य योगरूढस्वीकृते सति महाभाष्यकारेण सह विरोधो भविष्यति। द्वितीयः दोषः विद्यते यत् सहेतृशब्दस्य सिद्धौ आङ् उपसर्गस्य प्रयोगः क्रियते परन्तु तस्यार्थस्य शाब्दबोधे अनुपयोगः एव दृश्यते। अतः मतमिदं समीचीनं न प्रतिभाति। हलन्त्यमिति सूत्रभाष्येऽप्यन्योन्याश्रयमाशङ्क्य 'हलन्त्यमित्संज्ञं भवति तथा लकारश्चेद्भवतीति वक्तव्यम्' इत्युक्त्या 'एकशेषनिर्देशाद्वा सिद्धम् हल्च हल्च = हल्, हलन्त्यमित्' इस्युक्तम् तस्यायं भावः–कृतैकशेषेण हल्पदेन सम्बन्धसामान्यषष्ठ्या समासोऽन्त्यशब्दस्य च द्वन्द्वान्ते श्रूयमाणस्येवोभयत्रान्वयः। एवञ्च इल्सूत्रान्त्यं हलरूपान्त्यं चेति बोधः। अन्त्ये 'राहोः शिरः' इतिवत् षष्ठीति। अत्रोच्चारयितुरेकशेषनिर्देशो बोद्धुस्त्वात्रवृत्त्या बोधः। हसमीपो लकार इत् हलरूपान्त्यञ्चेति बोधः[31]।

अस्यायमर्थः–हलन्त्यमिति सूत्रभाष्येऽप्यन्योन्याश्रयमाशङ्क्य भाष्यकारस्याशयः 'अन्त्यहल्वर्णस्य इत्संज्ञा भवति, लकारश्चेद्भवतीति। हलन्त्यम् सूत्रघटकहल्पदे एकशेषनिर्देशः विद्यते प्रथमं हल्पदं हल्चतुर्दशसूत्रबोधकं द्वितीयं हल्पदं हकारादिलान्तसमूहबोधकं च भवति। अन्तशब्दस्य उभयत्रान्वयः। प्रथमे हलन्त्यम् सूत्रे षष्ठी समासः क्रियते येन सूत्रस्यार्थः भवति। द्वितीये हलन्त्यम् सूत्रे समासः नास्ति हल्रूपान्त्यमित् भवतीति सूत्रार्थः।

पादटिप्पणी

1. वाक्यपदीयब्रह्मकाण्डं श्लो. – 29.
2. पाणिनीयसूत्रपाठः – 1/3/3
2. पाणिनीयसूत्रपाठः – 1/1/71
3. पाणिनीयधातुपाठः – 837
4. माहेश्वरसूत्रम् – 14
5. पाणिनीयसूत्रपाठः – 1/3/4
6. पाणिनीयसूत्रपाठः – 2/2/8
7. पाणिनीयसूत्रपाठः – 2/1/4
8. पाणिनीयसूत्रपाठः – 2/1/40
9. प्रौढमनोरमा – 17 पृष्ठे
10. प्रौढमनोरमा – 19 पृष्ठे
11. प्रौढमनोरमा – 27 पृष्ठे
12. महाभाष्यम् – 1/3/3
13. प्रौढमनोरमा – 27 पृष्ठे
14. पाणिनीयसूत्रपाठः – 2/2/29
15. पाणिनीयसूत्रपाठः – 2/1/4
16. लघुशब्देन्दुशेषरः – 11 पृष्ठे
17. लघुशब्देन्दुशेषरः – 11 पृष्ठे
18. लघुशब्देन्दुशेषरः – 11 पृष्ठे
19. लघुशब्देन्दुशेषरः – 11 पृष्ठे
20. लघुशब्देन्दुशेषरः – 11 पृष्ठे
21. पाणिनीयसूत्रपाठः – 1/3/7
22. पाणिनीयसूत्रपाठः – 1/3/8
23. लघुशब्देन्दुशेषरः – 11 पृष्ठे
24. पाणिनीयसूत्रपाठः – 4/1/47
25. पाणिनीयसूत्रपाठः – 2/7/115
26. लघुशब्देन्दुशेषरः – 12 पृष्ठे
27. लघुशब्देन्दुशेषरः – 12 पृष्ठे
28. पाणिनीयसूत्रपाठः – 6/1/14
29. पाणिनीयसूत्रपाठः – 6/1/95
30. हलन्त्यं सूत्रमहाभाष्ये – 1/3/3

सहायकाचार्यः, व्याकरणविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः,वेदव्यासपरिसरः, बलाहरः, हिमाचलप्रदेशः।

ISSN 2348-7828

भगवद्गीतायां कर्मणः स्वरूपम्

डॉ. प्रियाङ्का चन्द

शोधसारः– कर्मयोगः मुख्यतः गृहस्थानां कृते वर्तते। गृहस्थाश्रमे भूत्वा एव कर्तव्यकर्मणः पालनं कृत्वा सुगमतापूर्वकं परमात्मनः प्राप्तिः भवति। अर्जुनः अपि गृहस्थः। गृहस्थं भूत्वा सः प्राप्तं कर्तव्यकर्म परित्यज्य भिक्षया आजीविकां निर्वहति इति चिन्तयति–' .... श्रेयो भोक्तुं भैक्ष्यमपीह लोके' भगवद्गीता – 2.5। यतो हि तस्य मते युद्धेन सः पापमेव आचरति 'अहो वत् महत्पापं कर्तुं व्यवसिता वयम्' भगवद्गीता – 1.45। अस्मात् सः निर्णयति यत् सः युद्धं न करिष्यतीति – 'न योत्स्येऽहम्' भगवद्गीता – 2.9।

युद्धं न करोमीति पूर्वाग्रहवशात् सः श्रीकृष्णस्य कथनस्य अभिप्रायं नावगतवान्। अतः सः कर्मसंन्यासः(ज्ञानयोगः) एवं कर्मयोगयोर्मध्ये कः श्रेयस्करः इति पृच्छति – 'यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम' 5.1; 'तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्' 3.2; यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' 2.7। यतो हि अर्जुनः गृहस्थः अतः तस्य कृते कर्मयोगः श्रेयस्करः इति श्रीकृष्णः निगदति।

सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते॥
साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥ भगवद्गीता – 5.2,4

कूटशब्दाः–सङ्कल्पं त्यक्त्वा, नियतकर्म, निरासक्तचेतसा, निष्कामभावनया, सङ्गं त्यक्त्वा।

वेदान्ताध्ययने प्रस्थानत्रयं प्रसिद्धं वर्तते। यथा– उपनिषदः, ब्रह्मसूत्राणि, श्रीमद्भगवद्गीता च। तत्र भगवद्गीता महाभारते भीष्मपर्वणि अर्जुनमुद्दिश्य भगवता श्रीकृष्णेन उपदिष्टः अष्टादशाध्यायात्मकः ग्रन्थतुल्यः। श्रीकृष्णस्य समग्रशान्तिप्रयासः विफली बभूव। अतः युद्धातिरिक्तं धर्मरक्षायै अन्यः उपायः अवशिष्टः नासीत्।

अर्जुनः स्वजनानां मृत्योः बिभेति। सः युद्धात् विरतो बभूव। श्रीकृष्णः अर्जुनस्य एतां समस्यां समाधातुं यान् विचारान् प्रस्तुतवान् तेषां सङ्ग्रहात्मको भागः एव श्रीमद्भगवद्गीतानाम्ना अतिशयं सम्मानं महत्वपूर्णं स्थानञ्च प्राप्तवान्। अस्मिन् भागे गूढात्मज्ञानं सृष्टिरहस्यं धर्माधर्मविचाराश्च सङ्कलिताः सन्ति। भगवता श्रीकृष्णेन अर्जुनस्य विषादं विनाशयितुं सांख्यकर्मादियोगानाम् आश्रयः गृहीतः। आत्मनः नित्यतया, जगतः अनित्यतया, कर्मणः स्वरूपादिविश्लेषणपूर्वकोपदेशेन च अर्जुनस्य अज्ञानं मोहः च भग्नः। भगवद्गीतायां निष्कामकर्मणः प्रतिपादनं विहितम्।

अर्जुनः चिन्तयति भीष्म–द्रोणाद्यात्मीयान् कथं सः युद्धे हनिष्यामि। अर्जुनः स्वजनान् न हन्ति चेत् स्वकर्मणः विच्युतः भवति, तेन लोके–परलोके च तस्य पतनं भवति। अतः आपातदृष्ट्या अर्जुनस्य चिन्तनं सम्यक् प्रतिभाति चेदपि वस्तुतः अर्जुनस्य चिन्तनं सुतराम् असमीचीनम्।

सारांशरूपेण एवं वक्तुं शक्नुमः यत् अर्जुनस्य त्रिप्रकारकाः क्लेशाः –

1. पुरतः विद्यमानाः सर्वे अस्मदीया इति ममकारः।
2. आत्मबन्धूनां हननेन इह–परगतिः उत्तमा न भवति इति भ्रान्तिः।
3. अहमेव मारकः भवामि इति कर्तृभावः अथवा अहमेव करोमीति अहङ्कारचिन्ता।

अहङ्कार–ममकार–कर्तृत्वभाव–भोक्तृत्वादिविचाराः एव संसारस्य विसमञ्जस्यस्य बीजानि भवन्ति। एतत् सर्वम् अज्ञानकारणात् भवति। अज्ञानात् जीवः मोहं प्राप्नोति। मोहात् शोकमनुभवति। अतः शोकनाशाय मोहस्य नाशः आवश्यकः। मोह–निर्मूलनं तत्कारणीभूताज्ञाननाशात् भवति। अज्ञानं ज्ञानेन निरस्यति। अतः श्रीकृष्णः ज्ञानोपदेशं कर्तुम् आरब्धवान्।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥ भगवद्गीता – 2.2

श्लोकेऽस्मिन् अर्जुनस्य चिन्तनं त्रिप्रकारैः खण्डयति श्रीकृष्णः। 1. अनार्यदृष्ट्या 2. अस्वर्ग्यम् 3. अकीर्तिकरम्। अत्र प्रथमास्ति आध्यात्मिकदृष्टिः, द्वितीयास्ति नैतिकदृष्टिः, तृतीयास्ति ऐहिकदृष्टिः। तस्मात् यया कयापि दृष्ट्या अर्जुनस्य विचारः नैव उत्तमः। अतः युद्धम् अवश्यं कर्तव्यम् इति श्रीकृष्णः अर्जुनम् उपदिशति।

पादपूज्यानां हननेन परगतिः सम्यक् न भवति, तस्मात् नरकयातना भोक्तव्या भवतीति अर्जुनस्य मनसि पापभयम् आसीत्। अर्जुनस्य मनसि विद्यमानम् एनं पापभयं दूरीकर्तुं श्रीकृष्णः क्षात्रधर्मस्य प्रकरणम् आरब्धवान्।

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।

धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते॥ भगवद्गीता - 2.31

क्षत्रियेभ्यः धर्मयुद्धः श्रेयस्करः भवति यत् अर्जुनः स्वतः प्राप्तवान्। स्वतः प्राप्तः अयं युद्धः अर्जुनाय स्वर्गद्वारम् अपावृणोति, परन्तु एनं धर्मयुद्धं यदि सः न करोति तर्हि तस्य कीर्तिः इहलोके न भवति एवञ्च सः पापमपि अवाप्नोति। युद्धं न करोति चेत् सर्वे जनाः अर्जुनं भयात् युद्धात् उपरतः इति चिन्तयन्ति। अर्जुनं युद्धे प्रचोदयितुं श्रीकृष्णः युद्धेन कः लाभः भवति तदपि श्रावयति। युद्धेन विजयं प्राप्नोति चेत् राज्यसुखभोगमनुभवति नोचेत् वीरगतिं प्राप्य स्वर्गं गमिष्यति। एवं विविधरूपेण अर्जुनं युद्धाय प्रेरयितुं श्रीकृष्णः भिन्न-भिन्नरीत्या अवबोधयति। कर्तव्य-कर्मणः आचरणे समता अपेक्षिता। कार्यसम्पादने समतायाः महत्वमपि श्रीकृष्णः अर्जुनं बोधयति।

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥ भगवद्गीता -2.38

सुख-दुःख-लाभ-हानि-जय-पराजयः वा, परिस्थितिः या कापि वा भवतु तां परिस्थितिं समे कृत्वा युद्धाय नियोजयतु तेन पापात् मुक्तिं प्राप्नोति - इति कार्ये समतापरिस्थितिम् अवबोधयितुं श्रीकृष्णः कार्यसमताविषये प्रकरणम् आरम्भं करोति।

समता एव समबुद्धिः, योगः, व्यवसायात्मिका बुद्धिः आदिनाम्ना परिचिता। समबुद्धिः निश्चयात्मिका भवति। एका बुद्धिः भवति। अव्यवस्थिता बुद्धिः मनुष्यं भ्रामयति, लक्ष्यं निश्चेतुम् अवसरमेव न कल्पयति। तस्मात् बुद्धौ समता अपेक्षिता। यतो हि अर्जुनः कृष्णस्य शिष्यत्वम् अगृह्णात् (शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् - भगवद्गीता -2.7)अतः कृष्णः तं सङ्गं (आसक्तिम्) त्यक्त्वा कार्यं कर्तुम् उपदिशति। तेन सह केवलं कर्माचरितुमेव आदिशति एवञ्च सावधानवाणीमपि कथयति यत् कर्मफले अथवा अकर्मणि उभयत्रापि आसक्तिः न भवेत्। अतः सिद्ध्यासिद्धौ समो भूत्वा योगावस्थायां कर्माचरणीयं यतो हि समता एव योगः इति।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ भगवद्गीता - 2.47,48

'बुद्धौ शरणमन्विच्छ' - 2.49 इत्यत्र बुद्धिः शब्दः समतावाचकः अर्थात् समबुद्धिः इति। समबुद्धिः युक्तः मनुष्यः जीवितावस्थायामेव योगावस्थायां समतावस्थायां स्थित्वा कर्माचरति। सुव्यवस्थिततया कुशलतापूर्वं कर्माचरणे योगः एव कौशलम्।

द्वितीये अध्याये वर्णितस्य 'बुद्धिः' शब्दस्य अभिप्रायः समतार्थे आसीत् परन्तु अर्जुनः 'बुद्धिः' शब्दं ज्ञानार्थे स्वीकृतवान्। अतः सः भ्रमितः पृच्छति यदि कर्मणः अपेक्षया बुद्धिः श्रेष्ठा तर्हि युद्धसदृशे घोरकर्मणि किमर्थं प्रेरयति इति? अस्य विविधरूपेण समाधानं प्रस्तौति श्रीकृष्णः। यथा - कर्मणः स्वरूपस्य विवरणं प्रदाय, प्रदत्तविवरणस्य पुष्ट्यर्थं दृष्टान्तम् उपस्थाप्य च। अर्जुनः श्रीकृष्णस्य कथनेन कर्म स्वरूपेण त्यक्तव्यम् इति अवगतवान्, यतो हि तस्य मनसि युद्धं न करणीयमिति पूर्वाग्रहः आसीत्। तस्य अमु भ्रमं निवारयितुं श्रीकृष्णः तं कर्मस्वरूपं निगदति। प्रकृतिजगुणवशात्[1] मनुष्यः कर्म आचरति एव। क्षणमपि सः तूष्णीं न तिष्ठति।

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ भगवद्गीता - 3.5

मानवेन स्व-वर्णधर्मानुसारं कर्तव्य-कर्मणः पालनं करणीयम्। तस्मात् अर्जुनः अपि क्षात्रधर्मस्य पालनं कुर्यादिति। कर्मेन्द्रयाणि संयम्यापि कर्माचरणं न कर्तव्यम्। अतः मनसा इन्द्रियाणि नियम्य अनासक्तचेतसा कर्मेन्द्रियैः कर्माचरणीयम्। नियतकर्मणः[2] आचरणेन दोषः अपि न भवति तथैव शरीरयात्रापि चलति।

ISSN 2348-7828

कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते।
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥ भगवद्गीता – 3.7,8

सृष्टिकर्ता ब्रह्मा सृष्टेः रचनाकाले कर्तव्यकर्मणः विधानपुरस्सरं मनुष्याणां रचनां कृतवान्।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥ भगवद्गीता – 3.10

सृष्टेः सुरक्षार्थं कर्तव्यकर्मणः आवश्यकताम् अर्जुनस्य पुरतः श्रीकृष्णः प्रतिपादयति। समग्र-प्राणीजगतः उत्पत्तिः अन्नाद्भवति। वृष्टेः कारणाद् अन्नं समुद्भवति। यज्ञाद्वृष्टिः भवति। कर्मणा यज्ञः उद्भवति। कर्मणः उत्पत्तिः वेदात्। वेदः अक्षरब्रह्मणःमुद्भवति अर्थात् अक्षरब्रह्म परमात्मा एव सर्वत्रव्यापी अस्ति।

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ भगवद्गीता – 3.14

एवं विवरणं प्रदाय श्रीकृष्णः अर्जुनम् अवबोधयितुं प्रयासं करोति यत् सृष्टेः सुरक्षार्थं सर्वेऽपि स्व-कर्मणः आचरणं कुर्वन्ति। अतः अर्जुनोऽपि क्षात्रधर्मरूपनियतकर्मणः पालनं कुर्यादिति। अनसक्तचेतसा नियतकर्मणः आचरणेन दोषो न भवति। 'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् – भगवद्गीता – 18.48। अस्मिन् प्रसङ्गे श्रीकृष्णः जनकादीनाम् उदाहरणं ददाति तथा च श्रेष्ठजनाः यथा आचरन्ति अन्ये मानवाः अपि तद् अनुसरन्ति। एवमेव सः स्वस्य विषयेऽपि स्पष्टयति यत् त्रिलोके यद्यपि तस्य किमपि कार्यं नास्ति तथापि श्रीकृष्णः कार्यं करोति यतो हि मानवाः सर्वप्रकारेण तस्योपरि निर्भरशीलाः। अस्यां परिस्थितौ श्रीकृष्णः एव स्वकार्यं न करोति चेत् मनुष्याः भ्रष्टाः भवन्ति एवञ्च तस्योपरि वर्णसङ्करस्य दोषमपि आपतति। अस्मात् कारणात् श्रीकृष्णोऽपि स्वकर्तव्यं पालयति।

अत्र श्रीकृष्णः स्वकथनस्य पुष्ट्यर्थं प्रसिद्धं दृष्टान्तं प्रदाय स्व-उदाहरणमपि ददाति एवञ्च इतरजनाः प्रसिद्धान् अनुकुर्वन्ति तत् स्पष्टयति। तेन समाजे काचित् अनुकूलपरम्परा प्रचलति। अत्र श्रीकृष्णस्य अभिप्रायः अस्ति यतो हि प्रसिद्धान् जनान् अन्ये जनाः अनुसरन्ति, अतः यदि प्रसिद्धाः जनाः एव असमीचीनमाचरणं कुर्वन्ति तर्हि समाजे अराजकता वर्धते। अतः क्षत्रियार्जुनस्सदृशसुमहान् योद्धा युद्धं कुर्यादिति।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनाः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥
न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥ भगवद्गीता – 3.20,21,22

अस्मिन् प्रसङ्गे अर्जुनः श्रीकृष्णं पृच्छति केन प्रेरिता मानवाः पापमाचरन्ति? श्रीकृष्णः अस्याः जिज्ञासायाः उत्तरे कथयति रजोगुणस्य प्रभाववशात् मनुष्याः पापमाचरन्ति। यथा मलेन दर्पणम् आवृतं भवति अथवा धूमेन वह्निः आवृतो भवति तथैव कामनया मानवाः अपि अज्ञानेन आवृताः भवन्ति। यद्यपि मानवाः अवगच्छन्ति यत् ते पापमाचरन्ति तथापि रजोगुणेन वशीभूय आसक्त्या पापमाचरन्ति। अतः मनसा इन्द्रियाणि नियम्य कामरूपं शत्रुं जहि।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥
काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।

पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥ भगवद्गीता - 3. 36,37,38,41

यस्य आसक्तिः सर्वथा नष्टा अभवत्, यस्य बुद्धिः परमात्मनि एव स्थिता अस्ति, कार्यं कुर्वन्नपि तस्य सर्वाणि कर्माणि नष्टानि भवन्ति।

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।

यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥ भगवद्गीता - 4.23

कर्मफलस्य आश्रयं न स्वीकृत्य यः निरासक्तमनसा केवलं कर्म आचरति सः योगी भवति। योगी भवितुं सङ्कल्पं[3] त्यक्त्वा निष्कामभावनया केवलं कर्मणः आचरणम् एव मुख्यं भवति। यासु इच्छासु मानवानां प्रियाप्रियभावनाः भवन्ति।

उपसंहारः-

वस्तु, व्यक्तिः तथा च क्रिया एते भवन्ति संसारस्य स्वरूपम्। संसारे वस्तुनः प्राप्तिः अप्राप्तिः भवति, व्यक्तेः संयोगः वियोगश्च भवति तथैव क्रियायाः आरम्भः अन्तः च भवति। यः निरासक्तचेतसा इन्द्रियाणि नियम्य एतेषां त्रयाणां (वस्तु-व्यक्ति-क्रियाणाम्) आश्रयं त्यक्त्वा प्राप्तकर्तव्यस्य पालनं करोति सः योगी, सन्न्यासी पण्डितः वा भवति। कर्मफलस्य कामनां यः त्यजति सः योगी भवति। कर्मफले इच्छा एव मानवान् बध्नाति। अतः कर्मफलेच्छां त्यक्त्वा इन्द्रियाणि नियम्य सदोषं भवति चेदपि नियतकर्मणः आचरणं करणीयं भवति। निष्कामभावनया यः कर्तव्यस्य पालनं करोति सः एव योगी। योगी व्यक्तिः सर्वेषु मानवेषु उत्कृष्टा भवति। योगः अर्थात् समता। समतायां भूत्वा यः कर्मणः पालनं करोति सः योगी। श्रीकृष्णः अर्जुनं योगी भवितुं कथयति - 'योगयुक्तो भवार्जुन' - ८.27। कर्मयोगस्य मुख्यः विषयः एव निष्कामभावनया समतायां भूत्वा प्राप्तकर्तव्यकर्मणः आचरणमिति। तदेव श्रीकृष्णः अर्जुनम् अवबोधयति यत् निरासक्तचेतसा निष्कामभूत्वा वर्णधर्मानुसारं प्राप्तस्य नियतकर्मणः आचरणं सः अर्जुनः कुर्यादिति।

तपस्विभ्योऽधिको योगी ज्ञानीभ्योऽपि मतोऽधिकः।

कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ भगवद्गीता - 6.47

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।

तस्मद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥ भगवद्गीता - 2.50

पादटिप्पणी

1. सत्त्व-रज-तमो गुणाः
2. वर्णधर्मानुसारं शास्त्रेषु उक्तं कर्म नियतकर्म इति
3. सङ्कल्पः नाम मनसि विद्यमानाः विविधाः इच्छाः

सन्दर्भग्रन्थसूची

1. श्रीमद्भगवद्गीता साधक-सञ्जीवनी स्वामी रामसुखदास, गीताप्रेस, गोरखपुर
2. श्रीमद्भगवद्गीता शाङ्करभाष्य हिन्दी अनुवाद सहित, श्रीहरिशङ्कर दास गीताप्रेस गोरखपुर 2022
3. श्रीमद्भगवद्गीता श्रीरामानुजभाष्य हिन्दी अनुवाद सहित, गीताप्रेस गोरखपुर दिसम्बर 2017
4. श्रीमद्भगवद्गीता यथारूप, स्वामी प्रभुपाद, भक्तिवेदान्तपुस्तकन्यास, 2019

अतिथि-अध्यापिका, शिक्षाशास्त्रविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, हिमाचलप्रदेशः

ISSN 2348-7828

भारतीययोगशास्त्रे मनोविज्ञानम्

डॉ. के. मनोज्ञा

शोधसारः

'मन एव मनुष्यानां कारणं बन्धमोक्षयो:'[1] इति यथोक्तं मनसः अभ्युदयनिःश्रेयसफलप्राप्तौ महत्त्वदर्शनात् तद्विश्लेषणं पुरुषार्थसाधनाय अत्यावश्यकं प्रतिभाति। तस्मात् मनोविज्ञानम् अवश्यमध्येतव्यम्। मनोविज्ञानं प्राणिनः मनसः व्यवहारस्य च वैज्ञानिकमध्ययनम् वर्तते। एतत् विज्ञानम् अस्माकं विचारान्, भावनाः, इच्छाः, कर्माणि च अवगन्तुं प्रयतते। वयं किमर्थं चिन्तयामः, अनुभवामः, वर्तयामः चेति मनोविज्ञानेन गम्यते। किमिदं मनोविज्ञानं समकालीनं विज्ञानम्? नैव, वैदिककालात् तद्दर्शनात्। वेदेषु, पुराणेषु च योगरूपेण मनोविज्ञानं प्रपञ्चितम्। तस्य व्यवस्थितं रूपं पतञ्जलिना योगसूत्रात्मना लोकेभ्यः समुपस्थापितम्। योगशास्त्रे मनोविज्ञानं कथं प्रतिपादितमित्येव लेखेऽस्मिन् प्रतिपाद्यते।

कूटशब्दाः-मनः, योगः, मनोविज्ञानम्, चित्तवृत्तिः, योगसूत्रम्।

मनसः समस्तक्रियाकलापानां वैज्ञानिकमध्ययनं यत्र भवति तत् मनोविज्ञानमित्यभिधीयते। पाश्चात्यभारतीयभेदेन मनोविज्ञानस्य द्वैविध्यं कल्पयितुं शक्यते। तत्र तावत् पाश्चात्यमनोविज्ञानस्य इतिहासदर्शनेन ज्ञायते यत् मनोविज्ञानस्य विकासे प्लेटो, अरस्तू इत्यादिना दार्शनिकाना योगदानं वर्तते इति। मस्तिष्कं तर्कयुतस्य मानवमनसः आसनम् इति अरस्तू प्रतिपादितवान्। किञ्च 17 तमशताब्द्यां रेने डेस्कार्ट्स् इत्यनेन तर्कः कृतः यत् मनः विचारस्य चेतनायाः च क्षमतां ददाति -मनः 'निर्णयं करोति' शरीरं च 'निर्णयं निर्वहति' इति। इदमेवद्वैतात्मकं मनः-शरीर-विभाजनम् आधुनिकमनोविज्ञानस्य आधारभूतं वर्तते। 19 तमशताब्द्यां मनोविज्ञानस्य औपचारिकविषयत्वेन विज्ञानस्य च स्थापनायां साहाय्यं कृतवन्तौ द्वौ विद्वांसौ जर्मनीदेशस्य विल्हेल्म वुण्ड्ट्, अमेरिकादेशस्य विलियम जेम्स् च आस्ताम्।

भारतीयमनोविज्ञानम् अस्माकं ज्ञानस्य समृद्धं निकायं निर्दिशति यत् अस्माभिः प्राचीनचिन्तकेभ्यः चैतन्य-मनो-व्यवहारविषयकं ज्ञानं संप्राप्तम्। यतः चैतन्यस्य, आत्मनः, मानसिकक्रियाणां च सम्बद्धम्। अधिकांशा सामग्री धार्मिकाध्यात्मिकशिक्षाणां व्यवहाराणां च भागरूपेण उद्भूता, विकसिता च अभवत्। अतः एतासु परम्परासु ते धार्मिकत्वेन वा दार्शनिकत्वेन वा दृश्यन्ते।

दार्शनिकदृष्ट्या तु जगदिदं सर्वं मनोकल्पितमेव स्वाप्नप्रपञ्चवत्। तस्य मनसः नियन्त्रणेन व्यक्तेः प्रपञ्चोऽपि नियन्त्रितो भवति। अतः मनसः विज्ञानार्थं निग्रहार्थं च योगाख्यं शास्त्रमुपस्थापितं महर्षिपतञ्जलिना। योगो नाम किमिति चेत्-'योगश्चित्तवृत्तिनिरोधः'[2] इति सुप्रसिद्धं योगसूत्रं ज्ञातव्यम्। चित्तस्य वृत्तिः चित्तवृत्तिः, चित्तवृत्तीनां निरोधः निग्रहः चित्तवृत्तिनिरोधः। अर्थात् निरुद्ध्यन्ते यस्मिन् प्रमाणादिवृत्तयो अवस्थाविशेषे चित्तस्य सोऽवस्थाविशेषः योगः इति। अत्र चित्तपदेन मनः ग्राह्यम्। मनोवृत्तयश्चानन्ताः, कथं ते निरोद्धव्याः इति चेदुच्यते- 'वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः'[3] इति। वृत्तीनां पञ्चावयवाः सन्ति याः क्लिष्टाः भवितुमर्हन्ति अक्लिष्टाः अपि भवितुमर्हन्ति। अस्मितादिक्लेशवशात् प्रवृत्तिः यासां वृत्तीनां भवति ताः वृत्तयः क्लिष्टाः। याश्च वृत्तयः ख्यातिविषयकाः (विवेकज्ञानजनकाः) ताः अक्लिष्टाः। के ते क्लेशाः इति चेदुच्यते-'अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः'[4] इति।

(1) अविद्या-अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिः।

(2) अस्मिता-दृग्दर्शनशक्त्योरेकात्मता।

(3) रागः-सुखानुशायी।

(4) द्वेषः - दुखानुशायी।

(5) अभनिवेशः-स्वरसवाही विदुषोऽपि तथा रूढः।

अक्लिष्टाः उपादाय वैराग्येन क्लिष्टाः निरोद्धव्याः। ताश्च क्लिष्टाक्लिष्टाः वृत्तयः प्रमाणविपर्ययविकल्पनिद्रास्मृत्याख्याः वर्तन्ते।

1. प्रमाणम्-अनधिगततवबोधः पौरुषेयो व्यवहारहेतुः प्रमा। तत्करणं च प्रमाणमित्युच्यते। प्रत्यक्षानुमानागमाः प्रमाणानि त्रिविधानि।

(i) प्रत्यक्षम्-इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्।

(ii) अनुमानम्-अनुमेयस्य तुल्यजातीयेषु अनुवृत्तो भिन्नजातीयेभ्यः व्यावृत्तः सम्बन्धो यस्तद्विषया सामान्यावधारणप्रधाना वृत्तिरनुमानम्।

(iii) शब्दः–आप्तेन दृष्टोऽनुमितो वाऽर्थः परत्र स्वबोधसंक्रान्तये शब्देनोपदिश्यते, शब्दात्तदर्थविषया वृत्तिः श्रोतुरागमः।

2. विपर्ययः–मिथ्याज्ञानमतद्रूपप्रतिष्ठितम्[5]। मिथ्या असत्यं ज्ञानं येन ज्ञेयम् अतद्रूपेण ज्ञातं भवति इति सः विपर्यय इत्युच्यते। यथा द्विचन्द्रदर्शनम्। प्रमाणेन बाध्यमिदमतः अप्रमाणम्।

3. विकल्पः–शब्दज्ञानानुपाती वस्तुशून्यो[6]। वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिबन्धनो व्यवहारो दृश्यते। तद्यथा चैतन्यं पुरुषस्य स्वरूपमिति। चितिरेव पुरुषः तदा किमत्र केन व्यपदिश्यते।

4. निद्रा–अभावप्रत्ययालम्बना वृत्तिः[7]। जाग्रत्स्वप्नवृत्तीनामभावः तस्य प्रत्ययः कारणं बुद्धिसत्त्वाच्छादकं तमः, तदेव आलम्बनं विषयो यस्याः सा वृत्तिः निद्रा।

5. स्मृतिः–अनुभूतविषयासम्प्रमांषः[8]। प्रमाणादिभिरनुभूते विषये योऽसम्प्रमोषः अस्तेयं सा स्मृतिः इत्युच्यते।

सर्वाश्च एताः वृत्तयः सुखदुःखमोहात्मिकाः। सुखानुशायी रागः। दुःखानुशायी द्वेषः। मोहः अविद्या। एताः सर्वा वृत्तयो निरोद्धव्याः। एतासां निरोधे उपायमपि दर्शयति महर्षिपतञ्जलिः–अभ्यासवैराग्याभ्यां तन्निरोधः[9] इति। चित्तनदी नाम उभयतोवाहिनी–कल्याणाय वहति, पापाय च वहति। या तु कैवल्यप्राग्भारा विवेकविषयनिम्ना सा कल्याणवहा। संसारप्राग्भाराऽविवेकविषयनिम्ना पापवहा। तत्र वैराग्येण विवेकदर्शनाभ्यासेन विवेकस्रोतः उद्घाट्यते इत्युभयाधीनः चित्तवृत्तिनिरोधः। चित्तवृत्तिनिरोधश्च अभ्यासवैराग्याभ्यामित्युक्तम्। तत्र अभ्यासो नाम किमित्युक्तं योगसूत्रे –'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः'[10] इति। दीर्घकालासेवितो निरन्तरासेवितो सत्कारासेवितः, तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान् दृढभूमिः भवति। वैराग्यञ्च[11]–'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्' अर्थात् अन्नपानादिलौकिकविषये स्वर्गाद्यलौकिकविषये च चित्तस्य सम्प्रयोगेऽपि विषयदोषदर्शिनः वितृष्णस्य अनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यम्। 'ईश्वरप्रणिधानाद्वा'[12] इति सूत्रेण ईश्वरस्य प्रणिधानेन भक्तिविशेषेनापि चित्तवृत्तिनिरोधः भवितुमर्हतीत्युक्तम्।

उक्तोपायस्य सकृत् अनुष्ठानेन कदाचित् चित्तवृत्तिनिरोधः न भवति यतोहि तत्र अन्तरायाः विघ्नरूपेण चित्तविक्षेपाः वर्तन्ते। के ते चित्तविक्षेपाः इति चेदुच्यते–'व्याधि–स्त्यान–संशय–प्रमाद–आलस्य–अविरति–भ्रान्तिदर्शनम्–अलब्धभूमिकत्वम्–अनवस्थितत्वानि चित्तविक्षेपास्ते अन्तरायाः'[13] इति। नव चित्तविक्षेपाश्च इत्थं–

(i) व्याधिः–रेगः। धातुरसकरणवैषम्यम्।

(ii) स्त्यानम् – चित्तस्य अकर्मण्यता।

(iii) संशयः–एकस्मिन् धर्मिणि भावाभावयोः द्वयोः विरुद्धधर्मयोः वा संदेहः।

(iv) प्रमादः–समाधिसाधनानाम् अभावनम्।

(v) आलस्यम्–कायस्य चित्तस्य च गुरुत्वात् अप्रवृत्तिः।

(vi) अविरतिः–भोग्यविषयेषु वैराग्याभावः।

(vii) भ्रान्तिदर्शनम्–मिथ्याज्ञानम्।

(viii) अलब्धभूमिकत्वम्–समाधिभूमेरलाभः।

(ix) अनवस्थितत्वम् – समाधिभूमौ चित्तस्य अप्रतिष्ठता।

एताः चित्तविक्षेपाः समाधिप्रतिपक्षाः अभ्यासवैराग्याभ्यामेव निरोधव्याः।

यस्य चित्तमवस्थितं भवति सः सुखवत्सु मैत्रीं दर्शयति, दुःखवत्यु करुणां, पुण्यवत्सु मुदितां, अपुण्यशीलेषु उपेक्षाञ्च। एवं भावयतः तस्य सत्त्वोत्कर्षः सम्पद्यते। ततश्च चित्तं प्रसीदति। प्रसन्नमेकाग्रं स्थितिपदं लभते।

समाहितचित्तानाम् अभ्यासवैराग्याभ्यां योगः सम्भवति। ये व्युत्थितचित्ताः तेषां कृते क्रियायोगाख्यः उपायः उपदिष्टः– 'तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः'[14] इति।

योगाङ्गानुष्ठानेन च अशुद्धिक्षये विवेकख्यातिरुत्पद्यते इत्यतः अष्टौ योगस्य अङ्गानि अनुष्ठेयानि। तानि च यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः च।

1. यमाः–

(a) अहिंसा–सर्वथा सर्वदा सर्वभूतानाम् अपीडनम्।

(b) सत्यम्–यथार्थे वाङ्मनसे।

(c) अस्तेयम्–अशास्त्रपूर्वकं द्रव्याणां परत: स्वीकरणं स्तेयं, तत्प्रतिषेध: अस्तेयम्।

(d) ब्रह्मचर्यम्–गुप्तेन्द्रियस्य संयम:।

(e) अपरिग्रह:–विषयाणां दोषदर्शनात् अस्वीकरणम्।

2. नियमा:–

(a) शौचम्–मृज्जलादिना शारीरकमलत्याग: बाह्यं शौचम्। आभ्यन्तरं चित्तमलानां प्रक्षालनम्।

(b) संतोष:–संनिहितसाधनात् अधिकस्य अनुपादित्सा।

(c) तप:–शीतोष्णादिद्वन्द्वसहनम्।

(d) स्वाध्याय:–मोक्षशास्त्राणामध्ययनं प्रणवजपो वा।

(e) ईश्वरप्रणिधानम्–तस्मिन् परमगुरौ सर्वकर्मार्पणम्।

3. आसनम्–स्थिरसुखम्।

4. प्राणायाम:–श्वासप्रश्वासयोर्गतिविच्छेद:।

5. प्रत्याहार:–स्वविषयसंप्रयोगे चित्तस्वरूपानुकार इव इन्द्रियाणां प्रत्याहार:।

6. धारणा–कस्मिंश्चिद् देशे चित्तस्य बन्धनम्।

7. ध्यानम्–ध्येये प्रत्ययैकतानता।

8. समाधि:–ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते।

आद्यपञ्चाङ्गानि बाह्यानि, अन्तिमत्रयं च आन्तरम्। एतेषामनुष्ठानेन मन: शुद्धं तीक्ष्णं नियन्त्रितं च भवति। 'दृश्यते त्वग्र्यया बुद्ध्या'[15] इति यथोच्यते समाहितं युक्तं चित्तं तस्य परमपदस्य प्राप्तिसाधकं भवति।

इत्थं योगशास्त्रे मनस: स्वरूपं तन्निग्रहोपायाश्च प्रपञ्चिता:। अनेन सिद्ध्यति यत् भारतीयं योगशास्त्रं मनोविज्ञानेन परिपूर्णमस्तीति।

पादटिप्पणी

1. योगवासिष्ठम्
2. योगसूत्रम् (1.2)
3. योगसूत्रम् (1.5)
4. योगसूत्रम् (2.3)
5. योगसूत्रम् (1.8)
6. योगसूत्रम् (1.9)
7. योगसूत्रम् (1.10)
8. योगसूत्रम् (1.11)
9. योगसूत्रम् (1.12)
10. योगसूत्रम् (1.14)
11. योगसूत्रम् (1.15)
12. योगसूत्रम् (1.23)
13. योगसूत्रम् (1.30)
14. योगसूत्रम् (2.1)
15. कठोपनिषद् (1.3.12)

सन्दर्भग्रन्थसूची

1. महर्षिपतञ्जलि:, योगसूत्रम्, मोतीलालबनारसीदास पब्लिशर्स नव देहली।
2. वाचस्पतिमिश्र:, योगसूत्रभाष्यटीका, आर्यभूषणमुद्रणालय: पुण्यपत्तनम्।
3. महाकविवाल्मीकि:, योगवासिष्ठम्, तारा बुक एजंसी वाराणसी।
4. कठोपनिषद्, गीताप्रेस गोरखपुर।
5. https://www.psychologyyall.com/inde&.php/history-of-psychology?view=article&id=y~#google_vignette

सहायकाचार्या (संविदा)
वेदान्तविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालय: वेदव्यासपरिसर:

ISSN 2348-7828

शब्दस्वरूपनिर्णये मीमांसाशयविमर्शः

प्रलय-नन्दी

शोधसारः-सर्वेष्वपि सम्प्रदायेषु शब्दतत्त्वस्य विषये विचारावसरो विद्यते। प्रधानतः शब्दो नित्योऽथवा अनित्य इति प्रसङ्गे विद्वांसो विवदन्ते। तत्र तत्र सम्प्रदायेषु शब्दस्य किं तावत्स्वरूपमिति विषये दृश्यन्ते मतभेदाः, अत एव शब्दस्य नित्यत्वानित्यत्वविषयेऽपि वादानुवादाः प्रचलन्ति। प्रकृतप्रबन्धे तावत् शब्दस्य नित्यत्वानित्यत्वयोरुपस्थापनं कृतम्। तत्र नैयायिकाः, शब्दस्वरूपविचारप्रसङ्गे जैमिनीयसूत्रे प्रस्तुताः पूर्वपक्षिणश्च शब्दानित्यत्वपक्षेऽन्तर्भाविताः। शब्दनित्यत्वपक्षे वेदान्तिनः साङ्ख्ययोगिनो मीमांसकाः शाब्दिकाश्च वर्णिताः। तदनु मीमांसकानां मतमनुसृत्य शब्दस्वरूपस्य संक्षिप्तो विमर्शः प्रस्तुतः।

कूटशब्दाः-शब्दः, ध्वनिः, स्फोटः, श्रोत्रम्।

भूमिका-निखिलेष्वपि निकायेषु व्यवहारपथि शब्दस्योपयोगिता अवश्यमभ्युपेया भवति, शब्दं विना सकृदपि व्यवहारस्यासम्भवात्। व्यवहारातिरिक्तेषु स्मृत्यादिष्वपि शब्दस्योपयोगः, तत्रावस्थायामपि अर्थेऽभिधेयत्वसत्त्वात्। एवं प्रत्यक्षेण अनुमानेन उपमानेन शब्देन अर्थापत्त्या अनुपलब्ध्या वा बोधोद्भवे सर्वत्रापि मौख्येनामौख्येन वा शब्दस्य अपरिहार्यता अनुभूयते। एवंरीत्या जगदिदं शब्दमयमिति सिद्धान्तयितुं शक्यम्। अथ किमस्य शब्दस्य स्वरूपमिति विषये प्रस्थानगौरवाश्रयाद् अवलोक्यते महान् मतिकलहो मतिमत्सु विद्वत्सु। नैयायिकानां प्रमाणविचारदृष्ट्या चिन्तनम्, मीमांसकानां वेदप्रामाण्यस्थापनदृष्ट्या प्रतिपादनम्, साहित्यिकानां काव्यस्वरूपनिर्धारणदृष्ट्या निर्णयः, वैयाकरणानां साधुत्वान्वाख्यानदृष्ट्या चिन्तनमिति सम्प्रदायानुमतसिद्धान्तानुसारं प्रतिपादनपन्थानो भिन्ना दृश्यन्ते। एवं सत्स्वपि दृष्टिभेदेषु प्रायेण सर्वेष्वपि शास्त्रेषु शब्दविचारः तत्तच्छास्त्रोपयोगिविचारविषयत्वेन परिगृह्यते। तत्र मुखान्निर्गता ध्वनय एव शब्दास्ततोऽतिरिक्तः शब्दो नास्तीति लोके विश्वासः, तत्रैवलौकिकानां प्रवृत्तिनिवृत्तिदर्शनात्। वैशेषिकनैयायिकैरपि मुखान्निर्गतध्वनीनामेव शब्दत्वमभ्युपगतम्, 'श्रोत्रग्राह्यो गुणः शब्दः'[1] इत्याद्युक्तेः। पूर्वमीमांसकाः शब्दस्य नित्यवर्णरूपत्वं प्रतिपादयन्ति। उत्तरमीमांसायामपि वर्णानामेव शब्दत्वं, तादृशशब्दानां नित्यत्वञ्च सिद्धान्तितम्। साङ्ख्यदर्शनेऽपि शब्दस्य नित्यत्वमेव व्याख्यातं दृश्यते। वैयाकरणैस्तु स्फोटाख्यो नित्यः शब्दः सिद्धान्तितः। प्रकृतप्रबन्धेएतानि मतानि आलोच्य मीमांसकाभिमतस्य शब्दनित्यत्ववादस्य संक्षिप्तो विमर्श प्रस्तूयते।

शब्दस्वरूपम्-ईश्वरस्वरूपावबोधो यथा कठिनतपोगम्यस्तथा शब्दस्वरूपावबोधोऽपि अत्यन्तं दुरूहः। अत एव वैयाकरणविद्भिः शब्दो ब्रह्मत्वेन सिद्धान्तितः। नैयायिकाः शब्दस्य ब्रह्मत्वं न स्वीकुर्वन्ति परन्तु ब्रह्मणा ईश्वरेण वा सम्बद्धस्यैव शब्दस्य प्रामाण्यं प्रतिपादयन्ति। शब्दो हि सर्वसम्प्रदायसाधारणः, सर्वे स्वसम्प्रदायानुगुण्येन शब्दस्वरूपं प्रतिपादयन्ति। अग्निवाय्वादिषु जीवनाधारभूतेषु भूतेषु यथा जनानाम् एकाधिकारो न सम्भवति, तथा शब्दविषयेऽपि न कस्यापि एकाधिकारता प्रसिद्धा। एतद्विषये विदुषां विचारः स्वतन्त्रः। शब्दो यद्यपि जगति प्रसिद्धं तत्त्वम्, किन्तु तस्य स्वरूपविषये भिन्नाभिप्रायकाः पक्षाः परिलक्षिताः। तत्र तत्र परिशीलनमन्थनेन शब्दतत्त्वोपलब्धिमणय उपलभ्यन्ते। सम्प्रति शब्दनित्यत्वं शब्दानित्यत्वमिति पक्षद्वयमाश्रित्य विचारा उपस्थाप्यन्ते।

अनित्यः शब्दः-आचार्येण जैमिनिना शब्दानित्यत्ववादस्य खण्डनं कृतम्। ततः पूर्वम् अनित्यत्वसाधकस्य पूर्वपक्षस्यषट्सु सूत्रेषूपपादनं कृतम्। तत्र प्रथमं 'कर्मैके तत्र दर्शनात्'[2] इति। शब्दोऽनित्यो जन्यत्वादिति प्रथमो विचारः। नैयायिकैः वर्णात्मको ध्वन्यात्मकश्चेति द्विविधः शब्दो व्याख्यायते। द्विविधोऽपि शब्दः प्रयत्नसाध्यः, एवञ्च जन्यत्वादयं शब्दोऽनित्यः। 'अस्थानात्'[3] इति द्वितीयं सूत्रम्। अस्थानादर्थात् उत्पत्तिविनाशशीलत्वादपि शब्दोऽनित्यः। उच्चारणानुपदं शब्दस्योपलब्धिर्न दृश्यत इति शब्दो विनष्ट इति व्यवहारः। 'करोति शब्दात्'[4] इति तृतीयं सूत्रम्। शब्दं कुरु, मा शब्दं कार्षीरित्येवं व्यवहारा लोके दृश्यन्ते। शब्दानित्यत्वे एतानि प्रमाणानीति आशयः। 'सत्वान्तरे च यौगपद्याद्'[5] इति चतुर्थं सूत्रम्। नानादेशेषु युगपदुपलब्धिः कार्याणामेव सम्भवति, शब्दश्चोपलभ्यते नानादेशेष्वितितदनित्यत्वम्। 'प्रकृतिविकृत्योश्च'[6] इति पञ्चमं सूत्रम्। वर्णेषु शब्देषु च प्रकृतिविकृतिभावः प्रत्यक्षीभवति, यथा-मध्वत्र इत्यत्र उकारः प्रकृतिर्वकारो विकृतिः। यत्र च प्रकृतिविकृतिभावस्तत्र अनित्यत्वमिति कारणाच्छब्दोऽनित्यः।'वृद्धिश्च कर्तृभूम्नास्य'[7] इति षष्ठं सूत्रम्। बहुभिरुच्चारयद्भिर्महान् शब्दः सृज्यते। यदि शब्दः स्फोटात्मकः अभिव्यज्यमानो भवेत्तर्हि बहुभिरल्पैर्वा उच्चार्यमाणस्तावानेव उपलभ्येत, तथा तु न दृश्यते। अतः शब्दस्यावयवाः प्रकल्प्यन्ते, यत्प्रचयाद् महान् शब्द इति निर्वाहः। एवमत्र सावयवत्वाच्छब्दस्यानित्यत्वं सिध्यति।

नैयायिकैरपि शब्दस्यानित्यत्वं प्रतिपादितम्। तत्र शब्द: त्रिभिविविधैरुत्पद्यते–केचन शब्दा: संयोगत उत्पद्यन्ते, केचन विभागात् प्रजायन्ते अन्ये च शब्दत एव सम्पद्यन्ते। भेरीदण्डादिसंयोगतस्तथा कण्ठताल्वोर्विलक्षणसंयोगत उत्पद्यमान: शब्द: संयोगज:[8]। विभज्यमाने वंशे विभागत: शब्दा: सम्पद्यन्ते, एते विभागजा: शब्दा:। ये तावच्छब्दत एवोत्पद्यन्ते ते शब्दजा: शब्दा इत्यभिधीयन्ते। अवधेयोऽयं विषयो यदेक एव शब्दो न कदापि स्वयं कर्णविवरे उपस्थातुं शक्त:, प्रथममुत्पन्नस्य शब्दस्य सजातीय एव द्वितीयतृतीयादि: कश्चन शब्द: श्रवणविषयो भवतीति स्थिति:। शब्दोत्पत्तिस्थलात् शब्दो वीचितरङ्गन्यायेन कदम्बगोलकन्यायेन वा कर्णविवरवर्त्याकाशं प्रविशतीति निर्वाह:।

एवं नैयायिकानां नये ध्वनित्वेन वर्णत्वेन चेति शब्दस्य द्विधा व्यवहार:। मृदङ्गादिसंयोगेन उत्पन्न: शब्दो ध्वनिरिति व्यवह्रियते, कण्ठताल्वादिसंयोगेन च सम्पन्न: शब्दो वर्णरूपेण प्रसिध्यति[9]। ध्वनिरूपो वर्णरूपो वायं शब्दो यदा कर्णविवरभूते आकाशे सन्तिष्ठते, तदा जनै: शब्द: साक्षात्क्रियते।

नित्य: शब्द: :वेदान्तिन: साङ्ख्ययोगिन: मीमांसकाश्च शब्दानां नित्यत्वं प्रतिपादयन्ति। एतेषां मते वर्णा एव शब्द:, वर्णानामेवार्थेन शक्तिरूपो नित्य: सम्बन्ध इति सिद्धान्त:। स्फोटात्मक: शब्दो नैतेषामभिमत:, वर्णातिरिक्तस्य शब्दस्य बुद्धौ प्रतिभासासम्भवात्।

(1) स्फोटवादिनां वैयाकरणानां मते तु स्फोट एव शब्द:, स्फोटात्मक: शब्दो नित्यो विभुरेकोऽखण्डश्च। अयं शब्द: श्रुतिगोचरैर्ध्वनिभिरभिव्यज्यते, अत एवैते श्रुतिगोचरा ध्वनयो व्यञ्जका:। अभिव्यज्यमान: शब्द एव ब्रह्म, तदेव शब्दतत्त्वमिति सार:। ध्वनिगता वाक्यत्वपदत्ववर्णत्वकत्वखत्वोदात्तत्वादिधर्मा व्यङ्ग्ये स्फोटाख्ये ब्रह्मणि आरोप्यन्ते, अत एकोऽपि स्फोटाख्य: शब्दो भिन्नतया प्रतीयते। एवञ्चायं स्फोट एव शब्दार्थोभयात्मकप्रपञ्चस्य विवर्तोपादानभूतं ब्रह्मेति वैयाकरणानां निर्णीति:।

(2) साङ्ख्यमते परिगणितेषु पञ्चविंशतितत्त्वेषु पञ्चतन्मात्रमस्तिअहङ्कारस्य विकार:, तेष्वन्यतमं शब्दतत्त्वम्। अस्मादेव भूताकाशस्य सृष्टि:। अस्मिन् सम्प्रदाये शब्दस्तु द्रव्यं न तु गुण: किञ्च सत्कार्यत्वादस्य नित्यत्वम्। साङ्ख्याचार्यैस्तु स्फोटो नाभिमत:। 'प्रतीत्यप्रतीतिभ्यां न स्फोटात्मक: शब्द:'[10] इत्यनेन सूत्रेण तत्र स्फोटो निराकृत:। तथाहि यदि स्फोटस्य प्रतीतिरस्ति तर्हि येनानुपूर्वीविशिष्टसमुदायेन तस्य प्रतीतिस्तेनैवार्थप्रतीति: स्यादिति न किमपि स्फोटस्वीकारेण। यदि च प्रतीतिर्नास्ति तर्हि कथमप्रतीतेन तेनार्थप्रत्यय:। अत: स्फोटो व्यर्थ इत्याशय:। अपि च, वर्णानां गृहीतसङ्केतानां स्फोटव्यञ्जकत्वम्, अगृहीतसङ्केतानां वा। आद्ये तैरेवार्थप्रतीति:, अन्त्ये सङ्केताभावाद् अर्थाप्रत्यय: सर्वस्य वार्थस्य सम्प्रत्यय:। इति दोषात् स्फोटकल्पना न युक्ता। अतो वर्णा एव वाचका इत्यवस्थिति:। एवं शब्दनित्यत्ववाद: समर्थित:।

(3) वेदान्तिभिरपि शब्दनित्यत्ववादोऽभिमत:। परन्तु अत्र सम्प्रदाये ब्रह्मातिरिक्तस्य सर्वस्यानित्यत्वाद् मिथ्यात्वाच्च शब्दस्य न पारमार्थिकं नित्यत्वमपि तु व्यावहारिकं नित्यत्वमिति मतविशेष:। भगवत्पादैर्देवताधिकरणे ब्रह्मसूत्रे प्रथमाध्याये तृतीयपादे भाष्ये उपवर्षाचार्यादिसम्मतत्वेन वर्णनित्यत्वं प्रतिपादितम्। भामत्यां श्रीवाचस्पतिमिश्राचार्यैरपि वर्णनित्यत्ववादो व्याख्यात:। तत्त्वबिन्दौ च भाट्टसम्मतो वर्णनित्यत्ववाद एव सिद्धान्तत्वेन प्रतिपादित:। वर्णनित्यत्वे च प्रत्यभिज्ञानं प्रत्यक्षं प्रमाणम्, यथा : सोऽयं गकार इत्यादि। शब्दो नित्य: श्रावणत्वात्, शब्दत्ववद् इत्यनुमानस्यापि अत्र प्रामाण्यं बोध्यम्। वाचा विरूपया नित्येत्यादि: श्रुतिस्तथा अनादि निधना नित्यत्वेत्यादिस्मृतिरत्र शब्दप्रमाणम्। यदि शब्दो नित्यो न स्यात्तदास्माद् अर्थसम्प्रत्ययो न स्यादित्येवमत्र अर्थापत्तिप्रमाणं बोध्यम्। अतो वर्णा एव वाचका न स्फोट:। किञ्च वर्णवादिनां लघीयसी कल्पना, स्फोटवादिनाञ्च दृष्टहानिरदृष्टकल्पना च। वर्णाश्चेमे क्रमेण गृह्यमाणा: स्फोटं व्यञ्जयन्ति स चार्थं व्यनक्तीति गरीयसी कल्पना स्फोटवादिनामिति भाव:।

(4) मीमांसका अपि शब्दस्य नित्यत्वं प्रतिपादयन्ति। अत्र मते शब्दार्थयो: सम्बन्ध औत्पत्तिक:। औत्पत्तिकशब्दस्य नित्यत्वं स्वाभाविकत्वं वार्थो व्याख्यात:। तथाहि जैमिनीये प्रथमाध्याये वेदस्य स्वत: प्रामाण्याधिकरणे 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यति-रेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्'[11] इति शब्दार्थसम्बन्धस्य नित्यत्वं स्वीकृतम्। नित्य: शब्दार्थसम्बन्धो न तु साङ्केतिक: सम्बन्ध इत्याशय:। एवमेव 'सत: परमदर्शनं विषयानागमात्'[12] इत्यादौ उत्पत्त्यभिव्यक्तिपक्षयो: शब्दस्य क्षणमात्रश्रावणोपलब्धिसमत्वेऽपि अभिव्यक्तिपक्षस्य समर्थनं कृतम्, उत्पत्तिपक्षस्य च खण्डनं कृतम्। तथैव 'नित्यस्तु स्याद्दर्शनस्य परार्थत्वाद्'[13] इत्यादौ व्यञ्जकस्यानित्यत्वमाश्रित्य शब्दस्य नित्यत्वं समर्थितम्। एवमर्थस्यापि जातिरूपस्य नित्यत्वमास्थाय शब्दार्थतत्सम्बन्धानां त्रयाणामपि नित्यत्वमङ्गीकृतम्।

एवं शब्दस्य नित्यत्वस्वीकारेऽपि वेदान्तिभि: साङ्ख्यैर्मीमांसकैश्च स्फोटात्मक: शब्दो न स्वीकृत इति लभ्यते। उभयस्मिन्नपि पक्षे वर्णानामेव नित्यत्वं वाचकत्वं चेति विशेष:।

मीमांसाशयः–मीमांसायां षट् प्रमाणानि स्वीकृतानि, षडपि प्रमाणानि शास्त्रेषु प्रसिद्धानि। तेष्वन्यतमं शब्दप्रमाणम्। वैदिकानां विधिवाक्यानामत्रैव अन्तर्भावइति स्वीक्रियते। लोकव्यवहारेषु एतेषां सर्वेषामपि प्रमाणानां यथार्थं प्रामाण्यं प्रतिष्ठितम्। अतः शब्दप्रमाणेऽपि प्रामाण्यप्रतिष्ठायै उपदेष्टुराप्तता आवश्यकीति उपवर्षाचार्यस्याभिमतिः। उपवर्षाचार्यादनन्तरं ये आचार्याः समभवन् तैः सर्वैरपि विधिवाक्यानां प्रामाण्याय तेषामाप्तोक्तता निराकृता। एवञ्च शब्दप्रामाण्यस्य प्रतिष्ठापनाय तैः शब्दार्थसम्बन्धस्य नित्यता व्याख्याता। एवमेवऔत्पत्तिकस्तु शब्दस्यार्थेनेत्यादिसूत्रे औत्पत्तिकपदस्य व्याख्यानं कुर्वद्भिराचार्यैः औत्पत्तिक इति पदस्य स्वाभाविको नित्यो वा अर्थो व्याख्यातः। शब्दः, अर्थस्तयोः सम्बन्धश्च नित्य एवेति भावः। अत एव मीमांसाशास्त्रे शब्दो नित्य इत्युत्तरपक्षः, शब्दोऽनित्य इति च पूर्वपक्षः।

मीमांसासूत्रकारेण भगवता जैमिनिना शब्दानित्यत्ववादस्य खण्डनं कृतम्। शब्दो नित्योऽनित्यो वेति शब्दविषयकं मतद्वयम्। शब्दस्योच्चारणं क्षणमात्रोपलब्धिर्वा शब्दस्याभिव्यक्तिमात्रम्–इति शब्दनित्यत्ववादिनः। प्रयत्नोच्चारणादिभिः शब्द उत्पद्यते, उच्चारणात्प्राक् पश्चाच्च नास्ति तस्यास्तित्वमिति अनित्यत्ववादिनः। 'नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्'[14] इति शब्दनित्यत्वसाधने प्रथमं सूत्रम्। दृश्यते शब्दोऽनेनेति व्युत्पत्त्या दर्शनशब्दोऽत्र उच्चारणार्थकः। यदि शब्दो नित्यो न भवेत्तदा परार्थं बोधयितुं तस्योच्चारणं नोपपन्नम्। शब्दस्य शब्दार्थसम्बन्धस्य च नित्यत्वम् एव शब्दोच्चारणम् अर्थबोधनेन सफलं स्यादित्याशयः। 'सर्वत्र यौगपद्यात्'[15] इति द्वितीयं सूत्रम्। कस्यचिच्छब्दस्योच्चारणे तदर्थविषयकः प्रत्ययो युगपज्जायते। तदैव स एवायं गकारः, तदेवेदं गोपदमित्येवं प्रतीतिर्जायते। एतादृशी प्रत्यभिज्ञा वर्णानां तथा पदानां विषयेऽनुभवसिद्धा एव। नित्यः शब्द एव वारं वारम् उच्चारितो भवति। तेषु कोऽपि स्वपूर्वोच्चारितात् शब्दाद्भिन्नो न भवति। सर्वसाधारणा अपि जना एतत् स्वीकुर्वन्ति व्यवहरन्त्यपि। एक एव गोशब्दः वारं वारमुच्चारितो भवतीति रीत्या शब्दो नित्यः। शब्दनित्यत्वे सति शब्दस्याभिन्नत्वम्, ततश्च शब्दे द्वित्वादिसङ्ख्याया अप्यभावः। अत्र सूत्रं 'सङ्ख्याभावात्'[16] इति। प्रत्यभिज्ञया शब्दस्य श्रवणकालमतिक्रम्य कालान्तरेऽपि तस्यावस्थितिः साधिता, तदा शब्दनाशे निरस्ते नाशकारणमपि स्वतो निरस्तं भवति, अत्र सूत्रम् 'अनपेक्षत्वात्'[17] इति। तथाहि न किञ्चित् शब्दोत्पत्तिकारणत्वेन प्रतिपादितं, न वाकिञ्चिच्छब्दविनाशकारणम् उपन्यस्तम्। अतः अनपेक्षत्वादर्थाद् अपेक्षितविनाशकारणाभावादपि शब्दो नित्य इत्याशयः। अथ वायुः शब्दत्वमापद्यत इति शिक्षावचनेषूपपादितम्। एवञ्च पटादिवद्वायवीयः अवयविद्रव्यविशेषः शब्दः। ततश्चावयवसंयोगविशेषविनाशात् सम्भवति शब्दविनाश इत्याक्षिप्ते सूत्रमुच्यते–'प्रख्याभावाच्च योगस्य'[18] इति। पूर्वोक्तरीत्या वायवीयावयवानां सन्निवेशरूपः स्याच्छब्दः। परन्तु पटे यथा तदवयवानां तन्तूनामभिज्ञानं जायते न तथा शब्दे वायवीयानाम् अवयवानाम्। न हि शब्दगतानां वायवीयावयवानां स्पर्शः सम्भवतीति आशयः। एवञ्च न हि शब्दस्य वायुकारणकत्वम्, नातस्तस्यानित्यत्वम्। शब्दनित्यत्वाधिकरणे जैमिनिनान्तिमं सूत्रमुपन्यस्तम्–'लिङ्गदर्शनाच्च'[19] इति। अन्यपरं सदन्यार्थद्योतकं वाक्यं लिङ्गमित्युच्यते। तादृशलिङ्गदर्शनाच्च शब्दस्यानित्यत्वमिति भावः। ऋग्वेदे–'वाचा विरूपनित्यया'[20] इत्यादिना शब्दस्य नित्यत्वं प्रतिपादितम्। विरूपा च सा नित्येति विरूपनित्या। रूपयतीति रूपं कर्ता। विगतं रूपं यस्या इति व्युत्पत्त्या निष्पन्नस्य विगतरूपेत्यस्य कर्तृरहितेत्यर्थः। अतश्च विगतरूपा सती नित्या वाक्। अत्रेयं श्रुतिरग्निस्तुतिपरा सत्यपि वाचो नित्यत्वं द्योतयतीति तस्या लिङ्गत्वम्। अतो नित्यः शब्द इति सिद्धान्तः। मानमेयोदयेऽपि प्रतिपादितम्–

'श्रोत्रमात्रेन्द्रियग्राह्यः शब्दः शब्दत्वजातिमान्।
द्रव्यं सर्वगतो नित्यः कुमारिलमते मतः[21]।।' इति।

एवम् आचार्यकुमारिलभट्टेनापि श्लोकवार्तिके शब्दनित्यत्वाधिकरणे अनित्यत्वसाधकाः सर्वेऽपि पूर्वपक्षाः निरस्ताः, अन्ते च सिद्धान्तितम्–

'शब्दो यथा पौद्गलिको निषिद्धः स्याद्वायवीयस्य स एव मार्गः।
तस्मादनिर्धारितहेतुमार्गः सर्वत्र साक्षाद् भवतीति नित्यः[22]।।' इति।

विमर्शः–

(1) प्रतिसम्प्रदायं समीक्षणेनेदं लक्ष्यते यत्तत्र तत्र शब्दविषये नित्यत्वस्यैवाधिक्येन समर्थनं कृतं विद्वद्भिः। आपाततः परिशीलिते विषयोऽयं स्पष्टो भवति यच्छब्दस्य नित्यत्वप्रतिपादका अनित्यत्वव्यवस्थापकाश्चेति उभावपि पक्षौ निर्दुष्टौ। तत्र मतभेदे सत्यपि तात्पर्यतो न कश्चन विरोध इति भावः।

(2) वैयाकरणतन्त्रे शब्दानां नित्यत्वानित्यत्वदिशा शोभनं व्यवस्थापनम् अवलोक्यते। अत्र अकारादयो वर्णस्फोटा नित्यशब्दत्वेन प्रतिपादिताः, एते सर्वत्र व्याप्ताश्च। परन्तु एतेषाम् अभिव्यक्तिः कण्ठताल्वादिव्यापारेण यान्त्रिकक्रियादिभिर्वा सम्भवति, अतो न सर्वदा अनुभवः। अत्र अकारादिवर्णानां नित्यत्वे सत्यपि वर्णाभिव्यक्तिजनकानां कण्ठताल्वादिव्यापाराणाम् अनित्यत्वं व्याख्यातम्। एतादृशम् उच्चारणविषयमादायैव नैयायिकैः शब्दस्यानित्यत्वं सिद्धान्तितम्। अतो वस्तुतो वैयाकरणानां तन्त्रे न्यायोक्तं मतं न विरुध्यत इति लब्धम्।

ISSN 2348-7828

(3) अनपेक्षत्वादिति सूत्रेण मीमांसकैः शब्दोत्पत्तौ विनाशे च किमपि कारणं नास्तीति प्रतिपादितम्। एतेन नैयायिकोक्तं शब्दस्य समवायिकारणम् असमवायिकारणं निमित्तकारणञ्च निरस्तमिति आपाततः प्रतीयते। वस्तुतोऽत्रापि न कश्चन विरोधलेशः, मीमांसकैः नित्यशब्दाभिप्रायेण कारणाभावस्य प्रतिपादनात्।

(4) शाब्दिकैः नित्योऽनित्य इत्युभयविध एव शब्दो व्यवस्थापितः। श्रोत्रेन्द्रियग्राह्यः स्फोटात्मकः पदार्थः शब्दः, अयञ्च नित्यः। एतादृशस्य शब्दस्याभिव्यक्त्यनन्तरं जायमानो ध्वनिरपि शब्दः, परन्तु अयमनित्य इति विशेषः। अत्रायं ध्वनिर्वैकृतध्वनिरिति शाब्दिकानामाग्रहः। तत्र प्राकृतध्वन्यात्मकः शब्दो नित्यः, वैकृतध्वन्यात्मकः शब्दोऽनित्य इति निर्वाहः। प्रथमप्रकारकं शब्दमभिप्रेत्य मीमांसकादयः शब्दनित्यत्वं व्याख्यान्ति, द्वितीयप्रकारकञ्च शब्दमाश्रित्य नैयायिकाः शब्दानित्यत्वं प्रतिपादयन्तीति विमर्शसारः।

उपसंहारः-विदुषां सम्प्रदायेषु शब्दो नित्य इत्येव प्रसिद्धिः। वेदान्तिनः साङ्ख्ययोगिनः मीमांसकाः शाब्दिकाश्च शब्दनित्यत्वमेव सिद्धान्तितवन्तः। परन्तु तत्र तत्र शब्दस्वरूपं भिद्यत इत्येव विशेषः। वैयाकरणाः स्फोटत्वेन शब्दं प्रतिपादयन्ति, इतरे नित्यत्ववादिनश्च तद् विरुध्यन्ति, तेषां मते स्फोटस्य अस्वीकारात्। एवञ्च अंशविशेषे विरोधे सत्यपि सर्वेषां मते शब्दो नित्य इत्येव परमसिद्धान्त इति प्रकृतप्रबन्धे प्रतिपादितम्। नैयायिकैः शब्दस्य अनित्यत्वे प्रतिपादितेऽपि मीमांसकादिभिस्तेषां न कश्चिद्विरोधः, श्रोत्रग्राह्यस्थूलशब्दाभिप्रायेणैवनैयायिकैः शब्दानित्यत्वस्य प्रतिपादनात्। एवं संक्षेपेणात्र प्रबन्धे शब्दस्य स्वरूपविषये विचारः प्रस्तुतस्तत्र जैमिन्युक्तमतदिशा विमर्शश्च उपस्थापितः। अत्र युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्यात्रैव विरम्यत इति शम्।

पादटिप्पणी

1. तर्कसङ्ग्रहः, पत्राङ्कः : 59।
2. जैमिनिसूत्रम्, 01/01/06।
3. जै.सू.01/01/07।
4. जै.सू.01/01/08।
5. जै.सू.01/01/09।
6. जै.सू.01/01/10।
7. जै.सू.01/01/11।
8. ध्यातव्योऽयं विषयो यत्सर्वविधः संयोगः शब्दकारणं न भवति। नोदनाभिघाताभ्यां संयोगो द्विधा विभज्यते, तयोः अभिघातसंयोगादेव शब्द उत्पद्यते।
9. शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः। कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः।। कारिकावली : ।।164-165।।
10. साङ्ख्यसूत्रम्,05.57।
11. जै.सू.1/1/5।
12. जै.सू.01/01/13।
13. जै.सू.01/01/18।
14. जै.सू.01/01/18।
15. जै.सू.01/01/19।
16. जै.सू.01/01/20।
17. जै.सू.01/01/21।
18. जै.सू.01/01/22।
19. जै.सू.01/01/23।
20. ऋग्वे.08/75/06।
21. मा.मे.02/02, पत्राङ्कः-244।
22. श्लो.वा.शब्दनित्यत्वाधिकरणे : 444।

सन्दर्भग्रन्थसूची

1. अन्नम्भट्टः। तर्कसङ्ग्रहः (न्यायबोधिनी-पदकृत्य-दीपिका-किरणावलीव्याख्योपेतः)। सम्पा. श्रीकृष्णवल्लभाचार्यः। वाराणसीः चौखम्बा संस्कृत सीरीज आफिस, 2017 ई.।
2. कुमारिलभट्टः। मीमांसाश्लोकवार्तिकम्। वाराणसीः कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः, प्रथम आवृत्ति 1979 ई.।
3. नारायणद्वयी। मानमेयोदयः। सम्पा. डाँ. विजय रानी। दिल्ली : परिमल पब्लिकेशन्स। प्रथमसंस्करणम्, 2013 ई.।
4. भर्तृहरिः। वाक्यपदीयम् (तृतीयं काण्डम्, द्वितीयो भागः, व्याख्याद्वयोपेतम्)। पद्मश्रीः पण्डितश्रीरघुनाथशर्मा। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः। द्वितीयसंस्करणम्, वि.सं - 2035।
5. महर्षिपतञ्जलिः। पातञ्जलयोगदर्शनम् (व्यासभाष्य-योगसिद्धिहिन्दीव्याख्योपेतम्)। वाराणसी : चौखम्बा सुरभारती प्रकाशन। पुनर्मुद्रितसंस्करणम्, 2008 ई.।
6. माधवाचार्यः। सर्वदर्शनसङ्ग्रहः। सम्पा. प्रो. उमाशङ्कर शर्मा 'ऋषि'। वाराणसीः चौखम्बा विद्याभवन, 2022 ई.।
7. शबरस्वामी। शाबरभाष्यम् (विवेक-हिन्दीव्याख्यासहिता)। वाराणसीः चोखम्बा संस्कृत सीरीज आफिस, 2004 ई.।

शोधच्छात्रः

रामकृष्णमिशन्-विवेकानन्द-शैक्षिक-शोध-संस्थानम्

बेलुडमठम्, हावडा

ISSN 2348-7828

वेदान्तनयानुसारेण तमसः भावरूपत्वम्

डॉ. रघु. बि.राज्

शोधसारः – तमः इत्याख्यः कश्चन पदार्थः सर्वैः अपि अभ्युपगम्यते। तस्य स्वरूपविषये वादिनां विप्रतिपत्तिः वर्तते। नीलं तमः इति सर्वेषामपि प्रत्यक्षप्रतीतिः वर्तते। तत्र तेजसः अभावः विषय इति न्यायमतानुसारिणः। भावरूपं किञ्चित् न्यायमते क्लृप्तेषु द्रव्येषु अनन्तर्भूतं द्रव्यान्तरं तमः इति वेदान्तिनः तथा भाट्टमीमांसकाः। उभयोः अपि मते प्रत्यक्षस्य विषयः कः इति अत्र विवादः। प्रकृते न्यायमतमुपस्थाप्य वेदान्तमतरीत्या सिद्धान्तः क्रियते।

कूटशब्दाः–दर्शनम्, वेदान्तः, तमः, तेजः, अद्वैतम्, शङ्कराचार्यः।

तत्र तार्किकाणामयम् अभिप्रायः – तमः न भावरूपं द्रव्यान्तरं भवतुमर्हति। तथा हि – तमसः रूपवद्द्रव्यत्वे अनुपपत्तयः सन्ति। यदि तमः रूपवद्द्रव्यं स्यात् तर्हि आलोकासहकृतचक्षुर्जन्यग्रहविषयो न स्यात्। तमः तावत् आलोकस्य अभावे एव गृह्यते। चक्षुः तावत् आलोकसहकारेणैव द्रव्यं गृह्णातीति लोके दृष्टम्। अतः तमः न रूपवद्द्रव्यम्। किञ्च यदि तमः तेजोविरोधि रूपवद्द्रव्यं स्यात् तर्हि तेजसः अपगमे सति झटिति उत्पत्तिः न स्यात्। कार्यद्रव्याणि च द्व्यणुकादिक्रमेणोत्पद्यन्ते इति आरम्भवादिनां सिद्धान्तः। तदनुसारेण तमसः कार्यद्रव्यस्य द्व्यणुकादिक्रमेण उत्पत्तिः वाच्या। तथा च द्व्यणुकादिक्रमेण उत्पत्त्यङ्गीकारे कृते सति तोजसः अपगमे झटिति तमसः ज्ञानमनुभूयमानं न स्यात्।

अपि च भावपदार्थः तमः इति अभ्युपगच्छन्ति ये ते प्रष्टव्याः प्रसिद्धेषु षट्सु भावपदार्थेषु कुत्र तमसः अन्तर्भावः भवति इति। यतः षट्पदार्थान्यतमत्वं हि भावत्वम्। तद्यदि नास्ति तर्हि भावत्वमपि न भवति। तत्र पदार्थेषु आदिमः पदार्थः द्रव्यम्। तत्र प्रसिद्धनवद्रव्येषु अन्यतमं द्रव्यम् इति स्वीक्रियते, उत द्रव्यान्तरमिति स्वीक्रियते। आद्यः पक्षः भवितुं नार्हति। यतः चतुर्षु पृथिव्यादिषु तमसः अन्तर्भावः भवितुं नार्हति, स्पर्शरहितत्वात्। नापि अवशिष्टेषु द्रव्येषु तमसः अन्तर्भावः, अनित्यत्वात। अतः आद्यः पक्षः न सम्भवति। द्वितीयः पक्षः यदि स्वीक्रियते तर्हि तत्र पृच्छामः किमिदं द्रव्यान्तरं गुणवद्वा अथवा गुणरहितं वा इति। यदि तावत् गुणरहितमिति पक्षः स्वीक्रियते तर्हि निर्गुणस्य द्रव्यत्वानुपपत्तौ द्रव्यान्तरत्वमपि अवश्यं नैवोपपद्यते।

ननु तमः निर्गुणमिति पक्षस्वीकारेऽयं दोषः। अतः न तं पक्षं स्वीकुर्मः, किन्तु नीलं तमः इति प्रतीतिबलात् सगुणत्वमेव स्वीकुर्म इति चेत् न। यत्र नीलरूपं भवति तत्र अवश्यमेव गन्धादिकमपि दृश्यते। अर्थात् यत्र निलरूपं तत्र गन्धादयः इति नियमः अवगतः अस्ति। यदि च तमसि गन्धादिकं न स्यात् तर्हि तद्व्याप्यं नीलरूपादिकमपि भवितुं नार्हति। अतः न नीलरूपगुणवत् तमः भवितुम् अर्हति।

किञ्च यदि तमः द्रव्यान्तरमिति स्वीक्रियते तर्हि तत्किं सावयवम् उत निरवयम्। न तावत् निरवयं, नित्यत्वापत्तेः। नापि सावयवम्। सावयवत्वे तदरम्भकाणां परमाणूनां स्पर्शवत्वे तमसि अपि स्पर्शः उपलभ्येत। न च अस्पर्शवन्तः परमाणवः उत्पादकाः इति वाच्यम्। अस्पर्शवतां परमाणूनां मनोवद् द्रव्यारम्भकत्वायोगात्। अतः तमः न प्रसिद्धद्रव्येषु अन्यतमं वा द्रव्यान्तरं वा भवितुमर्हति। तमः अभावरूपमेव। आह दीपिकाकारः –'तस्मात्प्रौढप्रकाशकतेजस्सामान्याभावः तमः[1]'

एवं प्राप्ते सिद्धान्तः अभिधीयते – तमः द्रव्यान्तरमिति। नैय्यायिकैः आपादितानां दोषाणां सर्वेषामपि परिहारः कर्तव्य इति तत्र यत्नः क्रियते। जाग्रदवस्थायां स्फुटरूपेण निर्बाधिता नीलं तमः इत्याकारिका प्रतीतिः जायते। तत्र विषयीभूतं तमः द्रव्यान्तरम्। तत्र क्लृप्तेषु द्रव्येषु अन्तर्भावः भवितुं नार्हति इति पूर्वपक्षिभिः एतावता प्रदर्शितमेव। अतः तद्द्वयमपि अङ्गीकुर्मः परन्तु द्रव्यान्तरं तमः इति स्वीकुर्मः एव।

ननु चक्षुरिन्द्रियम् आलोके सत्येव रूपिद्रव्यं गृह्णाति। यदि तमः रूपिद्रव्यं स्यात् तर्हि आलोक-असहकृतचक्षुर्जन्यग्रहविषयो न स्यात्। आलोकाभावे तमः गृह्यते इतीदं कथमुपपद्यते इति चेत् – इदम् आपादनं न युक्तम्। परीक्षकैः प्रमाणानुसारेण लक्षणानां प्रणयनं कर्तव्यम्, न तु लक्षणं कृत्वा प्रमाणसिद्धार्थः वारणीयः। तदुक्तं भट्टपदैः–

सिद्धानुगममात्रं कर्तुं युक्तं परीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्[2]॥

इति। यद्रूपिद्रव्यं तदालोकसहकृतचक्षुर्ग्राह्यमिति निमयः नैय्यायिकैः कृतः। तदनुसारेण तमसः द्रव्यत्वं नास्तीति कथनं कृतम्। तन्नयुक्तम्, आलोकाभावस्य तमसः अभिव्यञ्जकत्वमस्ति। अतः आलोकनिरपेक्षतया एव तमः चक्षुषा गृह्यते इति स्वीक्रियते। न च अन्यत्र आलोकसहकारं विना चक्षुषः रूपिद्रव्यग्राहकत्वमदृष्टमित्यतः, प्रकृते अपि तमसः ग्रहणं न सम्भवति इति वाच्यम्। कस्य कीदृशकार्योत्पादिका शक्तिः अस्ति इति कार्यं दृष्ट्वा निश्चेतव्यं भवति। प्रकृते च कार्यं तमसः ग्रहणमित्याकारकं दृश्यते इत्यतः पूर्वोक्तः नियमः अत्र न भवितुमर्हति।

किञ्च तार्किकैरपि कार्यानुसारेणैव सामर्थ्यं कल्पनीयम्। अन्यथा तेषामपि पक्षे क्वचित् दोषाः अपरिहार्याः भवन्ति। तथा हि – रूपवतः घटस्य तथा तदभावस्य दर्शनं आलोके सत्येव भवति इति दृष्टम्। एवं च रूपवतः तत्प्रतियोगिकाभावस्य च ग्रहणे आलोकः सहकारी इति नियमः सिद्धः। ततः यदा रूपवतः तेजसः अभावः गृह्यते तदानीमपि आलोकस्यापेक्षा स्यात्। ननु आलोकविरोधित्वात् अलोकस्य नापेक्षा इति चेत्, अत्रापि तुल्यम्, आलोकविरोधित्वात् आलोकनिरपक्षतया तमः चक्षुषा गृह्यते इति।

चक्षुषः एव तमोग्राहकत्वे कथिते सति उच्यते – ननु यदा चक्षुषः व्यापारो न भवति तदा तमसः ग्रहणं न भवेत्। परन्तु चक्षुषः निमीलने कृते सत्यपि तमसः ग्रहणं जायते। अतः न तमः चक्षुषा गृह्यते। न, तत्रापि पक्ष्मान्तर्वर्तिनः तमसः ग्रहणं चक्षुषः व्यापारात्

ISSN 2348-7828

अनन्तरमेव भवति। चक्षुषः व्यापारो नास्तीति तु तार्किकाणां भ्रम एव। कर्णस्य पिधाने कृते सति यथा आन्तरः शब्दः श्रूयते तद्वदत्रापि आन्तरं तमः गृह्यते एव।

यदपि यत्र नीलरूपं तत्र नियमेन गन्धादिकमस्तीत्यादिः तर्कः उक्तः। तदपि न साधु। एवं स्वीकारे सति अनुष्णाशीतस्पर्शः गन्धसमानाधिकरणः पृथिव्यां दृष्टः। तथा च वायौ गन्धाभावात् स्पर्शः अपि न स्यादिति दोषः आपद्यते। ननु तमः रूपरहितं स्पर्शाभावात् आकाशवत् इति अनुमानेन रूपाभावं साधयामः इति चेत्, न। तथा सति पवनः स्पर्शाभाववान् रूपाभावात् आकाशवत् इति अनुमानेन पवनस्य स्पर्शाभावः अपि सिद्ध्येत्। इदमेव आहुः मानमेयोदयकाराः–

नीलादिरूपयुक्तस्य स्पर्शत्वं च दृश्यते। स्पर्शाभावान्न रूपि स्यात् तम इत्यप्यपेशलम्॥
स्पर्शयुक्तस्य सर्वत्र रूपवत्त्वं च दृश्यते। रूपाभावेन वायोरप्यस्पर्शत्वप्रसङ्गतः[3]॥

ननु यदि तमः रूपिद्रव्यं स्यात् तर्हि तद्ध्वंसप्रगभावाः अनेके कल्पनीयाः, तदवयवाः अपि अनन्ताः कल्पनीयाः इति अत्यन्तं गौरवं स्यात्। किञ्च तेजसः निर्वापे झटिति तमसः उत्पत्तिः कथं भवितुमर्हति। द्व्यणुकादिक्रमेण तु उत्पत्तौ झटितिभानं विरुद्ध्येत। किञ्च अस्पर्शवत्त्वादेव न तमःपरमाणवः तमसः आरम्भं कर्तुं प्रभवन्ति इति चेत्, उच्यते – गौरवं यदाक्षिप्तं तन्नदोषाय। प्रामाणिकत्वात्। तथा च प्रसिद्धं वचः – 'गौरवं न भाराय यत्प्रमाणस्य सम्मतम्। न हि भारय भवति काङ्क्षितं काञ्चनादिकम्'[4] इति। न च कथं झटिति भानमिति आक्षेपः युक्तः, मूलकारणं माया। सा एव प्रकृतेऽपि कारणमिति अभ्युपगमेन द्व्यणुकादिक्रमेणोत्पत्तिः भवेदिति क्रमस्य अपेक्षा न वेदान्तिनां मते। अतः यथा नभसि झटित्येव आलोकः दृश्यते, एवमेव इहापि तमसः उत्पत्तौ दोषः नास्ति।

अस्पर्शवत्वादेव तमःपरमाणवः न तमसः आरम्भं कर्तुं प्रभवन्ति इति आक्षेपस्य समाधानं च आरम्भवादानभ्युपगमादेव सिद्ध्यति। भाट्टैः मीमांसकैः तावत् यद्यपि परमाणूनां सकाशादेवारभ्यते इति अभ्युपगतमस्ति। तथापि न तेषां मते अयं दोषः सम्भवति। यतः मनः इति दृष्टान्तः एव असिद्धः, मनसः विभुत्वस्वीकारात्। किञ्च यदि अस्पर्शत्त्वमादाय कथञ्चित् तर्कः क्रियेत, तर्हि रूपवन्तः परमाणवः एव पृथिव्यादिपदार्थानामरम्भकाः दृष्टाः इत्यतः, वायुपरमाणुषु रूपाभावात् महद्वाय्वारम्भकत्वं न स्यादित्यपि तर्कः कर्तुं शक्यते। अतः न कथञ्चित् तर्कमुक्त्वा व्यवहारः साधनीयः।

अपि च नैय्यायिकानां पक्षे अनेकं बाधकं द्रष्टुं प्रभवामः। नीलं तमः इति प्रतीतिः भ्रमः इति तेषामाशयः। रूपविषयकं प्रमात्मकं ज्ञानं वा भवतु भ्रमात्मकं ज्ञानं वा भवतु, तस्य ग्रहणाय आलोकस्यापेक्षा अस्ति एव। एवं स्थिते आलोकाभावे अपि कथं तमसि नीलरूपवत्वप्रत्यक्षं जायते? किञ्च अन्यथाख्यातिभिः अन्यत्र अन्यधर्मावभासाभ्युपगमे अपि संस्कारस्य भ्रमस्थले सहकारित्वमभ्युपगन्तव्यम्। प्रकृतस्थले संस्कारः सहकारिकारणं कथं सादृश्याद्यभावेऽपि नियमेन उद्बुद्धः भवति इति प्रश्नः तिष्ठति एव। अपि च तमस्त्वं तेजोभावत्वम्। तमः अवगतं चेत् तेजोभावः अवगतः इति जातम्। एवं स्थिते कथम् अभावे रूपभ्रमः भवितुमर्हति? किञ्च इन्द्रियेण अभावग्रहे करणत्वेऽपि अनुपलब्धेः कारणत्वं तु वाच्यमेव। तत्र अनुपलब्धेः योग्यतानिश्चयः कथं जायते इत्यपि प्रश्नः तथैव तिष्ठति, आलोकाभावात्।

पुनश्चः आलोकाभावः तमः इति कथयतां कः आशयः? किम् आलोकमात्राभावः तमः? एकैकालोकाभावः तमः? अथवा सर्वालोकाभावः तमः? तत्र आदिमं पक्षद्वयमपि न भवति। यतः यदा निरन्तरः सवितृप्रकाशः वेष्मनि भवति तदा प्रदीपस्य जन्मनः प्राग्वा प्रदीपस्य नाशात् अनन्तरं वा तमः अस्ति इति बुद्धिः नास्ति। नापि सर्वालोकाभावः तमः इति पक्षः युक्तः। यदि सर्वालोकाभावः तमः स्यात् तर्हि सर्वेषामालोकानां सन्निधौ एव तमसः निवृत्तिः स्यात्। तच्च न सम्भवति इति तमसः निवृत्तिरेव न स्यात्।

